॥ श्री विधिपक्ष गच्छाधिराज श्री १००८ श्री आर्यरक्षितसुरुभ्यो नमः ॥

श्री विधिपक्ष (अचळ) गच्छाधिराज श्री १०८ श्री जयशेखरसूरिकृ

॥ उपदेश-चिंतामणिः ॥

संस्कृतटिकया भाषांतरेण च सहितः द्वितीयाधिकारः

भाषांतर कर्ता—वढवाणवाळा शास्त्री हरिशंकर काळीदास.

श्री विधिपक्षगच्छीय मुनिमंडलाग्रेश्वर मुनिमहाराज श्री गौतमसागरजीना सदुपदेशथी-मदद आपनारा सद्गृहस्थोनी आर्थिक सहायथी छपावी प्रसिद्ध करनार कच्छ अंजारना रहेवासी शा. सोमचंद धारशी.

अमदावाद—आदर्श प्रींटींग प्रेसमां पंडित बाडीलाल डाह्याभाइए तथा शाहपुर कवीठामां
श्री प्रजाहितार्थ मुद्रालयमां पटेल डाह्याभाइ वलभदासे छाप्युं.

विक्रम संवत् १९७९. प्रत ५००. वीर संवत् २४४८.

किम्मत रु. २-०-०. पोष्ट रु. ०-४-०.

॥ अथ द्वितीयोऽधिकारः प्रारभ्यते ॥

हवे बीजो अधिकार प्रारंभ कराय छे ॥

तस्य च पूर्वेण सह संबंधं प्रकरणकारः स्वयमेवाह ।

अने प्रकरण कर्ता ते आ बीजा अधिकारनो प्रथम अधिकारनी साथेनो संबंध पोतेज कहे छे.

जिणधम्मं जीवा न हु,लहंति सामग्गिबाहिरा सव्वे॥माणुस्साखित्तकुलगुरु–सद्धाविरिआइया सा य॥१॥

निश्चे मनुष्य भव विगेरे सामग्री विनाना सर्वे जीवो जिनधर्मने पामता नथी. अने ते सामग्री मनुष्यभव, आर्यक्षेत्र, उत्तम कुल, सुगुरुसमागम, धर्मश्रद्धा अने धर्मकार्यमां उद्यम विगेरे छे.

व्याख्या । हुरेवकारार्थः सर्वे जीवा भव्या अभव्याश्च सामग्रीबाह्याः संतो नैव जिनधर्मं पूर्वाधिकारोपवर्णितस्वरूपं लभंते ॥

सर्वे जीवो एटले के–भव्य अने अभव्यजीवो मनुष्यभवादि सामग्री रहित छतां प्रथम अधिकारमां वर्णन करेला स्वरूपवाला जैन धर्मने नथीज पामता.

सामग्रीसद्भावे तु लभंते । तस्मादत्राधिकारे सामग्री वक्तव्येति भावः ।

वली मनुष्यभवादि सामग्रीनो योग छतां जैनधर्मने पामे छे, माटे आ बीजा अधिकारमां मनुष्यभवादि सामग्री कहेवा योग्य छे. ए भाव जाणवो.

नन्वभव्याः सामग्रीसद्भावेऽपि जिनधर्मं न लभंते । इति प्रतीतं प्रावचनिकानाम् । ततः किमेवमुच्यते ? नैवम् । श्रद्धारहितत्वेनाभव्यानां सदापि सामग्रीबाह्यत्वात् ॥

अहिं प्रतिवादी शंका करे छे—अभव्यजिवो मनुष्यभवादि सामग्रीनो योग छतां पण जिनधर्मने नथी पामता, एम सिद्धांतिकोने प्रसिद्ध छे. अर्थात् सिद्धांतना जाणनाराओए निश्चय कर्यो छे तो पछी तमे एम केम कहो छो जे मनुष्य भवादि सामग्रीनो योग होय तो जैनधर्म पामे छे. अहिं वादी समाधान करे छे के—अमारूं कहेवुं एम नथी. कारणके श्रद्धारहितपणाने लीधे अभव्यजीवोने निरंतर मनुष्यभवादि सामग्रीनुं रहितपणुं छे माटे,

अथ सामग्रीमेव नामग्राहमाह । माणुस्सेत्यादि ।

हवे मनुष्यभवादि सामग्रीनेज नामग्रहण पूर्वक वर्णन करे छे. ' माणुस्स ' ए मूलनी अर्धी गाथाथी–

सा च सामग्री मानुष्यक्षेत्रकुलगुरुश्रद्धावीर्यादिका भवति ।

अने ते सामग्री मनुष्यपणुं, उत्तमक्षेत्र, कुलगुरु, श्रद्धा अने वीर्य विगेरे होय छे.

तत्र मानुष्यं मनुष्यभवः, क्षेत्रमार्यभूमिः, कुलमार्हतम्. गुरुर्धर्मोपदेष्टा, श्रद्धा धर्मस्य परिणतिः, वीर्यं धर्मकृत्येष्वनालस्यम् । आदिशब्दाद्रूपारोग्यायुःपरिग्रहः । इयं च सर्वापि समुदिता सम्यग्बोधिनिबंधनम् ॥

तेमां मानुष्य ते मनुष्यभव, क्षेत्र ते आर्यभूमि, कुल ते श्रावकनुं कुल, गुरु ते शुद्ध धर्मनो उपदेश करनार. श्रद्धा ते धर्मनुं परिणमवुं अने वीर्य ते धर्मकार्यमां आलस्यरहितपणुं. आदिशब्दथी रूप आरोग्य आयुष्य जाणवा. वली ए सर्व सामग्री उत्तम समकीतनुं कारण कही छे.

अत एव निधिरिव दुर्गतानां पोत इव जलधिपतितानां सुधारस इव तृष्णातरलितानां सुसार्थ इव मार्गच्युतानां दीप इव तमोविप्लुतानां दुर्लभा. सेयं कर्मवशानां प्राणिनाम् ॥

माटे दरिद्रने निधाननी पेठे, समुद्रमां पडेलाने वहाणनी पेठे, तृषाथी व्याकुल थयेलाने अमृतरसनी पेठे, मार्गथी भुला पडेलाने सारा सार्थवाहनी पेठे अने अंधकारथी मूंझायलाने दीवानी पेठे कर्म वश रहेला प्राणिओने ते आ पूर्वे वर्णन करेली सामग्री दुर्लभ छे.

तत्र प्रथमं मानुष्यं दुर्लभमाह.

तेमां प्रथम मनुष्यभवनुं दुर्लभपणुं कहे छे.

दुलहं खलु माणुस्सं, सव्वुत्तमलाभमूलनीविसमम् ॥ लंभे जस्स विसिट्ठा,दसादिट्ठंता सुए दिट्ठा ॥२॥

सर्व प्रकारनां उत्तम लाभने विषे मूलनीवि (मूलद्रव्य) सरखुं मनुष्यपणुं निश्चे दुर्लभ छे. जेना आलंबनने विषे उत्तम एवा दश दृष्टांत सूत्रने विषे देखाडया छे. ॥ २ ॥

व्याख्या—खलु निश्चितं प्रथमं प्राणिनां मानुष्यं मनुष्यत्वं दुर्लभं दुःप्रापं, कथंभूतम् ? सर्वेषा-मुत्तमलाभानां 'इह भवे सम्यग्ज्ञानादीनां प्रेत्य स्वर्गापवर्गादीनां च' मूलनीविसमं मूलद्रव्यकल्पम्॥

प्रथम प्राणीओने मनुष्यपणुंज दुर्लभ छे. ए मनुष्यपणुं केवुं छे ? तो के आ भवमां सर्व एवा सम्यग् ज्ञानादिक उत्तम ला-भोना अने परभवमां स्वर्ग मोक्ष विगेरे लाभोना मूल द्रव्य समान छे.

यथाहि । मूलनीव्या चौरादिभिरनुपहतया काश्चिद्भाग्यवान् विशिष्टलाभं लभते । तथा मा-नुष्येन प्रमादादिभिरनुपहतेन भव्या अपि यथोक्तलाभमिति ॥

जेम चौरादिक वडे नहि हणायली मूलनीवि (मूलधन) थी कोइ भाग्यवान् पुरुष श्रेष्ठ एवा लाभने पामे छे. तेम प्रमाद विगेरेथी नहि हणायला मनुष्य भववडे भव्य जीवो पण कह्या प्रमाणे स्वर्गादि लाभने पामे छे.

उक्तं च । जहा उ तिणिवाणिया,मूलं घेत्तूण निग्गया ॥ एगोत्थ लभए लाभं,एगो मूलेण आगओ ॥१॥
एगो मूलंपि हारित्ता,आगओ तत्थ वाणिओ ॥ ववहारे ओवमा एसा, एवं धम्मे वियाणह ॥ २ ॥
माणुसत्तं भवे मूलं, लाभो देवगई भवे ॥ मूलच्छेएण जीवाणं, नरगातिरिक्खत्तणं धुवं ॥ ३ ॥

जेम त्रण वेपारी वाणीया मूल धन लइने वेपार अर्थे निकल्या. तेमां एके लाभ मेलव्यो, बीजो मूल धन पाछुं लाव्यो १ अने त्रीजो वेपारी तो मूल धनने पण हारी पाछो आव्यो. व्यवहारमां आ उपमा आपी छे अने ए प्रमाणे धर्ममां पण जाणवी २ तेमां मनुष्य भव ए मूल धन जाणवुं, अने लाभ मेलव्यो ते देवगति जाणवी. वत्री मूल धन रूप मनुष्य भवनो पण विच्छेद थवाथी जीवोने नारकी अने तिर्यंचपणुं निश्चय प्राप्त थाय छे. ॥ ३ ॥

अथ मानुष्यस्य दुर्लभतायां दृष्टांतानाह,

हवे मनुष्य भवना दुर्लभपणामां दृष्टांतो कहे छे.

लंभेजस्सेत्युत्तरार्द्धं स्पष्टम्, दृष्टांतसंग्रहश्चैवम् ॥

लाभे यस्स (ए मूल गाथानुं) उत्तरार्द्ध पद स्पष्ट छे अने दृष्टांत संग्रह आ प्रमाणे छे.

विप्राशनं पाशकमन्नराशिं,द्युतं मणिं स्वप्नशशांकपानम् ॥
चक्रं च कूर्मं च युगं पराणुं, दृष्टांतमाहुर्मनुजत्वलाभे ॥ १ ॥

ब्राह्मण भोजननुं, पासानुं. अन्नना समूहनुं, द्युतनुं, रत्ननुं, स्वप्नमां चंद्रपाननुं, चक्रनुं, काचबानुं अने धूंसरी तथा परमाणुनुं, मनुष्यपणानी प्राप्तिने विषे ए दश दृष्टांत कह्यां छे. ॥ ६ ॥

तत्र विप्राशनदृष्टांतः पूर्वं प्रतिपाद्यते ॥

तेमां विप्राशन (ब्राह्मणना भोजननुं) दृष्टांत प्रथम कहे छे.

कांपिल्यपत्तने ब्रह्म–दत्तोऽजनि नरेश्वरः ॥ चुलनीकुक्षिनालिनी–हंसो ब्रह्म नृपांगजः ॥१॥ यो दीर्घ-
दर्शिनं दीर्घ, दीर्घनिद्रामलंभयत् ॥ स्फुरत्खड्गलताच्छाये, श्रांतं समरकानने ॥ २ ॥
संजाते चक्रवर्त्तित्वा–भिषेके द्वादशाब्दिके ॥ फलानीव तपःकल्प–तरोः सौख्यान्यभुक्त यः ॥ ३ ॥
बहुदुःखसहायोऽभूत्, भ्राम्यतस्तस्य भूतलम् ॥ द्विजः कोपि पुरा दुस्थो, दारिद्रस्येव सेवधिः ॥४॥
स श्रुत्वा चक्रिणं ब्रह्म–दत्तं वित्ताभिलाषुकः ॥ कांपिल्यमाययौ पांथ, इव नीराशया सरः ॥ ५ ॥
सिंहद्वारं विशन् विप्र–श्चक्रिणोऽवारि वेत्रिणा ॥ क्व प्रस्थितोऽसि रेधृष्ट, तिष्ट तिष्टेति जल्पता ॥६॥

कांपिल्य नगरने विषे ब्रह्म राजानो पुत्र अने चुलनी राणीना उदररूप कमलिनीने विषे हंस समान ब्रह्म-दत्त नामनो राजा हतो. जे ब्रह्मदत्ते युद्धमां थाकी गयेला महाविचारवंत दीर्घनामना राजाने पोतानी देदीप्यमान खड्गलतानी छायामां दीर्घकालनी निद्राने पमाडयो हतो. ॥ २ ॥ वली जेणे बार वर्ष सुधी चक्रवर्तीपणानो अभिषेक थया पछी तपरूप कल्पवृक्षनां फलोनी पेठे सुखोने भोगव्यां हतां ॥ ३ ॥ पूर्वे (चक्रवर्ती पद पाम्या पहेलां) पृथ्वी उपर भमता एवा ते ब्रह्मदत्तने बहु दुःखमां दारिद्र कोइपण ब्राह्मण सहायकारी थयो हतो. ॥ ४ ॥ जेम मुसाफर जलनी इच्छाथी तलाव तरफ जाय तेम ते ब्राह्मण ब्रह्मदत्तने चक्रवर्ती थयो सांभळीने धननी इच्छा करतो छतो कांपिल्य नगरे आव्यो. ॥ ५ ॥ त्यां सिंहद्वारमां प्रवेश करता ते ब्राह्मणने अरे निर्लज्ज! क्यां जाय छे ? उभो रहे उभो रहे ? एम बोलता चक्रवर्तीना द्वारपाळे रोक्यो ॥ ६ ॥ मारे अने ब्रह्मदत्तने घणाकालनी प्रीति छे, माटे हुं तेने एक वखत मलवानी इच्छा करुं छुं. एम ते

मम च ब्रह्मदत्तस्य, चास्ति प्रीतिश्चिरंतनी ॥ तमेकदा दिदृक्षेऽह–मित्युक्ते तेन सोऽब्रवदत् ॥ ७ ॥
निष्ठिता नाकिनाथाः किं, क्षीणा वा खेचरेश्वराः ॥ नरेंद्रवृंदवंद्यांघ्रि–र्यत्त्वां मित्रीयतिस्म सः ॥८॥
श्वानेनेवाभ्रमूभर्तु–र्भिल्लेनेव दिवस्पतेः ॥ तस्य षट्खंडभूपस्य, का मैत्री दुस्थ रे त्वया ॥ ९ ॥ प-
श्यन्नपि नृपानेता–नप्राप्तावसरानिह ॥ क्षुधाकरंक रेरंक, विविक्षति कथं भवान् ॥ १० ॥ एवं
निवारितस्तेन, विप्रः क्षिप्रमपासरत् ॥ सिसाधयिषुरर्थं स्वं, बुद्ध्या द्यूतापणे गतः ॥ ११ ॥ तत्र
द्यूतकृतः कूट–बुद्धीनामाकरानिव ॥ उपाचरत्ययं पाना–शनदानादिना द्विजः ॥ १२ ॥ भूमिशा-

ब्राह्मणे कह्युं एटले द्वारपाल कहेवा लाग्यो के–॥ ७ ॥ अरे ! इंद्रो शुं निर्धन थया ! अथवा विद्याधराधिपतिओ क्षीण थया ! जे राजसमूहथी वंदन करवा योग्य चरणवालो महाराजा ब्रह्मदत्त तारी साथे मित्रता धरावे छे. ॥ ८ ॥ अरे दरिद्री ! ऐरावत हाथीनी श्वाननी साथे मित्रतानी पेठे अथवा इंद्रनी भिल्लनी साथे मित्रतानी पेठे ते छ खंडना राजानी तारी साथे मित्रता शी? ॥ ९ ॥ हे क्षुधानां पात्र ! हे रांक ! अहिं तो ब्रह्मदत्त महाराजाने मलवानी वाट जोता आ बीजा राजाओने अवसर पण मलतो नथी, तो पछी तुं केम प्रवेश करवानी इच्छा करे छे ? ॥ १० ॥ ए प्रमाणे द्वारपाले निषेधेलो ते ब्राह्मण तुरत पाछो वल्यो अने बुद्धिथी पोताना अर्थने साधवानी इच्छा करतो थको जुगारीनी बजारमां गयो. ॥ ११ ॥ त्यां ए ब्राह्मण कपट बुद्धिनी खाण सरखा जुगारीनी पान भोजन विगेरेथी सेवा करवा लाग्यो ॥ १२ ॥ तुं पृथ्वी उपर सूई रहेनारा, एक कोपीन

यिषु कोपीन–वस्त्रेषु विरसाशिषु ॥ परद्रव्येकतानेषु, त्वं किमस्मासु लिप्ससे ॥ १३ ॥ तैरित्युक्तो द्विजोऽवादीत् ,सौम्यास्तां दत्थ मे मतिम् ॥ प्रागुबद्धसौहृदश्चक्री, यया संगच्छते मम ॥ १४॥ न मे वित्तं न मे मित्रं, न मे वस्त्रादिडंबरः ॥ किंतु मत्यैव युष्माक–महं द्दक्षामि चक्रिणम् ॥ १५ ॥ तेऽपि तं शिक्षयंतिस्म, ध्वजं द्विज पटच्चरैः ॥ विधायोत्तंभयेरुच्चै–रेवं द्दष्टासि भूपतिम् ॥ १६ ॥ सोऽथ संगृह्य सकला–न्युपानच्छूर्प्पवाससाम् ॥ रजोमहमहीनाथ, इव चक्रे नवं ध्वजम् ॥ १७ ॥ राजपाटिकया प्रात–र्यदा चक्री विनिर्ययौ ॥ निजं ध्वजं समुत्तभ्य, तदोच्चस्तस्थिवान् द्विजः ॥

(लंगोटी) रूप वस्त्रवाला, रस विनानुं भोजन करनारा अने पारका धननीज इच्छा करनारा अमारे विषे शुं मेलववानी इच्छा करे छे ? ॥ १३ ॥ ए प्रमाणे ते जुगारी लोकोए पूछयुं एटले ब्राह्मणे कह्युं के–हे सौम्यो ! मने तेवी बुद्धि आपो के जे बुद्धिथी पूर्वे बंधायली मित्रतावालो चक्रवर्ती मने मले ॥ १४ ॥ मारी पासे धन नथी, मारी पासे मित्र नथी, तेम मारी पासे वस्त्रादिकनो आडंबर नथी. परंतु तमारी बुद्धिथीज हुं चक्रवर्तीने मलवानी इच्छा करुं छुं. ॥ १५ ॥ पछी तेओए पण ते ब्राह्मणने शीखवाडयुं के, हे द्विज! तुं जीर्ण वस्त्र विगेरेथी ध्वजा करीने उंची बांध, एम करवाथी ब्रह्मदत्तने मली शकीश. पछी ते ब्राह्मणे जोडा सुपडा अने वस्त्रना ककडाओने एकठा करी होलीना राजानी पेठे नवीन ध्वजा करी. ॥ १७ ॥ पछी सवारे ज्यारे चक्रवर्ती रयवाडीए निकल्यो त्यारे ते ब्राह्मण पोतानी ध्वजाने उंची करीने उभो रह्यो. ॥ १८ ॥ जो के सेवा करवा आवेला

॥ १८ ॥ सेवायातनृपव्रात–ध्वजेष्वभ्रलिहेष्वपि ॥ चक्रिणो दृग् विशश्राम, तस्मिन्नेव नवे ध्वजे
॥ १९ ॥ कः केन वा कुतो हेतोः, केतुरस्त्ययमुच्छ्रितः ॥ इत्युक्ता भूभुजा भृत्याः, द्विजं प्रति
दधाविरे ॥ २० ॥ ध्वजोत्तंभनहेतुं तै–रनुयुक्तो द्विजो जगौ ॥ निदध्यासामि चक्रेशं, पूर्वमित्रं धि-
यानया ॥ २१ ॥ त्यक्त्वा गृहगृहापुत्रा–नागां यस्मै बभुव सः ॥ चक्री चक्रवतो द्राक्षा, गुल्मवद्दुर्ल-
भो मम ॥ २२ ॥ श्रुत्वेति चक्रिणः सर्वं, ते तदुक्तं न्यवेदयन् ॥ चिरोपकारिणं धैर्या–धारः सस्मार
सोऽपि तम् ॥ २३ ॥ मास्म वेलाविलंबोऽभू–त्तमानयत सत्वरम् ॥ इति भर्तुर्गिरा भृत्या–स्तं द्वि-
जन्मानमाह्वयत् ॥ २४ ॥ तमूर्त्तमिव दारिद्र्यं, समुत्सृज्य ध्वजं द्विजः ॥ दधावे विस्मयस्मेरै–र्दत्त

अनेक राजाओना पटमंडपनी ध्वजाओ आकाशमां उछली रही हती तो पण चक्रवर्तीनी दृष्टि तो तेज नवी ध्वजा उपर चोटी. ॥१९॥पछी कया पुरुषे शा कारणथी आ केवी ध्वजा उंची करी छे ? एम चक्रवर्तीए पूछेला सेवको ब्राह्मण तरफ दोडया.२० तेमणे तेने ध्वजा उंची करवानुं कारण पूछ्युं एटले ब्राह्मणे कह्युं के–आ ध्वजा उंची करवानी बुद्धिथी हुं मारा पूर्वना मित्र चक्रवर्तीने मलवानी इच्छा करुं छुं।२१।जेने माटे हुं घर स्त्री अने पुत्रने त्यजी दइ अहिं आव्यो ते चक्रवर्ती तो मने गधेडाने दराखनी पेठे दुर्लभ थई पडयो छे.।२२। ब्राह्मणनां आवां वचन सांभलीने सेवकोए ते ब्राह्मणनुं कहेलुं सर्व ब्रह्मदत्तने कह्युं. धैर्यना आधार एवा ते ब्रह्मदत्तने पण बहु वखत उपकार करनारो ते ब्राह्मण सांभरी आव्यो ॥२३॥ वेला विलंब न थाओ, तेने तुरत लावो. एवी राजानी वाणीथी सेवको तुरत ते ब्राह्मणने बोलावी लाव्या. ॥ २४ ॥ मूर्तिमंत दारिद्रना सरखी ते ध्वजाने त्यजी दइ ब्रा-

वर्मा नरेश्वरैः ॥ २५ ॥ चक्री कांचनभुषारुक्–पिंजरस्त्यक्तकुंजरः ॥ उत्पाटित इव प्रेम्णा, तमागच्छंतमभ्यगात् ॥ २६ ॥ नमतो नेत्ररोगीव, यो नः कथमपीक्षते ॥ सोऽमुं दरिद्रमभ्येति, प्रीत्या कस्येदमुच्यते ॥ २७ ॥ विज्ञापितोऽपि योऽस्माभि–र्जल्पत्यल्पं गलातवत् ॥ सोऽमुं विवक्षति स्वैरं, स्वामित्वं ह्यसमंजसम् ॥ २८ ॥ इति ध्यायत्सु भुपेषु, चक्री दत्ताशिषं द्विजम् ॥ दृढमालिंग्य चारोप्य, गर्जेंद्रमिदमालपत् ॥ २९ ॥ उपकारास्त्वया कृता, आपद्यापन्नवत्सल ॥ क्षणं मम न मुंचंति, चेतो न्यासीकृता इव ॥३०॥ अमी गजा अमी अश्वा, अमी कोशा अमूः श्रियः॥

ब्राह्मण पण विस्मयथी हसता एवा राजाओए आपेला मार्गे ब्रह्मदत्त सामे उतावलो जवा लाग्यो. ॥ २५ ॥ सुवर्णना आभूषणथी पीली कांतिवालो अने हाथी उपरथी नीचे उतरेलो ब्रह्मदत्त पण जाणे प्रेमथी उपाडेलो होयनी ? एम आवता एवा ते ब्राह्मणनी सामे चाल्यो. ॥ २६ ॥ जे नमन करता एवा अमने नेत्ररोगीनी पेठे महाकष्टथी जूए छे. ते आ चक्रवर्ति दरिद्रना सामे प्रीतिथी जाय छे. आ वात कोने कहीए ! ॥ २७ ॥ अमाराथी विनंति करायलो पण जे ब्रह्मदत्त गलुं झलायलानी पेठे थोडुं बोले छे, ते आ दरिद्रने पोतानी मरजी प्रमाणे बोलावे छे. माटे एनुं स्वामीपणुं निश्चे अयोग्य देखाय छे. २८ ॥ ए प्रमाणे बीजा राजाओ विचार करता हता एवामां चक्रवर्ती ब्रह्मदत्ते आशीष आपता एवा ते ब्राह्मणने दृढ आलिंगन करीने अने हाथी उपर बेसारीने आ प्रमाणे कहुं. ॥ २९ ॥ हे आपतिमां हितकारी ! आपत्तिमां तें करेला उपकारो चोटेलानी पेठे मारा चित्तने क्षणवार मूकता नथी. ॥ ३० ॥ आ हाथी आ घोडा आ कोश अने आ संपतिओ एमांथी तने जे

एषु स्वेप्सितमादाय, तेभ्यो मामनृणीकुरु ॥ ३१ ॥ स प्रोचे तनुतृष्णस्तं, प्राक् स्वसद्मनि भोजनम् ॥ अदीनारंभदीनारं, दक्षिणायां च देहि मे ॥ ३२ ॥ ततो भरतसीमांतं, सर्वसद्मसु दापय ॥ दक्षिणायुक्तमेकैकं, भोजनं भो जनेश्वर ॥ ३३ ॥ भुक्त्वा सर्वत्र याचिष्ये, भूयस्त्वामेव भोजनम् ॥ स्वामिन्नेवं त्वत्प्रसादा–दीषदाढयंभवं मया ॥ ३४ ॥ आः किं याचितवानेष, मयि तुष्टे नरेश्वरे ॥ यद्वांभः कियदादत्ते, वार्द्धौ क्षिप्तोऽप्युदंचकः ॥ ३५ ॥ स्वानस्तुष्टेऽपि देवेंद्रे, शश्वद्वांतं समीहते ॥ स्वचंचुपुटपूर्तिं च, शालेये फलिते द्विजः ॥ ३६ ॥ इष्टं याचति भिक्षाको, भि-

इच्छित होय ते लइने तुं ते तारा उपकारथकी मने ऋणरहित कर. ॥ ३१ ॥ पछी थोडी तृष्णावाला ते ब्राह्मणे ब्रह्मदत्तने कह्युं के-प्रथम पोतानां घरने विषे भोजन करावी दक्षिणामां शरुआतथी उत्तम एक सोना महोर मने आप. ॥ ३२ ॥ हे महाराजा ! पछी भरत क्षेत्रना सीमाडा सुधी सर्वे घरने विषे दक्षिणा सहित एकेकुं भोजन अपाव. ॥ ३३ ॥ अने हुं पण सर्व घरने विषे भोजन करी फरी तारी पासे भोजन मागीश. हे स्वामिन् । एम करवाथी तारा प्रसादने लीधे हुं थोडो धनवंत थाउं ॥ ३४ ॥ अरे ! महाराजा एवो हुं प्रसन्न थया छतां एणे आ शुं माग्युं ? अथवा तो समुद्रमां नाखेलो एवो पण घडो केटलुं पाणी लइ शके ? ॥ ३५ ॥ देवोनो राजा प्रसन्न थाय तो पण कुतरो तो निरंतर वमन करेला पदार्थोनी इच्छा करे छे, अने डांगरनुं क्षेत्र फल्युं होय तो पण पक्षी तो पोतानी चांचमां माय तेटलुंज ग्रहण करे छे. ॥ ३६ ॥ भीखारी कल्पवृक्ष पासेथी

क्षापात्रं सुरदुमम् ॥ यांचापि प्रायसः पुसां, प्रतिष्टामनुवर्त्तते ॥ ३७ ॥ आदातुं वा प्रदातुं वा, भवेन्न प्रभुरप्रभुः ॥ सरसां सूर एवेष्टे, शोषणे पोषणेऽपि वा ॥ ३८ ॥ ध्यात्वेति भुभुजाऽभोजि, विप्रः स प्राक् सदक्षिणम् ॥ अंतःपुरीसहस्त्रैश्च, चतुषष्ट्या ततः परम् ॥ ३९ ॥ ततो द्वात्रिंशता राज–सहस्त्रैः क्षात्रियैस्ततः ॥ इभ्यैः प्रकृतिभिर्द्रंग–ग्रामादिषू ततः क्रमात् ॥४०॥ सोऽयं द्विजो भारतमंदिरेषु, सर्वेषु भुक्त्वा भरताधिपस्य॥ भुंजीत भूयो भवने कदापि, भजेद्धर्मा न पुनर्नृजन्म ॥४१॥

इति प्रथमो दृष्टांतः

पण दृढ भिक्षा पात्रने मागे छे. माटे याचना पण घणुं करीने पुरुषोनी प्रतिष्ठाने (महत्त्वने) अनुसरे छे. ॥३७॥ जे समर्थ होय ते लेवामां अथवा तो आपवामां पण असमर्थ न थाय. एक सूर्यज तलावोने शोषण अथवा पोषण करवामां समर्थ छे. ॥ ३८॥ एम विचार करीने ब्रह्मदत्त राजाए ते ब्राह्मणने प्रथम दक्षिणा सहित भोजन कराव्युं. अने त्यार पछी चोसठ हजार अंतःपुरनी स्त्रीओए भोजन कराव्युं. ॥ ३९ ॥ पछी बत्रीस हजार राजाओए, पछी क्षत्रिओए, वेपारीओए, पछी अनुक्रमे देश गाम विगेरेमां प्रजाओए भोजन कराव्युं ॥ ४० ॥ ते आ ब्राह्मण सर्वे एवा भरतक्षेत्रनां घरोने विषे भोजन करीने कोइ वखते पण चक्रवर्तिनां घरने विषे फरी भोजन करे, परंतु अधर्मी एवो माणस फरी मनुष्य भव न पामे. ॥४१॥ ए प्रमाणे पहेलो दृष्टांत कह्यो.

अथ पाशकदृष्टांतः

हवे बीजो पाशकनो दृष्टांत कहे छे.

अस्त्यत्र भरतक्षेत्रे, गोल्लदेशो मनोहरः ॥ तत्राभूच्चणकग्राम–वासी चणिरिति द्विजः ॥ १ ॥
स चतुर्दशविद्याब्धि–पारदृश्वा शुभाशयः ॥ अर्हद्धर्मे दधौ स्थैर्य, सांद्रद्रुम इव द्विजः ॥ २ ॥
अन्यदा पुण्यदानेन, प्रीणयंतो जगज्जनम् ॥ इयुर्ज्ञानक्रियासत्रं, तत्र सागरसूरयः ॥ ३ ॥ स्वगृ-
हाधित्यकायां तान्, विप्रः शांतानतिष्ठिपत् ॥ अभिगमपरिणामः, प्राणिनो निर्वृताविव ॥ ४ ॥
नाम्ना चणेश्वरी तस्य, कांतासूत सूतं तदा ॥ प्ररूढदाढमाजन्म, विंध्यभूरिव सिंधुरम् ॥ ५ ॥

आ भरत क्षेत्रने विषे मनोहर गोल्ल देश छे. त्यां चणक गाममां रहेनारो चणि नामनो ब्राह्मण हतो. ॥ १ ॥ पुष्पफलवाळा मनोहर एवा वृक्षने विषे पक्षिओ जेम स्थिरता पामे तेम चौद विद्यारूप समुद्रनो पार पामेलो अने शुभ विचारवालो ते ब्राह्मण अरिहंत धर्मने विषे स्थिरता पाम्यो हतो. ॥ २ ॥ कोइ वखते ते चणक गाममां धर्मदानथी विश्वना लोकने आनंद पमाडता तेमज ज्ञान तथा क्रियानी दानशाळा समान सागर सूरि आव्या. ॥ ३ ॥ जेम प्राणिओने मोक्षमां निवास करावे तेम मनोहर परिणामवाला ब्राह्मणे शांत एवा ते मुनिओने पोतानां घरनी मेडी उपर निवास कराव्यो. ॥४॥ विंध्याचल पर्वतनी भूमि हाथीने जेम जन्म आपे तेम ते चणकनी चणेश्वरी नामनी स्त्रीये ते वखते जन्मथी आरंभीने उगेला दांतवाला पुत्रने जन्म आप्यो. ॥ ५ ॥ पछी दशमे दिवसे चाणिक्य नाम पाडेला ते पुत्रने गुरुनुं वंदन करावीने चणके गुरु पासे दाढावृत्तांत कह्युं.

कृतचाणिक्यनामानं, तनयं दशमे दिने ॥ वंदयित्वा गुरून् दाढा–वृत्तांतमभणच्च तम् ॥ ६ ॥ बालोऽयं भूपतिर्भावी–त्युक्ते श्रीगुरुणा चणिः॥ संतोषसेवधिर्गत्वा, गृहांतश्चेत्यचिंतयत् ॥ ७॥ राज्य-मुग्रनरकार्तिकारणं, राज्यमग्र्यशमसौख्यदारणम् ॥ राज्यमाज्यामिव ही प्रमेहिनां, देहिनां परिणतौ न सुंदरम् ॥८॥ जघर्ष सोऽथ तद्दाढा,बालकुंचिकया रयात् ॥ अबोध्यत च तद्वृत्तं,चणिना गणनायकः ॥९॥ गुरुः प्रोचे महाभाग,किं बालोऽयं कदर्थितः॥भाव्यं यद्यस्य तत्तस्य, भवत्येव न संशयः॥१०॥ त्वया यद्यप्यघृष्यंत, दाढा बालस्तथाप्यसौ ॥ विंबेनांतरितो भोक्ता, राज्यं प्राज्यपराक्रमः॥११॥

॥ ६ ॥ " आ बालक राजा थशे. " एम गुरुए कह्युं एटले संतोषनी मर्यादावालो चणि घरमां आवीने आ प्रमाणे विचार करवा लाग्यो के–॥ ७ ॥ राज्य ए उग्र नरकनी पीडानुं कारण छे. तेमज राज्य ए श्रेष्ठ शमतारूप सुखने विदारण करनारुं छे. वली आश्चर्य छे के–राज्य ए प्रमेहवालाने घीनी पेठे प्राणीओने परिणामे सुंदर नथी. ॥ ८ ॥ पछी चणिए ते दाढा बाला कुंचिवडे वेगथी घसी नाखी अने ते वृत्तांत तेणे सागर सूरिने कह्युं. ॥ ९ ॥ गुरुए कह्युं. हे महाभाग ! तें आ बालकने शा माटे दुःख दीधुं ? जे जेने थवानुं छे ते तेने थायज छे एमां संशय नथी. ॥ १० ॥ जो के तें दाढा घसी नाखी छे तो पण महापराक्रमी आ बालक बिंबथी ढंकायो छतां राज्यने भोगवशे. ॥ ११ ॥ पछी पिताए वृद्धि पामता ए पुत्रने सर्व कला-

पित्रा प्रवर्द्धमानोऽसौ, पाठितः सकलाः कलाः ॥ अनुरूपां द्विजकन्यां, यौवने पर्यणाय्यत ॥ १२ ॥
काले ताते दिवं याते, द्रव्यजाते गतस्पृहः॥ अपालयत् पितुः कोश–मिव संतोषमेव सः ॥ १३ ॥
अन्यदा बंधुवीवाहे, महोत्साहेन वरर्स्यति ॥ पितुर्गेहमतिस्नेहा–द्ययौ चाणिक्यगेहिनी ॥ १४ ॥
अन्या अप्याययुस्तस्याः, स्वसारः सारवैभवाः ॥ सख्यादिसहिता राज–महिष्य इव लीलया॥१५॥
ता उदुढा धनप्रौढै–रित्यतिव्याकुलैरपि ॥ मातापित्रादिभिर्गेह–मानीयंत सगौरवम् ॥ १६ ॥
अभ्यंगोद्वर्त्तनस्नान–विलेपनविभूषणैः ॥ संमान्यंते स्म ता देव्य, इव सर्वैः ससंभ्रमम् ॥ १७ ॥

ओनो अभ्यास कराव्यो, अने यौवनावस्थामां योग्य एवी ब्राह्मणनी पुत्री परणावी. ॥ १२ ॥ अवसरे पिता मृत्यु पाम्यो एटले द्रव्य समूहने विषे निस्पृह एवो ते चाणिक्य पितानो भंडार होयनी ? एम संतोषनेज पालन करवा लाग्यो. ॥ १३ ॥ कोइ वखते मोटा उत्सवथी भाईनो वीवाह थतो होवाथी चाणिक्यनी स्त्री घणा स्नेहथी पिताने घेर गई. ॥ १४ ॥ ते वखते तेनी बीजी पण उत्तम वैभववाली बहेनो,सखीओ विगेरे सहित शोभाथी जाणे राजानी पटराणी होयनी ? एवी थईने आवी हती.१५ ते बीजी बहेनो धनवंतनी साथे परणेली होवाथी तेमने अति व्याकुल एवाय पण माता पितादि स्वजनोए गौरव सहित घरे तेडावी हती.॥१६॥ शरीरे तेल चोपडवुं,स्नान करवुं.विलेपन पूर्वक आभूषण धारण करवुं. इत्यादिकथी ते बहेनोने सर्वे माणसो भ्रांतिथी देवीओना सरखी मानता हता. ॥ १७ ॥ अने चाणिक्यपत्नी निर्धन होवाथी ते बहेनोनी दासीनी पेठे दिवस रात

चाणिक्यपत्नी निःस्वेति,तैर्दासीव दिवानिशम् ॥ अकारि कर्म्म मध्यान्हे,यद्वा तद्वाप्यभोजि च॥१८॥
कल्पवल्लीषु कर्कंधु–मरालीष्विव वायसी ॥ घनश्रीकासु निःश्रीका, ददृशे सोदरीषु सा ॥ १९ ॥
पितुस्ता दिव्यवस्त्राणि, विवाहादनुलेभिरे ॥ लेभे चाणिक्यपत्नी तु, वराशिमपि कष्टतः ॥ २० ॥
बंधुभिः सह भूत्वा ताः, प्राप्यंत श्वशुरालयम् ॥ दीना केनापि सार्थेन, प्राहीयत चणिस्नुषा॥२१॥
द्रव्यप्राणपरित्यागे, सा प्राप्ता पितृमंदिरम् ॥ युक्तं दुःखाग्निना दाहे, ववले यत्तदद्भुतम् ॥ २२ ॥
पितृधिक्कारदावोष्म–तप्ता वाष्पायते स्म सा ॥ इला मिलितमेघांबु–रिव संजग्मुषी प्रियम् ॥ २३ ॥

काम करे अने मध्यान्ह वखते एठुं जुठुं जे होय ते भोजन पण करे. ॥१८॥ कल्प वेल्लोमां बोरडीनी पेठे, राज हंसीओमां कागडीनी पेठे अने धनवतींमां निर्धननी पेठे ते चाणिक्य पत्नी पोतानी बहेनोमां देखाती हती. ॥ १९ ॥ ज्यारे विवाहनी पाछल ते बहेनोने पिता तरफथी भेटमां दिव्य वस्त्रो मल्यां त्यारे वली चाणिक्यनी स्त्रीने पण एक जाडी शाडी महा कष्टथी मली. ॥२०॥ ते बहेनो पोताना बंधुओने साथे लइने सासरे गई, अर्थात् भाईओ तेमने मूकवा गया त्यारे दीन एवी ते चाणिक्यपत्नी कोइ पण साथनी संगाते पोताने सासरे गई. ॥ २१ ॥ द्रव्यरूप प्राणना नाशथी ते चाणिक्यस्त्री पिताने घरे अथवा स्मशाने प्राप्त थई हती. अर्थात् निर्धन अवस्थामां पुत्रीए पिताने घरे जवुं ए स्मशानमां जवा तुल्य छे. त्यांथी वली दुःखरूप अग्निवडे दाझ्या छतां जे पाछुं वल्वुं तेनो आश्चर्यकारक छे. ॥ २२ ॥ पिताना धिक्काररूप दावानलना तापथी तप्त थयेली ते चाणिक्यस्त्री

अस्थानव्रणवद्वक्तु–मशक्ता पितृहिलनम् ॥ भर्त्रा निर्बंधतः पृष्टा, कथंचन जगाद सा ॥ २४ ॥
ततो दध्यौ स चाणिक्यो,माणिक्योज्वलबुद्धिभूः॥ लोके श्रीरेव गौरव्या,न कुलं न कला अपि॥२५॥
आस्तां यदखिलश्रीमा–न्नरः स्याज्जगतः प्रियः॥ काष्ठं श्रीखंडनामापि, पश्य कस्य न वल्लभम् ॥ २६॥
साक्षरोऽपि सुवृत्तोऽपि, रूपवानपि रूपकः ॥ न विभाति यथा द्रव्य–हीनस्तद्वत्पुमानपि ॥ २७ ॥
पंकिलो जलनाथोऽपि, क्षारः कुग्राहभूरपि ॥ कैः सादरैर्न सेव्येत, श्रीतात इति सागरः ॥ २८ ॥

मेघ जलथी सिंचन थती पृथ्वीनी पेठे पोताना पतिने सन्मुख जती छती रोवा लागी. ॥ २३ ॥ गुप्तस्थानमां थयेला गुमडानी पेठे पिताथी थयेलुं पोतानुं अपमान कहेवाने असमर्थ छतां ते चाणिक्यस्त्रीए पतिना आग्रहथी सर्व वृत्तांत महा कष्टे पतिने कही संभळाव्यो. ॥२४॥ पछी माणिक्य समान उज्वल बुद्धिवालो ते चाणिक्य विचार करवा लाग्यो के–लोकमां लक्ष्मीज मोटाई आपनारी छे, कुल नथी अने कला पण नथी. २५ ॥ २५ ॥ जे सर्व प्रकारनी लक्ष्मीवालो माणस जगतने प्रिय थाय ते तो दूर रहो, परंतु जूओ श्रीखंड नामनुं लाकडुं पण कोने प्रिय नथी ? अर्थात् सर्वने प्रिय थाय छे. ॥ २६ ॥ विद्वान, सारा आचरणवालो अने रूपवालो एवो पण पुरुष धन विना खोटा रुपीयानी पेठे शोभतो नथी. ॥२७॥ जो के समुद्र पण कादव वालो, खारो अने घणा जलजंतुओवालो होय छे तो पण लक्ष्मीनो पिता होवाथी ते कोनावडे आदरथी नथी सेवातो ? ॥२८॥ रुद

शास्त्रोक्त्या मुखरः शमेन विधुरः स्थाम्ना पतंगोपमः, वाक्स्थैर्येण कदाग्रही ऋजुतया मूर्खो धिया धूर्तकः ॥ संतुष्ट्याप्यलसो भ्रमीव कलयाप्येवं यया वर्जितो, ध्यतोग्र्यद्गुणोऽपि हंत मनुजस्तस्यै नमोऽस्तु श्रिये ॥ २९ ॥ श्रीर्द्विजैर्याच्यया लभ्या, योग्या यांचापि मे नृप ॥ पर्जन्यवर्जमन्येभ्यो, नांभो याचेत चातकः ॥३०॥ तद्याचे पाटलीपुत्र–स्वामिनं नंदभूपतिम् ॥ वैवर्ण्यं याचकास्येषु, सुवर्णैः परिमार्ष्टि यः ॥३१॥ ध्यात्वेति सोऽगमल्लोभ–सहायः पाटलीपुरम् ॥ मनोरथरथारोह–ध्वस्तवैहारिक क्रमः ॥३२॥ सोऽविशन्मंदिरं प्रात–र्नांदमानंदमेदुरः ॥ दैवाद्दौवारिकेणापि, न वायुरिव वारितः ॥३३॥

थाय छे के, शास्त्रवचन बोलवाथी वाचाल, शमता राखवाथी विकल, बलीष्टपणाथी पतंगनी उपमावालो, बोल्युं पालवाथी कदाग्रही, सरलपणाथी मूर्ख, बुद्धिना चातुर्यपणाथी धूर्त, संतोषथी आलसु, कलाथी भ्रमवालो. एम जेना विना उत्तम गुण वालो पण माणस दूषण पमाडाय छे, ते लक्ष्मी देवीने नमस्कार थाओ. ॥ २९ ॥ ब्राह्मणो लक्ष्मीने याचनाथी मेलवे छे, मारे राजा पासे याचना करवी ते योग्य छे. कारण चातक पक्षी पण मेघ विना बीजानी पासे पाणी पण मागतो नथी. ॥३०॥ माटे पाटलीपुरना स्वामी नंदराजानी पासे याचना करुं के, जे राजा याचकनां मुखने विषे थयेली श्यामता सुवर्णथी दूर करे छे. अर्थात् याचकोने सुवर्णनां दान आपे छे. ॥ ३१ ॥ एम विचार करीने लोभनी सहायवालो अने मनोरथरूप रथउपर बेसवाथी रस्ताना थाक विनानो ते चाणिक्य पाटलीपुत्र नगरे गयो. ॥ ३२ ॥ त्यां आनंद पामेला तेणे सवारमां नंद राजाना मंदिरमां प्रवेश कर्यो. वली दैवयोगथी द्वारपाल पण वायुनी पेठे प्रवेश करता तेने रोकी शक्यो नहीं. ॥३३॥ त्यां सिंह समान पराक्रम

सिंहासनेषु नांदेषु, नवसु क्रमवर्त्तिषु ॥ आद्यं सिंहासनं सिंह—शक्तिरध्यास्त तत्र सः ॥ ३४ ॥
परिमार्ष्टुं सभां प्रात—रायाता राजकिंकरी ॥ मूलसिंहासनासीनं, द्विजं वीक्ष्य दधौ रुषम् ॥ ३५॥
उचे च रे द्विज द्वेधा, दधानो दीर्घसूत्रताम् ॥ सिंहासनेऽत्र भूभर्तु—रपि पूज्यो निषीदसे ॥ ३६ ॥
तवासनेऽत्र भेकस्य, स्वर्णांबुज इव स्थितिः ॥ न युक्तेति तया प्रोक्त—स्तत्र दंडं न्यधत्त सः ॥३७॥
भेजे सिंहासनं चान्य—त्ततोऽप्युत्थापितस्तया ॥ मुक्त्वा कमंडलुं तत्र, तत्तृतीयं स शिश्रिये ॥३८॥
पुनस्तयोत्थाप्यमानो—ऽरौत्सीत् सर्वासनानि सः ॥ पादूपवीतवैकक्षा—क्षमालाच्छत्रकैरपि ॥ ३९ ॥

वाळो ते चाणिक्य नंद राजाना अनुक्रमे गोठवी राखेला नव सिंहासनोमानां प्रथम सिंहासन उपर बेसी गयो. ॥ ३४ ॥ आ वखते सवारमां सभास्थानने वाळवा माटे आवेली दासीये मुख्य सिंहासन उपर बेठेला ब्राह्मणने जोइने क्रोध कर्यो .३५ अने कहेवा लागी के—अरे ब्राह्मण ! बे प्रकारे दीर्घसूत्रताने (जनोइ तथा दारिद्र्यने) धारण करनो एवो पण पूज्य तुं आ राजाना सिंहासन उपर बेठो छे ? ॥३६॥ सुवर्णना कमळ उपर देडकाना निवासनी पेठे आ सिंहासन उपर तारे बेसवुं योग्य नथी, एम ते दासीये कह्युं एटले चाणिक्ये ते सिंहासन उपर पोतानो दंड मूक्यो. ॥३७॥ अने पोते बीजा सिंहासन उपर बेठो. तेथकी पण दासीये उठाड्यो एटले ते बीजा सिंहासन उपर कमंडळ मूकीने ते चाणिक्य पोते त्रीजा सिंहासन उपर बेठो. ३८ वळी ते दासीये उठाडेला चाणिक्ये चांखडी, जनोई, पासे राखवानुं वस्त्र, रुद्राक्षमाळा अने छत्र विगेरेथी पण सर्व सिंहासनो रोकी दीधां. ॥३९॥

राज्याधिष्ठातृवत्तेना–क्रांते सिंहासनेऽतिमे ॥ नंदः पुरोधसा सत्रा, तत्रायासीन्नरेश्वरः ॥ ४० ॥ कोऽपि राज्ञा सहायातः, सिद्धपुत्रोऽवदत्तदा ॥ अहो आक्रम्य नंदस्य, राज्यमेष द्विजः स्थितः ॥ ॥ ४१ ॥ याहि याहीति जल्पंत्या, स्वामिदृग्ज्वलदीप्तया ॥ आशु निर्वासितो दास्या, स लेष्टुरिव संसदः ॥ ४२ ॥ यज्ञसूत्रं रुपास्फोटय, गुंजापुंजायितेक्षणः ॥ परिस्पृश्य जलं विप्रः, प्रत्यज्ञासीदिदं तदा ॥ ४३ ॥ अतिकठिनमनम्रोत्तुंगमूर्द्धानमुच्चैः, पटुकपटमुदंचत्खड्गमुत्तालसालम् ॥ अहमनुपहतौजा मंक्षु कल्पांतकाला–निल इव धरणीद्रं नंदमुत्पाटयामि ॥ ४४ ॥ अपनेया मया पूर्ण–प्र-

पछी राज्यना अधिष्ठायकनी पेठे ते चाणिक्य छेल्ला सिंहासन उपर बेठो एवामां नंदराजा पुरोहित सहित त्यां सभामां आव्यो. ॥ ४० ॥ ते वखते नंद राजानी साथे आवेलो कोइ पण सिद्ध पुत्र कहेवा लाग्यो के– अहो ! नंदराजानुं अपमान करीने आ ब्राह्मण राज्यासन उपर बेठेलो छे ! ! ! ॥४१॥ आ वखते नंदराजानी दृष्टिना बलथी देदिप्यमान थयेली अने नासी जा नासी जा एम बोलती दासीये माटीना ढेफानी पेठे सभामांथी ते चाणिक्यने तुरत काढी मूक्यो. ॥ ४२ ॥ ते वखते क्रोधथी यज्ञसूत्र (जनोइ) ने तोडी नाखी चणोठीना समूह समान राता नेत्रवाला ते ब्राह्मणे हाथमां जल लइ आ प्रमाणे प्रतिज्ञा करी के–॥ ४३ ॥ कल्पांतकालना पवननी पेठे महापराक्रमी एवो हुं अत्यंत कठीण, नम्रता रहित, उंचा मस्तकवाला, घणा कपटवाला, मोटा खड्गवाला अने उंचा घरवाला राजा नंदने शीघ्र उखाडी नाखीश. ॥ ४४ ॥ अने त्यारेज पूर्ण प्रतिज्ञावाला

तिज्ञेनेयमित्यसौ ॥ बबंध मस्तके गाढ—गर्वग्रंथिसखी शिखा ॥ ४५ ॥ यत्किंचिद्वक्ति ही क्रोधा—वे-
शादेष द्विजब्रुवः ॥ तत्किं प्रत्युच्यतेऽस्येति, क्षितीशस्तमुपेक्षत ॥ ४६ ॥ भूतिस्थाने पराभूतिं, प्राप्तो
भूपतिसद्मनि ॥ निर्गतो नगरादाशु, सोऽभिमानीति दध्यिवान् ॥ ४७ ॥ अशक्तिना प्रतिज्ञातं,
मया राभसिकेन यत् ॥ तत्समारोढुमारेभे, पंगुना मेरुभूधरः ॥ ४८॥ प्रातिज्ञा न क्रियते प्राक्, कृता
चेत्तर्हि पूर्यते ॥ अपूरितप्रतिज्ञस्य, जीवितान्मृत्युरुत्तमः ॥ ४९ ॥ एवं चिंतयतस्तस्य, तत्स्मृतं
यत्पितुः पुरः ॥ बिंबांतरितराजत्व—मस्यादिश्यत सूरिभिः ॥ ५० ॥ परिव्राजकवेषेण, बिंबं लब्धुं

मारे आ दूर करवी, एम कहीने ए चाणिक्ये पोतानां मस्तक उपर गाढ गर्वनी गांठनी सखी सरखी शिखाग्रंथी बांधी. ।४५।
"निश्चे आ जातिमात्रे जीवनारो ब्राह्मण क्रोधना आवेशथी जे कांइ कहे छे तो एने शुं उत्तर आपीए" एम विचारी राजा
नंदे तेनी उपेक्षा करी. ॥ ४६ ॥ पछी समृद्धि पामवाना स्थानरूप राजगृहने विषे पराभव पामेलो ते अभिमानी चाणिक्य
नगरथी तुरत बहार निकली आ प्रमाणे विचार करवा लाग्यो. ॥ ४७ ॥ शक्ति नहि छतां में उतावलथी जे प्रतिज्ञा करी छे,
ते पांगला माणसे मेरु पर्वत उपर चडवा जेवुं आरंभ्युं छे. ॥ ४८ ॥ प्रथम तो प्रतिज्ञा करवीज नहोती ? अने जो करी तो ते
पुरी करवी. कारण प्रतिज्ञा पूर्ण न करनारने जीववाथी मृत्यु उत्तम छे. ॥ ४९ ॥ ए प्रमाणे विचार करता ते चाणिक्यने ते
वात याद आवी, जे पितानी आगल सूरिए चाणिक्यने प्रतिबिंब अंतरित राज्य कह्युं हतुं. ॥ ५० ॥ पछी प्रतिबिंब पामवा

भ्रमंस्ततः ॥ मयुरपोषकग्रामं, सोऽगमन्नादमन्यदा ॥ ५१ ॥ संप्राप्तस्तत्र भिक्षार्थं, ग्रामाध्यक्षस्य सद्म सः ॥ अद्राक्षीदखिलदुःख–विच्छायवदनं जनम् ॥ ५२ ॥ संभावितप्रभावं तं, नत्वा ग्रामाग्रणीर्जगौ ॥ किं किं कल्याण वेत्सीति, गौरगौरवया गिरा ॥ ५३ ॥ न सा कला न सा विद्या, यां न जानात्ययं जनः ॥ एवं ग्रामाधिपस्याग्रे, गर्जन्निव जगाद सः ॥ ५४ ॥ स प्रोचे भगवन् सर्वं, संभाव्यं त्वयि तच्छृणु ॥ सेयं मे दुहिता गुर्वी, शर्वरीशं पिपासति ॥ ५५ ॥ येन केनाप्युपायेना–मुष्याः पूरय दोहदम् ॥ विपत्स्यतेऽन्यथा बाला, त्रुट्यत्तैलेव दीपिका ॥ ५६ ॥ दोहदेनैव

माटे तापसना वेषथी भमतो एवो ते चाणिक्य कोइ वखते नंद राजाना मयुरपोषक नामना गाममां गयो ॥ ५१ ॥ त्यां भिक्षाने अर्थे ग्रामाध्यक्षना घरे गयेला तेणे घणां दुःखथी निस्तेज मुखवाला माणसने दीठो. ॥ ५२ ॥ ग्रामाध्यक्षे पण संभावित प्रभाववाला ते चाणिक्यने नमस्कार करीने ' हे कल्याण ! तमे शुं शुं जाणो छो ? ' एम उज्वल गौरववाणिथी पूछयुं एटले ॥ ५३ ॥ ' तेवी कोइ कला नथी अथवा तेवी कोइ विद्या नथी के जेने आ माणस न जाणतो होय. ' एम ग्रामाध्यक्षनी आगल गर्जना करता चाणिक्ये उत्तर आप्यो. ॥ ५४ ॥ पछी ग्रामाध्यक्षे कह्युं. हे भगवन् । सर्व तमारे विषे संभवे छे तो सांभलो. आ मारी गर्भवंती पुत्री चंद्रने पीवानी इच्छा करे छे. ॥ ५५ ॥ तो जे ते उपाये करीने पण एना दोहदने पूर्ण करो. नहि तो खूटी गयेला तेलवाला दीवानी पेठे ए बाला मृत्यु पामशे. ॥ ५६ ॥ दोहदथीज ते गर्भने राज्य योग्य जाणीने

तद्गर्भे, राज्यार्हमवबुध्य सः॥ प्रमदोत्पन्नरोमांचः, प्रोवाच चणिनंदनः ॥ ५७ ॥ दत्से चेद्गर्भमेतन्मे, दोहदं पूरयामि तत् ॥ प्रायः प्रयाससाध्येऽर्थे, न बुधानां मुधादरः ॥ ५८ ॥ जनयिष्यति जीवंती, बाला बालान् बहूनपि ॥ इयं फलानि वल्लीवे–त्यंगीचक्रे स तद्वचः ॥ ५९ ॥ ततो ग्रामीणलोकेषु, साक्षीभूतेषु तत्र सः ॥ गंभीरं कारयामास, पटुधीः पटमंडपम् ॥ ५० ॥ तस्योर्द्ध्वं रंध्रमेणाक–प्रमाणेन च निर्मितम् ॥ सोऽवस्थाप्य निशि ज्योत्स्नां, तत्र बालामसूषुपत् ॥ ६१ ॥ निशीथे तत्पुरो मुक्ते, शर्कराक्षीरपूरिते ॥ सुधाकुंड इव स्थाले, संचक्राम निशामणिः ॥ ६२ ॥ सुधाभानुरिहानी-

हर्षथी रोमांचित थयेला ते चाणिक्ये कह्युं. ॥ ५७ ॥ जो ए गर्भ मने आपो तो हुं दोहद पूर्ण करुं. घणुं करीने प्रयासथी साध्य एवा अर्थने विषे डाह्या माणसोने वृथा आदर होय नहीं. ५८ ' जेम वेल फलोने प्रगट करे तेम आ बाला जीवती हशे तो घणाय पण बालकोने जन्म आपशे., एम विचारीने ते ग्रामाध्यक्षे चाणिक्यनां वचनने कबुल कर्युं. ॥ ५९ ॥ पछी गामना लोक साक्षी थया एटले चतुर बुधिवाला चाणिक्ये त्यां मोटो वस्त्रनो मांडवो कराव्यो. ॥ ६० ॥ वली ते पटमंडपना उपरना भागमां चंद्रना प्रमाण जेटलुं छिद्र कराव्युं. पछी चाणिक्ये रात्रीने विषे चंद्र ज्योत्स्नाने अंदर आववा दइने त्यां बालाने सुवारी. ॥ ६१ ॥ मध्यरात्रीने विषे तेनी आगल मूकेला अमृत कुंड समान साकर युक्त दुधथी भरेला थालमां चंद्र प्रतिबिंब पड्युं. ॥ ६२ ॥ ' हे पुत्री ! में मंत्रथी अहिं तेडावेला आ अमृतचंद्रने पी जा. ' एवां ते चाणिक्यनां वचन सांभली अपक्व निद्राने

तो, मंत्रैः पुत्र्येष पीयताम् ॥ श्रुत्वेति तद्वचोऽपक्व–निद्रया सहसोत्थिता ॥ ६३ ॥ ततस्तस्यां विधु-
धिया, धयंत्यां ससितं पयः ॥ रंध्रं पिधापयामास, चाणिसुनुः शनैः शनैः ॥ ६४ ॥ पूर्णायुर्भविता
गर्भो, नवेति ज्ञातुमभ्यधात् ॥ चाणिक्यस्तामियानिंदुः, प्रजार्थे पुत्रि मुच्यताम् ॥ ६५ ॥ सतृष्णा
नेति जल्पंती, सा चंद्रं सकलं पपौ ॥ स्वमुखाद्विषमात्तं हि, किं त्यजत्यर्द्धचर्वितम् ॥ ६६ ॥ रंध्रेऽथ
पिहिते सूची–भेद्ये तमसि विस्तृते ॥ विधुं विना जनं वीक्ष्य, विधुरं निजगाद सः ॥ ६७ ॥ मया
प्रजार्थमुत्पाद्यो, नव्य एवाथ चंद्रमाः ॥ एवं बुद्धया राजबिंबं, समासुत्र्य चचाल सः ॥ ६८ ॥ नार्थं

लीधे ते कन्या तुरत उठी. ॥ ६३ ॥ पछी ते बाला चंद्र बुद्धिथी साकर सहित दुध पीवा लागी एटले चाणिक्ये धीमे धीमे
उपरनु छिद्र ढांकी दीधुं. ॥ ६४ ॥ आ गर्भ पूर्ण आयुष्यवालो थशे के नहि ? एम जाणवा माटे चाणिक्ये ते कन्याने कह्युं
के–हे पुत्री ! प्रजाने अर्थे आदलो चंद्र मूकी दे. ' ॥ ६५ ॥ तृष्णा सहित ते बाला ना एम कहेती छती सर्व चंद्रनुं पान करी
गइ. कारण प्राप्त थयेला अने अर्द्धा चावेला पोताना मुखगत शत्रुने शुं त्यजाय खरो ? ॥ ६६ ॥ पछी पटमंडपनुं उपरनुं
छीद्र ढांकी दीधुं एटले गाढ अंधकार थयुं तेथी ते चाणिक्य चंद्र विना व्याकुल थयेला माणसोने जोइने कहेवा लाग्यो. ।६७।
हवे पछी मारे प्रजाने अर्थे नविनज चंद्रमा उत्पन्न करवो योग्य छे. एम बुद्धिथी ग्रामाध्यक्षने कहीने ते त्यांथी चाल्यो गयो.
॥ ६८ ॥ " धन विना कार्य सिद्धि न थाय " एम धारी धातुवादने जाणनारो ए चाणिक्य ज्यां धातुनी खाणो हती त्यां

विनार्थसिद्धिः स्या-दित्यसौ धातुवादवित् ॥ संचिकाय गतो धातु-विवराणि घनं धनम् ॥ ६९ ॥
निरीक्षितुं निजन्यास-माजगाम निशामुखे ॥ गोधने विशति ग्रामं, तमेव स कदाचन ॥ ७० ॥
ददर्श तत्र तं बालं-मुत्तालद्युतिमंडलम् ॥ रेणुसिंहासनासीनं, खेलंतं राजखेलनैः ॥ ७१ ॥
परीतं परितो बालैः,सामंतादिपदे स्थितैः ॥ निग्रहानुग्रहव्यग्र-मन्यायन्यायचारिषु ॥७२॥ युग्मम्॥
कल्पद्रुमायमाणं तं, याचकेषु यशस्विनम् ॥ किंचिन्मह्यं प्रदेहीति, चणिभूरप्ययाचत ॥ ७३ ॥
स्थूललक्षः शिशुस्तस्मै,सकलं गोकुलं ददौ॥ सोऽप्यवादीदिदं गृह्णा-न्मार्ये गोधनिकैर्न किम्॥७४॥

घणुं धन एकठुं करवा माटे चाल्यो गयो. ॥ ६९ ॥ पछी ते कोइ वखते पोतानी थापण रूप ते बालकने जोवा माटे संध्या वखते गायुनुं धण गाममां पेसतुं हतुं ते वखते तेज गाममां आव्यो.॥७०॥ त्यां उंचा कपाल मंडलनी कांतिवाला, धूलथी बनावेला सिंहासन उपर बेठेला, राजक्रीडाथी क्रीडा करता, चारे तरफ सामंतादि पद उपर रहेला बालकोथी विंटलायला, वली अन्याय तथा न्यायनुं आचरण करनाराने विषे निग्रह तथा अनुग्रह करवामां व्याकुल बनेला ते बालकने दीठो. ॥ ७१-७२॥ याचकोने विषे कल्पवृक्षनी पेठे आचरण करता यशस्वी ते बालकनी पासे चाणिक्ये पण 'मने कांइक आप.' एम याचना करी. ॥ मोटा विचारवाला बालके तेने सर्व गोकुल आपी दीधुं एटले चाणिक्य पण कहेवा लाग्यो के-ए सर्व ग्रहण करता एवा मने गोवालो शुं न मारे ? ॥ ७४ ॥ बालके हसीने कह्युं. अरे हीनसत्व ! भय न पाम, अने ग्रहण कर. कयो पुरुष मारुं आपेलुं

हसन् बालो जगौ हीन–सत्व मा भैर्हाण भोः॥ को व्यर्थयति मद्दत्तं, वीरभोज्या वसुंधरा ॥७५॥
वयोनुमानशौर्याभ्या–मुपलक्षयतापि तम् ॥ कोऽयामित्यर्भकः कोऽपि, पृष्टस्तेनेत्यभाषत ॥ ७६ ॥
चंद्रगुप्ताख्यया ग्राम–स्वामिनो दुहितुः सुतः॥ अर्भो गर्भगतोऽप्येष, सर्वैदत्तोऽस्ति लिंगिनः ॥७७॥
प्राप्तराज्य इव प्रीतो, चाणिक्यस्तं ततो जगौ ॥ एहि वत्स यथा कुर्वे,त्वामुर्वीशं यथातथम्॥७८॥
विश्वविश्वंभराभार–वहनोदात्तदोर्युगः ॥ अर्भस्तं निर्भयं भेजे, क्व भयं किल तादृशाम् ॥ ७९ ॥
भ्रमन् वसुमतीं तेन, समं प्राग्मेलितैर्द्धनैः ॥ अचिरेण चमुं चिक्ये, चाणिक्यश्चतुरंगिकाम् ॥८०॥

व्यर्थ करे तेम छे ? पृथ्वी तो वीरपुरुषने भोगववा योग्य छे. ॥ ८५ ॥ अवस्थाना अनुमान अने शौर्यथी ते बालकने ओलखता एवाय पण ते चाणिक्ये 'आ बालक कोण छे ?' एम पूछेला कोइ पण पुरुषे कह्युं के–॥ ७६ ॥ ए चंद्रगुप्त नामना ग्रामाध्यक्षनी पुत्रीनो पुत्र छे, ए बालक गर्भमां हतो ते वखते निश्चे सर्वेए तापसने आपी दीधो छे. ॥ ७७ ॥ पछी राज्य प्राप्त थयुं होयनी ? एम प्रसन्न थयेलो चाणिक्य ते बालकने कहेवा लाग्यो के–हे वत्स ! चाल, हुं तने साचे साचो पृथ्वीपति करुं. ॥ ७८ ॥ पछी सर्व विश्वना भारने उपाडवामां समर्थ बे भुजावालो बालक ते चाणिक्यने निर्भयपणे सेववा लाग्यो. कारण निश्चे तेवा समर्थने भय क्यांथी होय ? ॥ ७९ ॥ पछी ते बालकनी साथे पृथ्वी उपर भमता चाणिक्ये पूर्वे एकठा करेला धनथी थोडा वखतमां चतुरंगिणी सेना एकठी करी. ॥ ८० ॥ पछी तेणे चंद्रगुप्तने राजा करी अने पोते प्रधान पद

चंद्रगुप्तं नृपं कृत्वा, स स्वेनाहत्य मंत्रिताम् ॥ रुरोध नगरं नांदं, सेतुर्वारीव सारसम् ॥ ८१ ॥
नंदः सर्वाभिसारेण, नगरान्निरगान्निजात् ॥ प्रावर्त्तत मिथो युद्धं, सैन्ययोरुभयोरपि ॥ ८२ ॥
नंदस्य सुभटैरंशो-रिवांशुभिरभिद्रुता ॥ कलेव चांद्री ध्वजिनी, जनस्यादृश्यतां ययौ ॥ ८३ ॥
आरुढौ चंद्रचाणिक्या-वेकमश्वं पलायितौ ॥ न हि तौ स्वहितौ वैरि-बलाब्धावुपलायितौ ॥८४॥
पृष्ठानुपातिनं नंद-सादिनं वीक्ष्य कंचन ॥ तौ तुरंगमपि स्वाम्य-संपत्पिशुनमौज्झताम् ॥ ८५ ॥
पुरः सरस्तटे कंचि-द्रजकं चणिभूर्जगौ ॥ रे नश्य पश्य चंद्रेण, लुंट्यते नंदपत्तनम् ॥ ८६ ॥

धारण करी जेम पाली तलावना पाणीने घेरी लहे तेम नंद राजाना नगरने घेरी लीधुं. ॥ ८१ ॥ नंदराजा पण सर्वसैन्य सहित पोतानां नगरथी बहार आव्यो अने बन्ने सैन्यनुं परस्पर युद्ध चाल्युं. ॥ ८२ ॥ सूर्यना किरणोथी चंद्रकलानी पेठे नंद राजाना सुभटोए पराभव करेली चंद्रगुप्त राजानी सेना अदृश्यपणाने पामी. ॥ ८३ ॥ पछी एक अश्व उपर बेठेला चंद्रगुप्त अने चाणिक्य बन्ने नासी गया. परंतु पोताना हितकारी एवा ते बन्ने जणा शत्रुनी सेना रूप समुद्रमां पत्थर समान थया नही. अर्थात् बुडी गया नही. ॥ ८४ ॥ ते बन्ने जणाए पोतानी पाछल आवता कोइ नंदराजाना अस्वारने देखीने राज्यसंपत्तिना चाडीया रूप घोडाने पण त्यजी दीधो. ॥ ८५ ॥ वली आगल जतां तलावने कांठे चाणिक्ये कोइ धोबीने कह्युं के- अरे रजक ! नासीजा. जो चंद्रगुप्त राजा नंदराजाना नगरने लुंटे छे. ॥ ८६ ॥ तेमज सिंचाणानी पेठे चंद्रगुप्त राजाना सुभटो

स्येनैरिव निगृह्यंते, चंद्रगुप्तस्य सैनिकैः ॥ भ्रांत्वा भ्रांत्वाभितो नंद–वर्गीणाः चटका इव ॥ ८७ ॥
उज्झित्वात्मेव वासांसि, तत्याज रजकस्ततः ॥ मेने तेनोपसंख्यान–मपि भाराय नश्यता ॥ ८८ ॥
विशालनालिनीजाल–गुपिते सरसोजले ॥ चाणिकोक्तथा चटुलदृक्, चंद्रगुप्तो न्यलीयत ॥ ८९ ॥
उत्ताले स्मेरनलिने, निलीनो नलिनीवने ॥ अन्वभूद्भाविभूपोऽसौ, सदंडच्छत्रसंपदम् ॥ ९० ॥
तं चंद्रमपि पद्मिन्यो, ररक्षुरतिथिं नवम् ॥ गुणवत्यो हि नौचित्या–च्चवतेऽरिजनेऽपि ताः ॥ ९१ ॥
स्वयं तु रजकीभूय, मंत्री वासांसि धौतवान् ॥ भयार्तैर्गण्यते नैव, प्रायः कर्म विकर्म वा ॥९२॥

चारे तरफ भमी भमीने चकलाओनी पेठे नंदराजाना माणसोने पकडी ले छे. ॥ ८७ ॥ पछी जाणे आत्मा उडी जतो होयनी ? एम धोबीए वस्त्रोने त्यजी दीधां. वली नासी जता एवा तेणे वस्त्रोने गणवा ते पण भार रूप मान्युं. ॥ ८८ ॥ पछी चाणि-क्यनां वचनथी विशाल कमलीना समूहथी रक्षण करायला तलावनां जलने विषे चपल दृष्टिवालो चंद्रगुप्त राजा संताइ गयो. ॥ ८९ ॥ ते वखते मोटा पुष्ट नालवाला कमलिनीनां वनमां संताई गयेलो भावि राजा ते चंद्रगुप्त दंडसहित छत्रनी संपत्तिने अनुभववा लाग्यो. ॥ ९० ॥ कमलिनीओ पण नवीन अतिथिरूप ते चंद्रगुप्तनुं रक्षण करती हती. कारण गुणवंत एवी ते कमलिनीओ शत्रुने विषे पण उचितने नथी भूलती. ॥ ९१ ॥ वली पोते चाणिक्य मंत्री धोबी थइने वस्त्र धोवा लाग्यो. कारण भय पामेला माणसो घणुं करीने सुकार्य अथवा कुकार्यने गणता नथी. ॥ ९२ ॥ तेटलामां वादीनी पेठे शत्रुपक्षनो

तावत्तत्रायो वैरि–सादी वादीव वाक्पटुः ॥ विपक्षपक्षमुच्छेतुं, दृढहेतौ कृतश्रमः ॥ ९३ ॥
अभाषत च साक्षेपं, रे रे रजक किं त्वया ॥ नश्यंतौ चंद्रचाणिक्यौ, दृष्टौ कापि द्विषाविति॥९४॥
सोऽवदद्वेद नोदंतं, चाणिक्यस्य द्विजन्मनः ॥ राजा चंद्रः पुनर्वारि–मध्यमध्यास्य तिष्ठति ॥९५॥
श्रुत्वेति कोपकंप्रोष्ठः, प्राप्तो वैरीति संमदी ॥ तुरगादुत्तरन्नेव, तुरगीति जगाद तम् ॥ ९६ ॥
इमं हयं च खड्गं च, क्षणं धावक धारय ॥ यथा कृष्याम्यमुं नीरात्, पाठीनमिव धीवरः ॥ ९७ ॥
मनो नाश्वासिविश्वासि, वस्त्रमात्ररुचेर्मम ॥ इत्युक्ते तेन तुरगं, तरुस्कंधे बबंध सः ॥ ९८ ॥

नाश करवाने शत्रुने विषे अभ्यास करनारो वाचाल नंदराजानो अश्वार त्यां आव्यो. ॥ ९३ ॥ अने तिरस्कार पूर्वक कहेवा लाग्यो के–अरे रजक ! तें शुं नासी जता शत्रुरूप चंद्रगुप्त अने चाणिक्यने क्यां पण दीठा छे ? ॥ ९४ ॥ धोबीरूप चाणिक्ये कह्युं के–ब्राह्मण चाणिक्यना खबर हुं जाणतो नथी. वली राजा चंद्रगुप्त तो पाणीनी मध्ये संताईने रहेलो छे. ॥ ॥ ९५ ॥ एवां तेनां वचन सांभली क्रोधथी कंपता होठवालो अने "वैरी प्राप्त थयो" एम हर्ष पामतो ते अश्वार घोडा उपरथी उतरतो छतो तेने आ प्रमाणे कहेवा लाग्यो. ॥ ९६ ॥ हे धोबी ! क्षणमात्र आ घोडाने अने तरवारने झाली राख के जेम पारधी पाणीमांथी मांछलाने खेंची काढे तेम हुं एने पाणीमांथी खेंची काढुं. ॥ ९७ ॥ फक्त वस्त्रमात्रने विषे रुचिवालुं मारुं मन अश्व तथा खड्गने विषे रही शके तेम नथी. एम ते चाणिक्ये कह्युं एटले अश्वारे घोडाने झाडनी डाले बांध्यो.॥९८॥

यावद्भूमिविमुक्तासि–रसौ विशति वारिणि ॥ तेनैव तावदसिना, चाणिक्यस्तं द्विधाकरोत् ॥९९॥
एहि वत्सेति तद्वाचा, मौर्यः प्रादुरभूज्जलात् ॥ तमेव हयमारुह्य, तौ द्वावथ प्रचेलतुः ॥ १०० ॥
प्राग्वत्तमपि मुक्ताश्वं,चाणिक्यो मौर्यमभ्यधात् ॥ किमध्यायस्तदा वत्स,यदादिष्टोऽसि विद्विषः॥१०१॥
सोऽभ्यधत्त तदा तात, ध्यातवानित्यनातुरः ॥इत्थं राज्यं ममार्येण, ध्रुवं दृष्टं भविष्यति ॥ १०२ ॥
चाणिक्यश्चिंतयामास, प्राप्तराज्योऽप्यसौ मम ॥ समुल्लंघिष्यते नाज्ञां,मर्यादामिवसागरः ॥ १०३ ॥
अथ क्षुधातुरं चंद्र–गुप्तं मुक्त्वा वनांतरे ॥ विवेश कंचनग्रामं, चाणिक्यो भैक्ष्यालिप्सया ॥ १०४ ॥

पछी जेटलामां पृथ्वी उपर तरवार मूकी ते अश्वार पाणीमां पेसे छे तेटलामां चाणिक्ये तेज खड्गथी ते अश्वारने मारी नाख्यो. ॥ ९९ ॥ पछी हे वत्स ! आव, एवां ते चाणिक्यनां वचनथी चंद्रगुप्त जलथी बहार आव्यो. पछी ते बन्ने जणा तेज अश्व उपर बेसीने चाली निकल्या. ॥ १०० ॥ मार्गमां चाणिक्ये पूर्वनी पेठे ते अश्वने पण त्यजी देता मौर्य (चंद्रगुप्त) ने कह्युं के–हे वत्स ! में जे वखते ते अश्वारने कह्युं ते वखते तें शुं चिंतव्युं हतुं ? ॥ १०१ ॥ चंद्रगुप्ते कह्युं. हे तात ! त्यारे हुं अनाकुलपणे एम विचारतो हतो जे–आ प्रमाणे आ चाणिक्यथी मने राज्य निश्चे जोवायलुं थशे. अर्थात् मने राज्य मलशे. ॥ १०२ ॥ चाणिक्य विचार करवा लाग्यो के–राज्य पाम्या छतां पण समुद्र मर्यादाने न उलंघे तेम ए चंद्रगुप्त मारी आज्ञाने उल्लंघन करशे नहीं. ॥ १०३ ॥ पछी क्षुधातुर थयेला चंद्रगुप्त राजाने वनमां मूकीने चाणिक्य भोजन लेवा माटे कोइ नगरमां गयो. ॥ १०४ ॥ त्यां तेणे तुरत भोजन करवाथी भारने लीधे चालवाने पण असमर्थ एवा कोइ ब्राह्मणने

काप्यत्र लभ्यते भोज्य–मिति कंचन स द्विजम् ॥ पप्रच्छ तत्क्षणग्रस्ता–हारभारालसकम् ॥१०५॥
स स्माह गेहिनोऽमुष्य,गेहेऽद्यास्ति महोत्सवः॥ त्वमत्र लप्स्यसे भोज्य–मत्रैवाहमवालभि ॥१०६॥
आयासभीरुणा तेन, मौर्यस्यापायशंकिना । कुष्मांडवद् द्विजस्यास्यो–दरं क्षुर्या व्यदार्यत ॥१०७॥
कलशादिव तत्कुक्षेः, कृष्टा कूरकरंभकम् ॥ अविनष्टेन तेनासौ, चंद्रगुप्तमभोजयत् ॥ १०८ ॥
हतद्विजोदराकृष्ट–करंभास्वादसादरम् ॥ निःशूक इव राज्यार्हं, चाणिक्यो निश्चिकाय तम् ॥१०९॥
अथ तौ प्रस्थितौ सार्थं, कंचनग्राममियतुः ॥ चाणिक्यस्तत्र भिक्षार्थं, वृद्धाभीरीगृहं गतः ॥११०॥

" अहिं क्यांइ पण भोजन मळे छे? " एम पूछयुं. ॥ १०५ ॥ ते ब्राह्मणे कह्युं. आ ग्रहस्थनां घरने विषे आजे मोटो उत्सव छे. माटे तुं अहिं भोजन पामसे अने अहियांज हुं पण भोजन पाम्यो छुं. ॥ १०६ ॥ पछी मयासना बीकण अने चंद्रगुप्तना नाशनी शंकावाळा चाणिक्ये कोहळानी पेठे ए ब्राह्मणनां उदरने छरी वडे चीरी नाख्युं. ॥१०७॥ कळशथी काढ्या होयनी? एम ते ब्राह्मणना उदरथी चोखा अने दही काढीने नही बगडेला तेज पदार्थथी चाणिक्ये चंद्रगुप्तने भोजन कराव्युं॥ १०८ ॥ फोतरा विनाना चोखानी पेठे चाणिक्ये मरायला ब्राह्मणना उदरथी खेंची काढेला दहिना स्वादने विषे आदरवाळा ते चंद्र गुप्तने राज्य योग्य छे एवो निश्चय कर्यो. ॥ १०९ ॥ पछी ते बन्ने जणा त्यांथी चाल्या अने सांजे कोइ गाम आगळ आवी पहोंच्या. त्यां चाणिक्य भोजन माटे कोइ वृद्ध रबारणने घेर गयो. ॥ ११० ॥ ते बखते ते रबारणे तुरत चुल्हा उपरथी उता-

तया तत्कालमुत्तीर्णा, पेया हुतवहोपमा ॥ स्थाले क्षुधाकरालानां, बालानां पर्यवेष्यत ॥ १११ ॥ दृष्टा तां बालकः कोऽपि, प्रेयसीं पायसादपि ॥ दिव्यकारीव चिक्षेप, सत्वरः करमंतरा ॥ ११२ ॥ तया दग्धकरः क्रंद–न्नेवमालापि वृद्धया ॥ त्वं वत्स तुच्छधीः कस्मा–च्चाणिक्य इव चेष्टसे ॥११३॥ स्वनामश्रवणाशंकी, चाणिक्यस्तामभाषत ॥ कोऽसौ मात स्त्वयाभाणि, चाणिक्योऽस्य निदर्शने ॥ ११४ ॥ साप्युचे वत्स कोऽप्यस्ति, चाणिक्यो दैवदोषतः ॥ स स्वेनादृत्य मंत्रित्वं, चंद्रगुप्तं व्यधान्नृपम् ॥ ११५ ॥ मंत्री मंत्रविहीनोऽसौ, मेलितात्पपरिच्छदः ॥ रुरोध रभसा राज–धानीं नंदनरेशितुः ॥ ११६ ॥ ततो नंदेन निर्गत्य, तथालोडथ्यत तद्बलम् ॥ यथा खरमरुन्नुन्न–शक्तुमुष्टि

रेली अग्निना सरखी धगधगती राब भूखथी व्याकुल थयेला बालकोना थालमां पीरसी हती. ॥ १११ ॥ कोइ पण बालके खीर थकी पण वधारे वहाली ते रावने जोईने धींज करनारानी पेठे तुरत तेमां हाथ नाख्यो. ॥ ११२ ॥ हाथ दाझवाने लीधे बूमो पाडता पूत्रने ते वृद्ध माताये एम कह्युं के, हे वत्स ! तुच्छबुद्धिवालो तुं चाणिक्यनी पेठे केम आचरण करे छे ? पोतानुं नाम सांभलवाथी शंका पामेला चाणिक्ये तेने पूछयुं. हे माता !तमे आ पुत्रने दृष्टांतमां चाणिक्यनुं नाम आप्युं. ए कोण छे ? ॥ ११४ ॥ ते वृद्धा डोशीए पण कह्युं. हे वत्स ! चाणिक्य नामनो कोइ पण पुरुष छे. तेणे दैवदोषथी पोते प्रधानपद धारण करी चंद्रगुप्तने राजा बनाव्यो हतो. ॥ ११५ ॥ विचार विनाना ए मंत्रीए थोडुं सैन्य एकठुं करीने वेगथी नंदराजानी राजधानीने घेरो घाल्यो. ॥ ११६ ॥ पछी नंदराजाए पण नगरथी बहार निकलीने तेना सैन्यने तेवी रीते मथन

तुलां ययौ ॥ ११७ ॥ यद्यसौ बालिशो देशं, प्राग् व्यजेष्यत तत्सुखम् ॥ निःप्रक्षरमिवावर्त्त-मुपादास्यत तत्पुरम् ॥ ११८ ॥ तथा शिशुरसौ पूर्व-मनादायैव पार्श्वतः ॥ दग्धः किलोष्णपेयाया-गर्भ एव क्षिपन् करम् ॥ ११९ ॥ एषा वृद्धामिषाद्गोत्र-देवी मे मतिदायिनी ॥ इति तस्या वचः शिक्षा-प्रायमादाय सोऽचलत् ॥ १२० ॥ ॥ मेलयित्वा शनैः सेनां, चंद्रगुप्तान्वितोऽथ सः ॥ मित्रीयितुं शबरेशं, जगाम हिमवद्गिरिम् ॥ १२१ ॥ स श्रीदानेन मानेन, कलाभिश्च महाबलम् ॥ पल्लीशं पर्वतं तत्र, चक्रे मित्रमभंगुरम् ॥ १२२ ॥ पर्वतं सोऽन्यदावोच-देहि मित्र मया सह ॥

करी नाख्युं के, जेवी रीते महा कठोर पवनथी उडी गयेला साथवाना लोटनी मुष्टीनी उपमाने पाम्यो. ॥ ११७ ॥ जो ए मूर्खे प्रथम देशने जीत्यो होत तो सुखे तेनां नगरने बखतर विनाना घोडानी पेठे जीती सकात ॥ ११८ ॥ तेवीरीते आ बालक प्रथम पडखेथी लीधा विनाज उनी राबना मध्यमांज हाथने नाखवाथी निश्चे दाझ्यो छे. ॥ ११९ ॥ वृद्धाना मिषथी, आ गोत्र देवी मने बुद्धि आपनारी थई छे. एम विचारीने तेना शिखामण सरखां वचन ग्रहण करीने चंद्गुप्त त्यांथी चाली निकल्यो. ॥ १२० ॥ पछी धीमे धीमे सेनाने एकठी करी चंद्रगुप्त सहित ते चाणिक्य शबरपति भिल्ल राजानी साथे मित्रता करवा माटे हिमवत् पर्वत उपर गयो. ॥ १२१ ॥ त्यां तेणे लक्ष्मीना दान मान अने कलावडे महाबलवंत एवा पल्लीपति पर्वतने पोतानो अखंडित मित्र बनाव्यो. ॥ १२२ ॥ कोई वखते चाणिक्ये पर्वतने कह्युं के हे मित्र ! मारी साथे चाल, जेवी

उद्धरावो यथा नंदं, मुस्ताकंदं किरी इव ॥ १२३ ॥ तद्राज्यं च विभज्याहो–रात्रं शशिरवी इव ॥
आवां भोक्ष्यावहे मुंच, मध्येगिरिमुलूकताम् ॥ १२४ ॥ पर्वतः प्रतिपेदे त–दसंतुष्टा हि भूभुजः ॥
ततस्तौ चलितौ स्वस्व–चतुरंगचमूवृतौ ॥ १२५ ॥ तौ निर्गतौ नगान्नाकि–सिंधुसिंधुप्लवाविव ॥ देशमास्कंदतां नांदं, वर्द्धमानौ दिने दिने ॥ १२६ ॥ तयोः प्रसरतोस्तस्थु–स्ते ये वंजुलवन्नताः ॥ शेषशाखिवदामूल–मुद्धृता अनताः पुनः ॥ १२७ ॥ एकं तौ पर्यवेष्टेता–मभंगं द्रंगमन्यदा ॥
न तु तं पर्वतं मेषा–विव भेत्तुमशक्नुताम् ॥ १२८ ॥ विवेश वीक्षितुं वास्तु, परिव्राजकवेषभाक् ॥

रीते भुंड मोथना मूलने उखेडी नाखे तेम आपणे बन्ने जणा नंद राजाने उखेडी नाखीये. ॥ १२३ ॥ वली चंद्रसूर्ये रात्री दिवसने जेम वेहेंची लीधा छे तेम आपणे बन्ने जणा तेनां राज्यने वेंहेचीने भोगवीये. अने तुं पर्वतमां निवास करवारूप घुवड-पणाने त्यजी दे. ॥ १२४ ॥ पर्वते ते वात कबुल करी. कारण राजाओ असंतोषी होय छे. पछी ते बन्ने जणा पोतपोतानी चतुरंगी सेनाथी विंटलायला छता चाली निकल्या. ॥ १२५ ॥ पर्वतथी निकलेला गंगासिंधुना प्रवाहनी पेठे ते बन्ने जणा दिवसे दिवसे वृद्धि पामता छतां नंदराजाना देशने वश्य करवा लाग्या. ॥ १२६ ॥ ते बन्ने राजाना प्रयाण वखते जेओ वेतस वृक्षनी पेठे नम्र थया तेओ रह्या, वली जेओ नम्र न थया तेओ बाकीना वृक्षनी पेठे मूलथी उखडी गया. ॥ १२७ ॥ कोइ वखते ते बन्ने जणाए एक अखंडित एवा नंद राजानां नगरने घेरो घाल्यो. परंतु बकराओ पर्वतने भेदवा समर्थ न थाय तेम ते नगरने भेद करवा समर्थ थया नहीं. ॥ १२८ ॥ पछी तापसना वेशने धारण करनारो चाणिक्य गृहादिक जोवा माटे

चाणिक्यस्तत्पुरं लिंगी, ह्यनिरुद्धगमागमः ॥ १२९ ॥ स मध्येनगरं भ्राम्यन्, क्वचिदिंद्रकुमारिकाः ॥ ददर्श सुप्रातिष्ठानाः, पुर्या वज्रांगिका इव ॥ १३० ॥ आसां प्रभावतोऽभंगो, द्रंगोऽयमिति चिंतयन् ॥ उद्विग्नैश्चिररोधेन, स पौरैरित्यपृच्छयत ॥ १३१ ॥ प्रभो प्राताश्चिरात्कारा–वेश्मवासव्यथां वयम् ॥ कदा लप्स्यामहे मोक्ष–ममुष्मादरिचक्रतः ॥ १३२ ॥ एता इंद्रकुमार्यश्चे–दुध्रियतेऽधुनापि तत् ॥ पुरमुद्वेष्टयते नात्र, भ्रांतिरेता ह्यलक्षणा. ॥ १३३ ॥ खननोपक्रमेऽप्यासा–मिषद्रोधो निवर्त्स्यति ॥ तेनेत्युक्ते जनः खिन्नः, खनितुं ताः प्रचक्रमे ॥ १३४ ॥ युग्मम् ॥ मनाग्निवर्तयामास,

ते नगरमां पेठो, कारण तापसो नगरमां जवा आववाने रोकाता न हता. ॥ १२९ ॥ नगरनी मध्ये भमता एवा तेणे नगरनी वज्रांगिका रक्षिता होयनी ! एवी सारी रीते प्रतिष्ठा करेली इंद्र कुमारीका दीठी. ॥ १३० ॥ आ इंद्र कुमारीकाओना प्रभावथी आ नगर अखंडित रह्युं छे. एम विचार करता एवा ते चाणिक्यने घणा वखतना घेराथी उद्वेग पामेला नगरवासी लोकोए एम पूछयुं के–॥ १३१ ॥ ए प्रभो ! अमे घणा कालथी केदखानाना निवासनां दुःखने पाम्या छीए, तो आ शत्रुना चक्रथी अमे क्यारे मुकाइशुं. ॥ १३२ ॥ जो हवणां पण आ इंद्र कुमारीकाओ उखेडी नखाय तो आ नगरनो घेरो बंध थाय, एमां संशय नथी. कारण ए इंद्रकुमारीकाओ लक्षणरहित छे. ॥ १३३ ॥ वली ए इंद्रकुमारीकाने खोदवानो आरंभ कर्ये छते पण कांई थोडो घेरावो ओछो थशे. एम ते चाणिक्यरूप तापसे कह्युं एटले खेद पामेला लोको ते इंद्रकुमारीकाने खोदवा तैयार थया.

चाणिक्यः स्वां चमूं चरैः ॥ ततः प्रत्ययतः पौरै–रामुलं ताः समुद्धृताः ॥ १३५ ॥ ततस्तत्पुरमालोडय, लीलया चंद्रपर्वतौ ॥ स्वीकृत्य देशमक्लेशं, पाटलीपुत्रमीयतुः ॥ १३६ ॥ सर्वशक्त्या समं ताभ्यां, कुर्वन्नंदः समाह्वयम् ॥ अन्यायव्ययकारीव, त्रुटातिस्म दिने दिने ॥ १३७ ॥ अथ नंदः श्लथानंदो, वनीपक इवाशु तम् ॥ अनन्यजीवनोपायो, धर्मद्वारमयाचत ॥ १३८ ॥ चाणिक्यस्तद्ददौ तस्य, पुनरर्थी क्व तादृशः ॥ ऊचे च मागधमुखे–नेति नीतिविशारदः ॥ १३९ ॥ नंद नादास्तदा मह्यं, किंचित्त्वं कांचनार्थिने ॥ इदानीं ते ददानोऽस्मि, जीवितं प्रियजीवितम् ॥ १४० ॥ यद्रो-

चाणिक्ये पण पोतानी सेनाने गुप्तचर पुरुषो मोकली थोडी पाछी हठावी एटले पछी विश्वासने लीधे नगरवासी लोकोए ते इंद्रकुमारीकाओने मूलथी उखाडी नाखी. ॥ १३५ ॥ पछी ते पुरने लुंटीने चंद्रगुप्त अने पर्वत लीलामात्रमां क्लेशरहित देशने वश्य करी पाटलीपुर नगरे आव्या. ॥ १३६ ॥ नंद राजा पण पोतानी सर्व शक्तिथी ते बन्नेनी साथे युद्ध करतो छतो अन्याये खरच करनारानी पेठे दिवसे दिवसे तुटवा लाग्यो. ॥ १३७ ॥ पछी सिथल आनंदवाला अने जेने बीजो जीववानो उपाय नथी एवा नंद राजाए याचकनी पेठे शिघ्र ते चाणिक्य पासे धर्मद्वार (जीवितदान) माग्युं ॥१३८॥ चाणिक्ये तेने ते आप्युं. कारण तेवो याचक फरी क्यांथी मले ? वली नीतिना जाण चाणिक्ये भाटलोकनां मुखथी एम कहेवराव्युं के ॥ १३९ ॥ हे नंद ! ते वखते तें याचक एवा मने थोडुं पण सोनुं नथी आप्युं, परंतु हवणां तने प्रिय जीवितवालुं जीवित आपुं

चते तदादाय, रथेनैकेन निःसर ॥ श्रुत्वेति तद्वचो नंदः, स्वं निनिंद विधेर्वशम् ॥ १४१ ॥ चापल्यं चिंतयंल्ल क्ष्म्याः, पुत्रीमेकां प्रिये उभे ॥ सारसारं च रत्नौघ–मेकस्मिन् स रथे न्यधात् ॥ १४२ ॥ मदरिः परिणीयेमां, म्रियतामिति दुष्टधीः ॥ एकां विषकनीं रूप–खनीं गेहे मुमोच सः ॥ १४३ ॥ यामो वास्तु तवास्तु मंगलमहो सिंहासन क्षम्यताम् ॥ हे शय्यावसनासनाश्वकरिणो भूयः क्व वः संगमः ॥ कोशाः स्थास्यथ किं व्रजत्यपि मयि प्रीतिं भजध्वं प्रजाः,को युष्मानथ वर्द्धयिष्यति हहा हे हेमरूप्याचलाः ॥१४४॥ एवं प्रलपतस्तस्य, स्वर्णाद्रिध्यानतो ध्रुवम् ॥ तद्रूपमेव हृज्जात–मस्फु-

छुं, माटे तने जे रुचे ते लइने एक रथ लइ निसरी जा. आवां चाणिक्यनां वचन सांभळी नंदराजा नसीबने आधीन एवा पोताने निंदवा लाग्यो. ॥ १४१॥ पछी लक्ष्मीना चपलपणानो विचार करता ते नंदराजाए एक पुत्रीने, बे स्त्रीओने अने सारां सारां रत्नसमूहने एक रथमां भर्यां. ॥ १४२ ॥ अने " मारो शत्रु आ कन्याने परणीने मृत्यु पामो. ॥ एवी दुष्ट बुद्धिवाळा नंदराजाए रुपनी खाण समान एक विषकन्याने घरमां मूकी. ॥ १४३ ॥ अमे जइए छीये. हे घर ! तारुं मंगलिक थाओ, अहो हे सिंहासन ! तुं क्षमा करजे, हे शय्या, वस्त्र, आसन, घोडा अने हाथीओ ! तमारो मेलाप फरी क्यां थशे ? हे भंडारो! हुं जता छतां पण तमे शुं अहिं रहेश्यो ? हे प्रजाओ ! तमे प्रीतिने पामो. हे सोनारुपाना पर्वतो ! हवे तमने कोण वृद्धि पमाडशे ? ॥ १४४ ॥ ए प्रमाणे विलाप करता ते नंदराजानुं मन सुवर्ण पर्वतोनुं ध्यान करवाथी निश्चे सुवर्णरूपज थयुं. नहि तो

टिप्यन्किलान्यथा॥ १४५॥ नगरान्निर्यतस्तस्य, कृच्छ्राद्देहादिवात्मनः॥ चंद्रपर्वतयोः सेने, अभूता पार्श्वयोर्द्वयोः ॥ १४६॥ स्मरतापातुराऽपश्य–त्तदा नंदस्य नंदिनी॥ चंद्रगुप्तं चकोरीव, चंद्रमुन्निद्र लोचना॥४७॥ स्वप्रभाभंजने सूर्य–इव मौर्ये नवोदये॥ उन्मुखी साभवद्द्वेष्या,नंदस्येंदोरिवाब्जिनी४८ आः पापे कृतसंतापे,मम रज्यसि वैरिणि॥ तद्याहि याहि राज्यश्री–रिवामुं त्वमपि श्रय॥ १४९॥ एवं सा प्रीणिता रोष–रूक्षयापि पितुर्गिरा॥ अपास्य स्वं रथं लीला–गतिश्चांद्रं रथं ययौ॥१५०॥ तस्याश्चांद्ररथारोहे, भग्नाश्चक्रारका नव ॥ यद्वा भूभृद्भुवो भारो, दारुजैः किमु सह्यते॥ १५१॥

निश्चे ते फाटी जात. ॥ १४५॥ शरीरथकी आत्मानी पेठे महाकष्टे करीने नगरथकी निकलता एवा ते नंदराजाना बन्ने पडखाने विषे चंद्रगुप्त अने पर्वतनी बे सेनाओ चालवा लागी. ॥१४६॥ जेम चकोरी चंद्रने जूए तेम ते वखते कामना तापथी व्याकुल थयेली अने प्रफुल्लित नेत्रवाली नंदराजानी पुत्रीए चंद्रगुप्तने दीठो. ॥ १४७॥ पोतानी कांतिने तोडी पाडवामां नवीन उदय पामेला सूर्य समान चंद्रगुप्तने विषे प्रीति पामेली ते कन्या चंद्रने कमलीनीनी पेठे नंदराजाने अप्रीय थइ पडी. ॥१४८॥ अरे पापिणी ! संतापने करनारी ! तुं मारा शत्रुने विषे प्रीति पामे छे. तो जा ! जा !! राज्यलक्ष्मीनी पेठे तुं पण तेनो आश्रय कर. ॥ १४९॥ आ प्रमाणे क्रोधथी कठोर एवी पण पितानी वाणीथी प्रसन्न थयेली ते मनोहर गतिवाली कन्या पोतानो रथ त्यजी दइ चंद्रगुप्त राजाना रथ उपर गई. ॥ १५०॥ ते कन्या चंद्रगुप्त राजाना रथ उपर बेठी एटले ते रथना पैडाना नव आरा भांगी गया. अथवा तो राजकन्यानो भार लाकडाथी उत्पन्न थयेला पैडावडे केम सहन कराय ? ॥१५१॥

विचार्यारकभंगेना–शकुनं तां निवारयत् ॥ चंद्रो मतिमतां सीम्ना–भाणि चाणिक्यमंत्रिणा ॥१५२॥
वत्स श्रियमिवायांती–मेतां किमु निषेधसि ॥ वंश्यास्तव भविष्यंति, नूनं भग्नारका नव ॥ १५३ ॥
अथारोप्य रथं मौर्य–स्तां विवेशोदयी पुरे ॥ निःप्रभीकृत्य नंदेंदुं, व्योमनीव दिवाकरः ॥ १५४ ॥
नंद पूर्णप्रतिज्ञेन, शिखेयं मुच्यते मया ॥ इति चाणिक्यवाक् तस्य, दुखावासे ध्वजायत ॥ १५५॥
सभ्रूभंगं खलैः साध्वि–र्नीचैर्वक्रं च वैरिभिः ॥ वीक्षितः प्राचलन्नंदो, वर्षांत इव वारिदः ॥ १५६ ॥
प्रविष्टावथ तच्चंद्र–पर्वतौ नगरं रयात् ॥ धीरयंतौ प्रजा राज्य–परावर्त्तेन पिंजलाः ॥ १५७ ॥ रत्नै

आरा भांगी जवाथी पोताने अपशुकन थयेला जाणीने चंद्रगुप्ते तेने निवारी एटले महाबुद्धिवंत एवा चाणिक्य मंत्रिए तेने कह्युं. ॥१५२॥ हे पुत्र ! लक्ष्मीनी पेठे आवती एवी ए कन्याने केम ना पाडे छे ? तने भागेला आरावाला नव पुत्रो थशे. ॥१५३॥ पछी उदयवंत एवो चंद्रगुप्त राजा ते कन्याने रथ उपर बेसारी सूर्य जेम आकाशमां प्रवेश करे तेम नंदराजारूप चंद्रने निस्तेज करीने नगरमां पेठो. ॥१५४॥ हे नंद ! पूर्ण प्रतिज्ञावालो हुं आ शिखा मुकुं छुं. एवुं चाणिक्यनुं वचन ते नंदराजाना दुःखा-वासमां ध्वजारूप थयुं. ॥ १५५ ॥ खलपुरुषोए भ्रकुटी चडावीने, सत्पुरुषोए नीचुं मुख करीने अने शत्रुओए वांकुं मुख करीने जोवाएलो नंदराजा वर्षाऋतुने अंते मेघनी पेठे त्यांथी चाल्यो गयो. ॥ १५६ ॥ पछी राज्यना फेरफारने लीधे अत्यंत व्या-कुल थयेली प्रजाने धीरज आपता चंद्रगुप्त अने पर्वत ते नगरमां वेगथी पेठा ॥ १५७ ॥ तथा रत्नोथी रत्नाकर समान,

रत्नाकरप्रायं, स्वर्णैः स्वर्णाचलोपम् ॥ वैपुल्येन नभःकल्पं, प्रापतुर्नंदमंदिरम् ॥ १५८ ॥ युग्मम् ॥
तत्र नंदस्य राज्याधि-देवतामिव देहिनीम् ॥ वित्रस्तहारिणीनेत्रां, कन्यां ददृशतुः पुरः ॥ १५९ ॥
विषकन्येति चाणिक्य-स्तां विनिश्चित्य लक्षणैः ॥ तत्रानुरागिणं चंद्र-गुप्तमेवं न्यवारयत् ॥१६०॥
वत्सैका तव कन्याभू-न्मास्मभूर्लोभवान् भृशम् ॥ इयं च पर्वतस्य स्ता-दर्द्धराज्यविभागिनः ॥१६१॥
तदैवोद्वाहयामास, चाणिक्यः पर्वतेन ताम् ॥ च्छेकाः कूटप्रयोगे हि, कालक्षेपं न कुर्वते ॥ १६२॥
तस्याः पर्वतकः प्राप, संस्पर्शमशनेरिव ॥ यावत्तावत् श्लथीभूत-संधानो व्यलुठद् भुवि ॥ १६३ ॥

सुवर्ण समूहथी मेरुपर्वत समान अने विस्तारपणाथी आकाश समान नंदभुवन प्रत्ये तेओए प्रवेश कर्यो. ॥ १५८ ॥ त्यां तेमणे शरीरधारी नंदराजानी राज्याधिदेवी होइनी ? एवी त्रास पामेली हरिणी समान नेत्रवाली कन्याने दिठी. ॥१५९॥ चाणिक्ये ते कन्याने लक्षणथी आ विषकन्या छे, एवो निश्चय करीने ते कन्या उपर अनुराग धरता एवा चंद्रगुप्तने आ प्रमाणे कहीने निवार्यो. ॥ १६० ॥ हे वत्स ! तने एक कन्या थइ छे, माटे बहु लोभी न था. अने आ कन्या अर्द्धा राज्यना भागवाला पर्वतनी थाय. पछी चाणिक्ये तेज वखते पर्वतनी साथे ते कन्याने परणावी दीधी. कारणके-कपट प्रयोग करवामां चतुर पुरुषो विलंब करता नथी. ॥ १६२ ॥ पर्वतके पण जेटलामां वज्रना सरखी ते कन्यानो स्पर्श कर्यो,तेटलामां चैतन्यथी शीथील थइने पृथ्वी उपर आलोटवा लाग्यो ॥ १६३ ॥ वली हे तात चाणिक्य ! अरे भाइ चंद्रगुप्त ! हुं मरुं छुं, मरुं छुं. मारुं रक्षण

तात चाणिक्य हा भ्रात-श्चंद्रगुप्त म्रिये म्रिये ॥ रक्ष रक्षेति दुःखार्तै, बाढं क्रंदति पर्वते॥ १६४ ॥
आतितासु ऋजुश्चंद्र-गुप्तस्तस्य प्रतिक्रियाम् ॥ चाणिक्येनेति जगदे,रहः पुंरुहबुद्धिना॥१६५॥युग्मम्॥
राजनीतिं न जानासि, वत्स स्वच्छमते शृणु ॥ अर्द्धराज्यहरं भृत्यं,यो न हन्यात् स हन्यते ॥१६६॥
तायंते हंत यं हंतु-मुपाया भूरिशो नृपैः ॥ सोऽर्द्धराज्यहरो व्याधिः,स्वयं शाम्यन् मुदेऽस्तु मे॥१६७॥
विलंबं विदधेऽलीको-पक्रमैः सचिवस्ततः ॥ अचिरान्मुमुचे प्राणै-र्विलपन्नेव पर्वतः ॥ १६८ ॥
राज्ये उभे भुनक्तिस्म, चंद्रगुप्तो महिपतिः ॥ चाणिक्यश्चाभवन्मंत्री, धिया धर्षितवाक्पतिः ॥ १६९ ॥

करो, रक्षण करो. एम दुःखथी पीडा पामता पर्वते बहु बूमो पाडी एटले सरल बुद्धिवालो चंद्रगुप्त तेनो उपाय करवा लाग्यो; परंतु कठोर बुद्धिवाला चाणिक्ये एकांतमां तेने आ प्रमाणे कह्युं. १६४-१६५ हे निर्मल बुद्धिवाला पुत्र ! तुं राजनीतिने नथी जाणतो, शांभल. जे राजा अर्द्धा राज्यना भागीदार एवा सेवकने नथी मारतो ते पोतेज मराय छे. ॥१६६॥ खेद थाय छे के-जे व्याधिने नाश करवा माटे राजाओ घणा उपायो करे छे. ते अर्द्धा राज्यने हरण करनारो व्याधि पोतानी मेले शांति पामतो छतो मारा हर्ष माटे थाओ. ॥ १६७ ॥ पछी प्रधान चाणिक्ये खोटा उपचारथी विलंब लगाडी एवामां विलाप करताज पर्वते थोडा वखतमां प्राणने त्यजी दीधो. पछी चंद्रगुप्त राजा बन्ने राज्यने भोगववा लाग्यो, अने बुद्धिथी बृहस्पतिने पण जीतनारो चाणिक्य प्रधान थयो. ॥ १६९ ॥ चंद्रगुप्त राजा अने चाणिक्य प्रधान थयो, तेथी महा उद्धत एवा नंदराजाना सेवको

चंद्रे राजनि चाणिक्ये, व्यापारिणि च चक्रिरे ॥ स्वामिवैरात्पुरे चौर्यं, नंदभृत्याः सुदुर्द्धराः ॥१७०॥ कर्तुकामस्तलारक्षं, चौररक्षाक्षमं नवम् ॥ कृतवेशांतरोऽभ्राम्य–च्चाणिक्यः सकलं पुरम् ॥ १७१ ॥ जगाम नलदामाख्य–कुविंदस्य स मंदिरम् ॥ तदा च दष्टो मत्कोटै–स्तत्सुतः पितुरुचिवान् ॥१७२॥ वानं मुक्त्वा स निस्त्रिंशो, मत्कोटबिलमातलम्॥खनित्वा वन्हिदानेना–धाक्षीत्तानखिलानपि ॥१७३॥ तलारक्षत्वयोग्योऽय–मिति निश्चित्य धीनिधिः ॥ चाणिक्यो दत्तसंमानं, तं चक्रे दंडपाशिकम् ॥ १७४ ॥ जाते मयि तलारक्षे, कः पराभविताऽत्र वः ॥ तन्मुष्णित पुरं स्वैरं, स जगौ तस्करानिति

पोताना स्वामिना वैरने लीधे नगरमां चोरी करवा लाग्या. ॥ १७० ॥ आ वखते चाणिक्य चोरलोकोथी प्रजानुं रक्षण करवामां समर्थ नवीन कोटवालने करवानी इच्छावालो छतो बीजो वेष धारण करी सघला नगरमां फरवा लाग्यो ॥ १७१ ॥ कोइ वखते ते चाणिक्य फरता फरतो नलदाम नामना वणकरने घरे गयो, अने ते वखते मंकोडे करडेला ते वणकरना पुत्रे पोताने मंकोडा करडवानी वात पिताने कही. ॥ १७२ ॥ दया रहित एवा ते वणकरे पण वणवानुं काम त्यजी दइ तलीया सुधी मंकोडाना बील (दर) ने खोदी नाखी अग्निवडे सघला एवा पण ते मंकोडाने बाली नाख्या. ॥१७३॥ आ माणस कोटवालपणाने योग्य छे. एवो निश्चय करीने बुद्धिना भंडार एवा चाणिक्ये सन्मान पूर्वक ते वणकरने कोटवाल बनाव्यो. ॥ १७४ ॥ ' हुं कोटवाल थये छते अहिं तमने कोण पराभव करनार छे? माटे मरजी प्रमाणे नगरने लुंटो.' एम ते नलदाम नामना कोटवाले सघला चोरोने कह्युं. ॥१७५॥ कोइ वखते भक्तिवंत एवा ते नलदाम कोटवाले पोतानां घरनी पेठे नगरमां

॥ १७५ ॥ विश्रंभाज्जृंभमाणांस्ता–न्निजधाम्नीव पत्तने ॥ नलदामोऽखिलान् भोक्तुं, भक्तिमानन्य-
दाह्वयत् ॥ १७६ ॥ ज्वलनं सर्वतो दत्वा, विधातुं चौर्यशांतिकम् ॥ अश्नतः सकुटुंबांस्तां–न्मंत्रपूर्वं
जुहाव सः॥ १७७ ॥ संजातेऽथ पुरस्वास्थ्ये, चाणिक्योऽस्मरदन्यदा ॥ यथा ग्रामेऽहमेकत्र, प्राग्भि-
क्षामपि नाप्नुवम् ॥ १७८ ॥ क्षुल्ललेखं ततस्तत्र, स प्रैषीद्ग्रोजना इह ॥ ये चूताः संति तांश्छि-
त्वा, वंशानां क्रियतां वृतिः ॥ १७९ ॥ ग्राम्यैरचिंति लेखोऽयं, विस्मृत्याऽलेखि मंत्रिणा ॥ न ह्याम्र-
वणमुच्छिद्य, रक्ष्यंते क्वापि वेणवः ॥ १८० ॥ ध्यात्वेति चक्रे चूतानां, वंशानुच्छिद्य तैर्वृतिः ॥ तस्मा-

विश्वासथी हर्षित थता ते सघला चोरोने भोजन करवा माटे बोलाव्या. ॥ १७६ ॥ त्यां तेणे विचार पूर्वक चोरीनी शांति
करवा माटे चारे तरफथी अग्नि सलगावीने भोजन करता कुटुंब सहित ते चोरोने बाली नाख्या. ॥ १७७ ॥ हवे चोरना
उपद्रव रहित नगर शांत थयुं,एवामां कोइ दिवस चाणिक्यने सांभरी आव्युं के–हुं पूर्वे आ गाममां एक घरे भिक्षाने पण नथी
पाम्यो. ॥ १७८॥ पछी तेणे त्यां तुच्छ एवो पत्र लखीने मोकल्यो के–हे लोको ! अहिं जे आंबाना वृक्ष छे, तेमने कापी ना-
खीने तेनामडे वांशना वननी वाड करो. ॥ १७९ ॥ गामना लोकोए पत्र वांचीने विचार कर्यो के–आ पत्र मंत्रिए भूलथी
आम लख्यो छे. कारण आंबाना वनने कापी नाखी तेना वडे क्यांइ पण वांशना वननुं रक्षण कराय नही. ॥ १८० ॥ एम

द्राज्ञाविपर्यासा—च्चुकोप चणिनंदनः ॥ १८१ ॥ वंशोच्छेदफलं तेषां, वंशच्छेदं व्यधत्त सः॥बद्धद्वारेऽखिलग्रामे, वह्निदानेन निर्दयः ॥ १८२ ॥ सोऽथ मानी समानीय, निजां जायामवोचत ॥ तवैव हेतोरेतावत्, प्रियेऽहमुपचक्रमे ॥ १८३ ॥ एभिर्धनैर्घनैस्तास्ताः, पराभवदवव्यथाः ॥ क्षपयती कुरंगाक्षि, वल्लीव फलिनी भव ॥१८४॥ मयासौ दुःस्थपत्नीति, पुत्री यत्पर्यभूयत ॥ तदागः क्षम्यतामेवं, श्वसुरोऽप्येत्य तं जगौ ॥ १८५ ॥ श्वशुरस्यापरेषां च, बंधूनां स ददौ मुदा ॥ ग्रामदेशादिकं रोष—तोषौ ह्यस्य न निष्फलौ ॥ १८६ ॥ कदाचन विहारेण, पुनानाः पृथिवीतलम् ॥ तत्रैयरुर्यति

विचार करीने ते लोकोए वांशने कापी नाखी तेवडे आंबाना वृक्षोने बाड करी, अने ते आज्ञानुं विरुध आचरण करवाथी चाणिक्य कोप पाम्यो. ॥ १८१॥ अने निर्दय एवा तेणे सर्व गामना दरवाजा बंध करी अग्नि सलगावीने वांशने छेदन करवानां फल रूप तेमना वंशने छेदन करी नाख्यो. ॥ १८२॥ पछी ते अभिमानी चाणिक्ये पोतानी स्त्रीने बोलावीने कह्युं के—हे प्रिये! में ताराज माटे आटलुं बधुं कर्युं छे. ॥ १८३ ॥ हे मृगनयनी ! आ धनरूप मेघ वडे ते ते पराभवरूप दावानलनी पीडाने शांत करती एवी तुं वेलनी पेठे फलवाली था. ॥ १८४ ॥ वली ते वखते 'जे में आ पुत्री एक दरिद्रीनी स्त्री छे. एम धारी तेनो तिरस्कार कर्यो हतो ते मारो अपराध क्षमा करो.' एम चाणिक्यना ससराए पण आवीने ते चाणिक्यने कह्युं. ॥ १८५ ॥ पछी चाणिक्ये हर्षथी ससराने अने बीजा बंधुओने गाम अने देश विगेरे आप्या. कारण के ए चाणिक्यना क्रोध अने संतोष निष्फल थता न हता. ॥ १८६ ॥ कोइ वखते विहारथी पृथ्वी मंडलने पवित्र करता तेमज साधुओना समूहथी युक्त एवा वि-

व्राता–न्विता विजयसूरयः ॥१८७॥ जानंतोऽतिशयज्ञानात्, दुर्भिक्षं भावि तत्र ते ॥ स्थापयित्वा नवं सूरिं, गणं तस्मिन्निचिक्षिपुः ॥ १८८ ॥ गुरवस्तस्य निःशेषा, योगसिद्धिं ददुर्निशि ॥ संघकार्ये महत्येताः, प्रयोज्या इति भाषिणः ॥ १८९ ॥ तदेकमांजनं योगं, क्षुल्लकौ द्वौ रहःस्थितौ ॥ आदिषातां घनवृष्टौ, वार्लवं चातकाविव ॥ १९० ॥ घनागमो गुरुः प्रैषीत्, सुभिक्षं मंडलं प्रति ॥ साधुपक्षयुजं सूरिं, मानसंप्रति हंसवत् ॥१९१॥ क्षीणजंघाबलत्वेन, तस्थौ तत्रैव स स्वयम् ॥ पूरयन् पाटकावृत्त्या,नवकल्पानैकतत्रः ॥१९२॥ क्षुल्लकौ तौ गुरुस्नेहात्, पुनर्व्याघुट्य मार्गतः ॥ आगतौ

जयसूरि त्यां आव्या. ॥ १८७ ॥ ते सूरिओ ज्ञानातिशयथी त्यां थनारा दुकालने जाणता छतां नवीन सूरिने स्थापन करीने तेमने गण (गच्छ) सोंप्यो. ॥ १८८ ॥ वली ' मोटा संघकार्यमां आ योगसिद्धिनो उपयोग करवो. ' एम कहीने गुरुओए ते नवीन सूरिने सर्व योगसिद्धि रात्रीने विषे आपी. ॥ १८९ ॥ मेघवृष्टिमां चातक पक्षीओ जेम पाणिना टीपांने पामे तेम ते वखते एकांतमां रहेला बे बाल मुनिओ गुरु पासेथी एक अंजन विद्यानो योग पाम्या. ॥ १९० ॥ पछी बहु श्रुत एवा गुरुए मानस सरोवर प्रत्ये हंसने मोकले तेम सुभिक्ष देश तरफ साधुओना समूह सहित नविन सूरिने मोकल्या. ॥१९१॥ अने कपट रहित एवा गुरु पोते चालवानी शक्ति न होवाने लीधे पाडाओने फरवाथी नवकल्पने पूरता छतां त्यांज रह्या. ॥ १९२ ॥

पाटलीपुत्रं, ववंदाते गुरोः क्रमौ ॥१९३॥ गुरुस्तौ बोधयामास, वत्सौ पश्चात्किमागतौ ॥ वीक्षे स्व-
स्यापि निर्वाह—मत्राहमतिदुष्करम् ॥ १९४ ॥ दुर्भिक्षेऽत्र युवां बालौ, सोमालौ स्थास्यथः कथम् ॥
कियद्धि पल्वले तुच्छ—जले नंदंति पूतराः ॥१९५॥ तावूचतुर्विना युष्मान्, न नौ क्वचन निर्वृतिः॥
यद्भाव्यं तद्भवत्वत्र, पूज्यपादांतिकस्थयोः ॥१९६॥ तयोरिति स्नेहकिरा, गिरा भिन्नमना मनाक् ॥
स्वांतिके स्थापयामास, गुरुस्तौ जातगौरवः ॥ १९७ ॥ काले करालरूपेण, दुःकालेन व्यजृंभत ॥
कणैर्मणीयितं यत्र मणिभिश्चोपलायितम् ॥१९८॥ कोचिन्नरान् केऽपि धेनूः, स्वोदरे यत्र चिक्षिपुः॥

वली ते बन्ने बाल मुनिओए पण गुरुना स्नेहने लीधे मार्गमांथी पाछा वली पाटलीपुत्र नगरमां आवीने गुरुनां चरणमां वं-
दना करी. ॥ १९३ ॥ गुरुए तेमने पूछयुं के—हे वत्सो ! तमे पाछा केम आव्या ? हुं अहिं पोतानो पण निर्वाह थवो अति
दुष्कर देखुंछुं. ॥१९४॥ अहिं दुकालमां तमे सुकुमाल बालको केम रही सकशो ? कारण थोडा पाणीवाला तलावडामां पूराओ
केटलो वखत आनंद पामे ? ॥ १९५ ॥ पछी ते बन्ने बालमुनिओए कहुं के—तमारा विना अमने बन्नेने क्यांइ पण निवृति
(नीरांत) थइ नहीं, माटे अहिं आपना चरणनी पासे रहेला अमने जे थवुं होय ते थाओ. ॥१९६॥ तेओनी आवी स्नेह झ-
रती वाणीथी कांइक भेदायला मनवाला स्नेहवंत गुरुए ते बन्नेने पोतानी पासे राख्या. ॥ १९७ ॥ पछी अवसरे विकराल
रूपवाला दुकाले ज्यां धान्यने मणिरूप अने मणिओने पत्थररूप विस्तार्या, अर्थात् धान्य मणिओनी पेठे मोंघुं थयुं अने म-
णिओ सोंघा थया. ॥ १९८ ॥ जे दुकालमां केटलाक माणसो माणसोने, अने केटलाक माणसो पण गायोने वेची नाखवा

तद्बाष्पपूर्यमाणेऽस्मि–न्नसिधेनूश्च केचन ॥ १९९ ॥ मेघैर्मोघोदयैर्यत्र, राज्ञां राज्यानि तुत्रुटुः॥ राज्यं प्रेतपतेरेव, केवलं ववृधे तदा ॥२००॥ न कश्चिदर्थिनां यत्र,दाक्षिणाशामपुरयत् ॥ सा प्रत्युत विपेदानै-स्ततस्तैरेव पूरिता ॥ २०१ ॥ प्रक्षीणं विषयभ्रमैः क्षितितले पंकेन नोन्मीलितं, जातं नित्यघनाग-मार्थिभिरनारंभैश्चिरं कर्षकैः ॥ व्युत्सृष्टा तनयादिकेऽपि ममता लोकैस्तपःसेवितं, दुर्भिक्षस्य गुरोः प्रबोधपटुता सार्वत्रिकी काचन ॥२०२॥ उद्दीप्यतेस्म या पूर्व–मौषधैर्विविधैस्तदा॥दीप्तायाः स्वयमेवा-स्या,नाभूच्छात्यौषधं क्षुधः ॥२०३॥ यत्किंचिल्लेभिरे भैक्षं, गौरव्यं गुरवस्तदा ॥ अपत्यप्रणयान्नित्यं,

लाग्या. वली केटलाक तो ते दुकालना बाफथी पूराइ जतां पोतानां उदरमां खड्गरूप धेनुं अर्थात् तरवार नाखीने मरी जवा लाग्या. ॥१९९॥ जे दुकालमां निष्फल थयेला मेघथी राजाओनां राज्यो तुटवा लाग्या. एटलुंज नहि पण ते वखते फक्त यमराजनुंज राज्य वृद्धि पामवा लाग्युं. ॥ २०० ॥ जे दुकालमां कोइ पण ग्रहस्थ याचकोने दक्षिणाशा एटले दक्षिणा आपवानी आशाने नहोता पुरता, पण तेओएज उलटी मृत्यु पामवा वडे ते दक्षिणाशा एटले दक्षिण दिशा पुरी दीधी. ॥ २०१ ॥ पृथ्वी उपर विषय भ्रमथी क्षीण थयेलुं, कादववडे (मलिनताथी) न प्रगट थयेलुं, निरंतर मेघना अर्थी एवा आरंभ रहित खेडुतोवडे घणा काले प्रकट करायलुं, अने पुत्रादिक उपरथी पण ममता त्यजी दइ लोकोवडे तप सेवन करायुं. माटे दुकालरूपी गुरुनी सार्वजनिक एवी प्रतिबोध करवानी चतुरता कांइ जूदा प्रकारनी छे. ॥२०२॥ जे क्षुधा पूर्वे विविध प्रकारना औषधे करीने प्रगट थती हती. दुकालने वखते पोतानी मेले प्रगट थयेली ए क्षुधाने शांत करवानुं कांइ औषध न हतुं. ॥ २०३ ॥

तत्तयोः क्षुल्लयोर्ददुः ॥२०४॥ ताभ्यामाचिंतयत्पूज्या,वृद्धा देहं हि वार्द्धकम्॥ अशुश्रुषं पतत्येव,पुराण
मिव मंदिरम् ॥२०५॥ सारं ददाति नौ भिक्षं,सीदंति गुरवः स्वयम् ॥ दुर्भिक्षाब्धिरयं तार्य–स्तत्कया
बुद्धिबेडया ॥ २०६ ॥ हुं ज्ञातमांजनो योगः, सम्यक् परिचितोऽस्ति नौ॥ तेनादृश्यतनू भूत्वाऽन्यतो
भोक्षावहे क्वचित् ॥ २०७ ॥ तावथांजनमासूत्र्य, तेनादृश्यौ दिने दिने ॥ भुंजानेन समं राज्ञा, भुंजा
तेस्म सविस्मयं ॥२०८॥ एककुक्षिंभरो भक्ते, जनत्रितयभोजनात् ॥ क्षामी बभूव भूपाल–स्त्रपया
न जगौ पुनः॥२०९॥नृपं कदापि चाणिक्यो–ऽपृच्छद्वत्स कृशोऽसि किम् ॥ किं तत्राप्यस्ति दुर्भिक्षं,किं

तेवा वखतमां गुरु जे कांइ सारुं भोजन मलतुं हतुं ते पुत्रस्नेहने लीधे निरंतर ते बन्ने बालमुनिओने आपता हता. ॥२०४॥
तेथी ते बन्ने बालमुनिओए विचार्यु जे गुरुओ वृद्ध छे, निश्चे नाहे सेवा करेलुं वृद्धावस्थानुं शरीर जूनां घरनी पेठे पडी जाय
छे. ॥ २०५ ॥ गुरु आपण बन्नेने सारुं भोजन आपे छे अने पोते सीदाय छे, तो आ दुकालरूप समुद्र कइ बुद्धिरूपी होडी·
थी तरवो ?॥२०६॥ हा जाण्युं, आपणे बन्ने जणाए अंजन प्रयोग सारी रीते जाणेलो छे, माटे ते प्रयोगथी अदृश्य शरीरवाला
थइने बीजे क्यांइथी भोजन करीए. ॥२०७॥ पछी अंजन प्रयोग करीने अदृश्य शरीरवाला ते बन्ने बाल मुनिओ दिवसे दिवसे
भोजन करता एवा राजानी साथे विस्मय पूर्वक भोजन करवा लाग्या. ॥ २०८ ॥ जो के एकनुं पेट भराय एटलुं भोजनमां
त्रण माणस भोजन करवा लाग्या, तेथी राजा दुबलो थइ गयो, तो पण तेणे लज्जाथी कोइने कह्युं नहिं. ॥ २०९ ॥

वा चिंता च काचन॥११०॥ भूमानवददद्यस्वो,भुंजे प्राक्तनमात्रया ॥ परमध्रात एवाहं, ताताेत्तिष्ठामि नित्यशः॥१११॥मंत्री दध्यौ ध्रुवं सिद्धः,कोऽप्यदृश्योंजनादिना ॥ दुर्भिक्षेऽत्र हरत्यस्या–हारं हा रंकवत् क्षुधा॥११२॥भोजनावसरेऽन्येद्यु–र्भूभुजो भोजनौकसि ॥ श्लक्ष्णीकृतेष्टिकाचूर्णं, क्षेपयामास सोऽभितः ॥११३॥ सरसाहारलोभेन, प्राग्वदायातयोस्तयोः ॥ प्रेक्षांचक्रे पदश्रेणिं, स तत्र प्रतिबिंबिताम् ११४ निश्चित्यांजनसिद्धौ तौ, मंत्री धूममकारयत् ॥ बाष्पायेतेस्म तन्नेत्रे, धूमध्यामलिते रयात् ॥११५॥ धौतेंजनेऽश्रुपूरेण, चाणिक्यस्तावलोकत ॥ क्षुल्लावुभयतो भूमी–भुजं सत्वरभोजिनौ ॥ ११६ ॥

कोइ वखते चाणिक्ये चंद्रगुप्त राजाने पूछ्युं के–वत्स ! तुं दुबलो केम छे ? शुं तने पण दुकाल छे ? अथवा शुं कांइ चिंता छे ? राजा चंद्रगुप्ते कह्युं. आजकाल हुं पूर्वना सरखुं जमुं छुं, पण हे तात ! नहिं धरायेलो एवोज हुं नित्य उठीजाउं छुं.॥११॥ मंत्री चाणिक्य विचार करवा लाग्यो के–अरे ! अंजन विद्याथी अदृश्य एवो कोइपण सिद्ध निश्चे आ दुकालमां रांकनी पेठे भूखने लीधे आ राजाना आहारने हरण करे छे. ॥ १२ ॥ पछी कोइ वखते चाणिक्ये भोजन करवाना अवसरे राजाना भोजन मंदिरमां इंटनुं झीणुं करेलुं चूर्ण चारे तरफ पाथरी दीधुं. ॥ १३ ॥ वली तेणे सरस आहारना लोभथी पूर्वनी पेठे आवता एवा ते बन्ने बालमुनिओनी ते इंटना चूर्णमां पडी रहेली पगपंक्ति दीठी. ॥ १४ ॥ मंत्रीए ते बन्नेने अंजनसिद्ध निश्चय करीने धुमाडो कराव्यो, अने धुमाडाथी व्याकुल थयेला ते बन्नेनां नेत्रो तुरत आंसु युक्त थया. ॥ १५ ॥ वली आंसुना पूरथी अंजन धोवाइ गयुं एटले चाणिक्ये राजानी बन्ने पासे उतावलथी भोजन करता ते बन्ने बालमुनिओने दीठा. ॥ १६ ॥ गु-

गुरुणा मोदितौ यत्ना-च्चाणिक्येन च रोदितौ ॥ तौ जग्मतुर्गुरूपांतं, लज्जितौ नृपमंदिरात्॥११७॥
ह्री व्रतिभ्यां सह स्याद्-मिति शंकां दधन्नृपः॥ माभूच्छासनहीलेति, चाणिक्येनान्वाशिष्यते॥११८॥
वत्स किं दूयसे भूयान्, भवतो भवितोदयः ॥ एतत्ते शकुनं साधु, साधुभ्यां सह भोजिनः॥११९॥
एतौ भूपाल बालर्षी, कुमारब्रह्मचारिणौ ॥ आस्थाप्यैकत्र दुःप्रापा, द्वाभ्यां किमुतभोजनम्॥१२०॥
तत्त्वमेव पवित्रोऽसि, महांश्च महतामपि ॥ एवमालप्य भूपाल-मुपालब्ध गुरूंश्च सः ॥ १२१ ॥
बालो न दीक्ष्यते पूज्या, दीक्ष्यते वा सुशिक्ष्यते॥दुःशिक्षितौ भवच्छिष्या-वपि येनेदृशाक्रियौ ॥१२२॥

गुरुओए यत्नथी आनंद पमाडेला अने चाणिक्ये रोवरावेला ते लज्जा युक्त बन्ने बालमुनिओ राजमंदिरथी नीकलीने गुरुनी पासे गया. ॥ ११७ ॥ अरे ! में साधुओनी साथे भोजन कर्युं एवी शंकाने धारण करता राजा चंद्रगुप्तने 'शासननी हीलना न थाओ, एवा विचारथी चाणिक्ये शीखामण आपी के-॥ ११८ ॥ हे वत्स ! घणो खेद शामाटे पामे छे ? तारो उदय थशे. साधुनी साथे भोजन करनारा तने आ सारां शुकन थयां छे. ११९ ॥ हे भूपाल ! आ बन्ने बालमुनि कुमार अने ब्रह्मचारी छे, तो निश्चे तेमनी साथे एक स्थानके निवास करवो ते पण दुर्लभ छे तो पछी तेमनी साथे भोजननुं तो शुं कहेवुं!!॥१२०॥ माटे तुंज पवित्र छे अने महोटानी मध्ये पण महोटो छे. एम राजा चंद्रने कहीने पछी चाणिक्य गुरुने ठपको आपवा लाग्यो. ॥ २२१ ॥ हे पूज्यो ! बालकने दीक्षा आपवी नहीं. अथवा जो आपवी तो पछी तेमने सारी रीते शीक्षण आपवुं. कारण के दुःशिक्षित एवा तमारा शीष्यो आवां कार्य करनारा थया. ॥ २२२ ॥ जोके श्री गुरु एवा तमे आ बन्ने बालमुनिओने आ

यद्यल्पवयसोरेतां, ददुः श्रागुरवः कलाम् ॥ तन्मन्ये बालकस्नेहो, गीतार्थैरपि दुस्त्यजः ॥ १२३ ॥
गुरुर्लब्धावसरोऽवक्, समृद्धे श्रावके त्वयि॥ यद्यत्कुर्वीत नः शिष्या—श्चाणिक्य स्वल्पमेव तत्॥१२४॥
अल्पाहारौ शिशू एता—वेवं निर्वहतो यदि॥ न ते किमियता दान—कीर्तिर्नृत्यति भूतले ॥१२५॥
इह त्वां श्रावकं वीक्ष्य, दानकल्पद्रुमायितम् ॥ प्राहैष्म प्रथमं दूरे, गच्छं दुर्भिक्षसंभवे ॥ १२६ ॥
दौःस्थ्यं क्षुल्लकयोर्वीक्ष्य, स्वकार्पण्यान्न लज्जसे ॥ कुरुषे प्रत्युताक्षेप—महो तेऽमात्य धृष्टता ॥१२७॥
यद्वा श्राद्धचतुर्भङ्ग्या, अंत्यो भंगः फलेत् कथम् ॥ कृपणैर्निपुणैः शिक्षा—क्षणे युष्मादृशैर्विना॥१२८॥

कला आपी छे, तेथी हुं मानुं छुं के—गीतार्थ पुरुषोने पण बालक उपर रहेलो स्नेह दुस्त्यज छे. ॥ २३ ॥ पछी वखत मलवाथी गुरुए कह्युं. हे चाणिक्य ! तुं समृद्धिवंत श्रावक छतां अमारा शिष्यो जे जे करे छे ते थोडुंज छे. ॥ १२४ ॥ जो अल्प आहार पामता एवा आ बे बालको आवी रीते पोतानो निर्वाह करे छे तो एटलाए करीने तारी दान कीर्ति पृथ्वी उपर शुं नथी नाचती ? ॥ १२५ ॥ अहिं दान आपवामां कल्पवृक्ष समान तने श्रावकने जोइने आ दुकालना वखतमां गच्छने अमे प्रथमथीज दूर मोकल्यो छे. ॥ १२६ ॥ वली आ बन्ने बालमुनिओना दरिद्रपणाने जोइने तुं पोतानां कृपणपणाथी लाज पामतो नथी ? अने उलटो तेमनी नींदा करे छे. हे अमात्य ! आ तारी निर्लज्जता आश्चर्यकारी छे. ॥ १२७ ॥ अथवा तो शिक्षाने अवसरे श्रावकना चार भांगा मांहेलो छेलो भांगो तारा सरखा कृपण अने चतुर पुरुषो विना केम फले ? ॥१२८॥

गुरूनंचंति संपत्तौ, ये ते न प्रचुरा नराः ॥ पश्य पूर्णेन शशिना, प्रभाभंगो गुरोः कृतः ॥१२९॥
त्वं योग्योऽसीति चाणिक्य, साक्षेपमुपादिश्यते ॥वर्ण्ये सुवर्णमेव स्यात्, घनाघातैर्न पित्तला॥१३०॥
शिष्यावपि गुरुः प्राचे, युवाभ्यां किमिदं कृतम् ॥ भवंति साधवः सत्वा-भरणा मरणावधिः॥१३१॥
चूर्णभक्तं राजभक्तं, निषद्या गृहिभाजनम् ॥ अंतरायं च पंचामी, दोषाः किं नात्र वां स्मृताः॥१३२॥
स्वापराधं ततः शिष्यौ, नत्वाचिक्षमतां गुरून् ॥ मिथ्यादुःकृतमाधत्ता-मपुनष्करणेन च ॥ १३३॥
चाणिक्योऽपि गुरून्नत्वा, प्रोचे पूज्यैः समुद्धृतः ॥ पतन्नहं प्रमादांधौ, साधुशिक्षावरत्रया ॥ १३४ ॥

जेओ पूर्ण संपत्तिना अवसरमां गुरुओने पूजे छे, तेवा घणा पुरुषो नथी होता. जो, पुनमने दिवसे पूर्ण संपत्तिवाला चंद्रे पोतानो गुरु जे बृहस्पति तेनी प्रभा (कांति) नो भंग कर्यो छे. ॥ २९ ॥ हे चाणिक्य ! तुं पोते योग्य छे, एम धारीने आ प्रमाणे तिरस्कार पूर्वक तने शीखामण आपुं छुं, कारण सुवर्ण होय तेज हथोडाना घाथी उज्वल थाय छे. पित्तल उज्वल थतुं नथी. ॥ १३० ॥ पछी गुरुए बन्ने शिष्योने पण कह्युं के-तमे आ शुं कर्युं ? साधुओ मरण सुधी धैर्यरूप आभूषणने धारण करनारा थाय छे. ॥ १३१ ॥ मरी विगेरेना चूर्णने लइने खावुं, राजपींड ग्रहण करवो, सय्यातनुं अन्न लेवुं, गृहस्थनां पात्रमां खावुं अने कोइने अंतराय करीने लेवुं. आ पांच दोष अहिं तमने शुं न सांभर्यां ? ॥ १३२ ॥ पछी बन्ने शिष्योए गुरुने नमीने पोतानो अपराध खमाव्यो. वली फरी तेवो अपराध न करवावडे मिथ्यादुष्कृत दीधुं. ॥ १३३ ॥ चाणिक्ये पण गुरुने नमन करीने कह्युं के-आपे प्रमादरूप कुवामां पडता एवा मने उत्तम शीखामण आपवारूप दोरडीथी उद्धर्यो छे. ॥१३४॥

स्फुटमुक्ता गुणाधाराः, सारश्रीनायकाश्च वः ॥ न व्याहारा अमी किंतु, नव्या हाराः सतां हृदि ॥१३५॥
तत्क्षमध्वं न यच्चक्रे–साधुचिंता मया पुरा ॥ अथ प्रासुकभक्ताद्यै–रनुग्राह्यो जनो ह्ययम् ॥ १३६ ॥
पीतामृत इव प्रीतो, धाम स्वमगमत्ततः ॥ भक्तपानादिकं भक्तः, साधुभ्यः स सदाप्यदात् ॥१३७॥
नृपः कदापि मिथ्यात्वं, ययौ पाखंडिनां गिरा ॥ स हि स्वभावो जीवानां, नीचैर्गतिरिवांभसा ॥१३८॥
ततोऽस्य तातदेशीयो, जिनधर्मैकलालसः ॥ चाणिक्यः स्माह वत्सेषु, किं पाखंडिषु रज्यसे ॥१३९॥
अमी भ्रांतवदुन्मार्गा, हिमवज्जाडिमालया ॥ कुशीला हलवत्कूट–बहुलाः शैलवत्पुनः ॥ १४० ॥

वली प्रगट मुक्ताफलरूप, गुणना आधार अने उत्तम लक्ष्मीना नायक एवां आ तमारां वचनो नथी, परंतु सत्पुरुषोना हृदयने विषे नवीन हार छे. ॥ १३५ ॥ मारो ते अपराध क्षमा करो के–जे में पूर्वे साधुनी चिंता करी नथी, अने हवे निश्चे मारा उपर प्रासुक भक्तपानथी अनुग्रह करवो. ॥ १३६ ॥ पछी अमृतपान कर्यानी पेठे प्रसन्न थयेलो चाणिक्य पोताने घेर गयो. वली भक्त एवो ते निरंतर साधुओने भक्तपानादिक पण आपवा लाग्यो. ॥ १३७ ॥ कोइ वखते राजा चंद्रगुप्त पाखंडिओनी वाणीथी मिथ्यात्वपणाने पामी गयो. कारणके–पाणीनी गतिनी पेठे जीवोनो तेवो नीच स्वभाव होय छे. ॥ १३८ ॥ पछी पिता तुल्य अने जिनधर्मने विषे प्रीतिवाला चाणिक्ये कह्युं के–हे वत्स ! तुं आ पाखंडिओने विषे केम प्रीति पामे छे? ॥१३९॥ आ मिथ्यात्वीओ गांडानी पेठें उन्मार्गे जनारा छे. हिमनी पेठें जडतानां स्थान छे, हलनी पेठे वांका छे अने वली पर्वतनी पेठे बहु कूट (कपट) वाला छे. ॥ १४० ॥ हुं एओनां वृत्तांतने जाणुं छुं अने तने पण जणावीश. एम कहीने राजा चंद्र-

मयैषां ज्ञायते वृत्तं, त्वमपि ज्ञापयिष्यसे ॥ इत्युक्त्वा भूपतेर्द्धर्म्मं, वक्तुं तानाजुहाव सः ॥ १४१ ॥
समुदायेन तानेतान्, प्राक्क्षिप्तोज्वलवालुके ॥ उपांतःपुरमेकांत–स्थाने स्थापयतिस्म सः ॥१४२॥
अभ्यर्णवर्त्तिभूपाल–भामिनीभूषणक्वणैः ॥ तच्चित्तकोणे चेतोभू–श्चिरसुप्तोऽप्यजागरीत् ॥ १४३ ॥
संभूय विवशात्मानः, सर्वे ते जालकाध्वना ॥ आभूपागममैक्षंतां–तःपुरीः पामरा इव ॥ १४४ ॥
उपस्थिते नृपे बद्ध–ब ध्याना दृढासनाः ॥ स्वं स्वं धर्मं निवेद्योच्चै–रगमंस्ते यथागतम् ॥ १४५ ॥
उवाच सचिवो वत्स, पश्यताः पदपंक्तयः ॥ त्वदंतःपुरिकालोका–द्व्यंजंत्येषां सरागताम् ॥ १४६ ॥

गुरुने धर्म संभलाववा माटे चाणिक्ये ते पाखंडिओने बोलाव्या. ॥ १४१ ॥ चाणिक्ये समुदायथी ते आवेला मिथ्यात्वीओने *अंतःपुरनी समीपे प्रथमथीज नखावी राखेली उज्वल रेतीवाला एकांत स्थानमां बेसार्या.* ॥ १४२ ॥ ते वखते समीपमां रहेली राजानी स्त्रीओना झांझरना शब्दथी ते मिथ्यात्वीओनां चित्तना खूणामां घणा कालथी सूतेलो एवो पण कामदेव जागी उठयो. ॥ १४३ ॥ पछी परवश आत्मावाला ते सर्वे एकठा थइने जालीना मार्गथी राजाना आववा सुधी पामरनी पेठे अंतःपुरनी स्त्रीओने जोवा लाग्या.॥१४४॥पछी राजा त्यां आव्यो एटले बगलानी पेठे ध्यानयुक्त थयेला अने दृढ आसनवाला तेओ उत्कृष्टताथी पोतपोतानो धर्म निवेदन करीने जेम आव्या हता तेम चाल्या गया. ॥ १४५ ॥ एटले प्रधान चाणिक्ये कह्युं. हे वत्स ! जो आ पगलानी पंक्तिओ तारा अंतःपुरनी स्त्रीओने जोवाना एओना सरागपणाने प्रगट करे छे. ॥१४६ ॥

वालुकां तां समीकृत्य, तेन जैनमुनीश्वराः ॥ आकारिता द्वितीयेऽन्हि, तत्रैव विनिवेशिताः ॥१४७॥
सिद्धांते तेऽनिशं लीनाः, शुद्धांते न मनो ददुः ॥ आयातस्य च भूभर्तु–रार्हतं धर्ममुचिरे ॥ १४८ ॥
गतेषु तेषु चाणिक्य–श्चंद्रगुप्तमभाषत ॥ पश्यैतां वत्स साधूनां, पदपंक्तिर्न वीक्ष्यते ॥ १४९ ॥
अमीभिरैक्ष्यत स्त्रैणं, न तव स्ववशेंद्रियैः ॥ आत्मारामा ह्यमी रामा, गणयंति तृणोपमाः ॥१५०॥
कः काचं सति सद्रत्ने, कश्छागं सति सिंधुरे ॥ कः शमीं सति कल्पद्रौ, कः पल्लीं सति पत्तने॥१५१॥
को दास्यं सति साम्राज्ये, कः पंकं सति चंदने ॥ को मिथ्याशासनं जैने, शासने सति सेवते॥१५२॥

पछी ते रेतीने सरखी करीने प्रधान चाणिक्ये बीजा दिवसे जैन मुनीश्वरोने बोलावीने त्यांज बेसार्या. ॥ १४७ ॥ निरंतर सिद्धांतने विषे लीन थयेला तेओए अंतःपुरमां मन पण न दीधुं. अने पोतानी पासे आवेला राजाने अरिहंतनो धर्म संभलाव्यो. ॥ १४८ ॥ पछी ते जैनमुनिओ गया एटले चाणिक्ये चंद्रगुप्तने कह्युं के–हे वत्स ! आ रेतिने जो, एनी मध्ये साधुओना पगलानी पंक्ति देखाती नथी. ॥ १४९ ॥ इंद्रियोने पोताना वश राखनारा आ मुनिओए तारी स्त्रीयोना समूहने जोयो नथी. कारणके पोताना आत्माने विषे रमनारा ए मुनिओ स्त्रीयोने तृणना सरखी गणे छे.॥१५०॥ उत्तम रत्न पासे छतां कोण काचने सेवे? गजराज घरे छतां कोण बकराने खरीदे? कल्पवृक्ष आंगणे छतां कोण खीजडीने वावे? नगर समीपे छतां कोण पल्लीमां निवास करे? साम्राज्यपद प्राप्त थया छतां कोण दासपणुं करे ? चंदन पासे छतां कोण कादवनो लेप करे? अने जैन शासन विद्यमान छतां कोण मिथ्याशासन (मिथ्यात्व) ने सेवे? ॥१५१–१५२॥ पछी जूठा लिंगिओने विषे खेद पामेलो ते

ततो भूमान् सनिर्वेदः, स व्यलीकेषु लिंगिषु ॥ लाक्षाराग इवोर्णायां, स्थिरोऽभूज्जिनशासने॥१५३॥
निशीव पद्मकोशोऽभू-त्कोशो भूमीभुजोऽन्यदा ॥ निःश्रीकः श्रीकरीबुद्धिं, चाणिक्योऽथ विचिंतयत्॥१५४॥
इभ्यानाहूय वास्तव्यान्, भक्त्या भोजयतिस्म सः ॥ आमिषं धीवराणां हि, मुखमन्यवशीकृतेः ॥१५५॥
आविःकुर्वंत्यमी मत्ताः, स्वसत्तामिति चिंतयन् ॥ मैरेयं पाययित्वा तां-श्चाणिक्यः प्रोचिवानिति ॥१५६॥
त्रिदंडं द्वे च काषाये, वस्त्रे कांचनकुंडिका ॥ नित्यं नृपोऽस्ति मे वश्यो, भंभां वादयतात्र भोः॥१५७॥
तच्छ्रुत्वा गर्वमूर्च्छालाः, सर्वे हालाबलाज्जगुः॥ किं रे हृप्यसि भिक्षाक, शृण्वस्माकमहो धनम् ॥१५८॥

चंद्रगुप्त राजा ऊनने विषे लाखना रंगनी पेठे जिनशासनने विषे स्थिर थयो. ॥ १५३ ॥ कोइ वखते राजा चंद्रगुप्तनो भंडार रात्रीने विषे पद्मकोशनी पेठे लक्ष्मी रहित थयो एटले पछी चाणिक्य लक्ष्मी वधारनारी बुद्धिने चिंतववा लाग्यो. ॥१५४॥ पछी तेणे नगरमां रहेनारा वेपारीओने बोलावीने प्रीतिथी भोजन कराव्युं.कारणके पारधीओने मांस अने बीजाओने वश करनारु मुख छे. ॥ १५५ ॥ आ वेपारीओ मत्त (केफ विगेरेथी व्याकुल) थया छतां पोतानी संपत्ति प्रगट करे छे. एम विचारता एवा ते चाणिक्ये ते वेपारीओने मदिरा पाइने पछी तेमने आ प्रमाणे कह्युं. ॥ १५६ ॥ त्रण दंड, बे कषाय वस्त्र, अने सुवर्ण कुंडिका तथा राजा निरंतर मारे वश्य छे, माटे हे लोको ! तमे अहिं भंभाने वगाडो. ॥१५७॥चाणिक्यनां तेवां वचन सांभली अहंकारमां घेराइ गयेला ते सर्वे वेपारीओ मदिराना केफथी कहेवा लाग्या, अरे भिक्षुक ! तुं शुं गर्व करे छे ? आश्चर्यकारी अमारुं धन सांभल. ॥ १५८ ॥ एक हजार योजन सुधी जता एवा गजराजना पगले पगले हुं लाख लाख सोना महोर मूकुं

सहस्रं योजनानीभ–पतेर्यातः पदे पदे ॥ दीनारलक्षं मुंचामि, भंभां वादयतात्र भोः ॥ १५९ ॥
तिलाढकस्य सद्वृष्ट्या, निष्पन्नस्य तिले तिले ॥ दीनारलक्षं मुंचामि, भंभां वादयतात्र भोः॥१६०॥
एकाहम्रक्षणैर्बध्वा, सेतुः प्रावृट्भरोद्भवम् ॥ वालयामि सरित्पूरं, भंभां वादयतात्र भोः ॥ १६१ ॥
एकाहजातजात्याश्व–किशोरस्कंधकुंतलैः ॥ करोमि मंडपं व्योम्नि, भंभां वादयतात्र भोः ॥ १६२ ॥
शालिप्रसूतिगर्दभ्यो, सदा क्षेत्रे उभे मम ॥ च्छिन्नच्छिन्नप्ररूढे स्तो, भंभां वादयतात्र भोः ॥१६३॥
शुक्लवासाः ससौरभ्यो, भक्तभार्य ऋणोज्झितः॥साहस्त्रिकोऽप्रवास्यस्मि, भंभां वादयतात्र भोः॥१६४॥

छुं, हे लोको ! अहिं तमे भंभा वगाडो. ॥१५९॥ चार शेर तलने वाव्यार्थी सारी वृष्टिवडे तेमांथी जेटला तल उत्पन्न थाय ते दरेक तले तले हुं लाख लाख सोना महोर मुकुं छुं. माटे हे लोको ! तमे अहिं भंभाने वगाडो. ॥१६०॥ एक दिवसना मांखणथी पाली बांधीने वर्षाऋतुना समूहथी उत्पन्न थयेला नदीना पूरने हुं वालुं छुं, माटे हे लोको ! तमे अहिं भंभाने वगाडो ॥१६१॥ एक दिवसना जन्मेला जातिवंत अश्वना बच्चाना स्कंध उपर रहेला केशवडे आकारमां मांडवो करुं छुं, माटे हे लोको ! तमे अहिं भंभाने वगाडो. १६२ कमोद अने धोली गोकर्णि ए बन्ने निरंतर मारा क्षेत्रमां जूदा जूदा उगेला छे, माटे हे लोको ! तमे अहिं भंभाने वगाडो. १६३ उज्वल वस्त्रवालो, सुगंधतावालो, भक्तिवंत भार्यावालो, ऋण रहित अने हजारोना परिवारवालो हुं परदेश जतो नथी, माटे हे लोको ! तमे अहिं भंभाने वगाडो. ॥ १६४ ॥ ए प्रमाणे तेओए अनुक्रमे कहेलुं चाणिक्ये पटमां लखी लीधुं. कारण लखेलुं

इति तेषां क्रमेणोक्तं, चाणिक्यश्चीरकेऽलीखत् ॥ दृषल्लेखेव लिखितं, न विपर्येति जातुचित् ॥१६५॥
व्यावृत्तचेतनांस्तान् स, यथोचितमयाचत ॥ परं पुष्पमिवादुन्वन्, स्वार्थकृद्भृंगवद्बुधः ॥ १६६ ॥
एकयोजनगामीभ–पदमित्यादिमो धनम् ॥ द्वैतीयीकः पुनश्चैक–तिलोद्भवतिलैर्मितम् ॥ १६७ ॥
एकाहमृक्षणं चान्य–स्तुर्यश्चैकान्हिकान् हयान् ॥ पंचमो मासिकं धान्यं, ददे चैतेषु मंत्रिणः॥१६८॥
अरुणो वारुणीयोगात्, सर्वथा विवसुर्भवेत् ॥छुटिताः स्मो वयं स्तोका–दिति ते दध्युरुन्मदाः॥१६९॥
एवं कोशं कुशूलं च, धनैर्धान्यैश्चमुं हयैः ॥ भूपस्यापूर्य चाणिक्यः, स्वं कृतार्थममन्यत ॥ १७० ॥

पत्थरमां कोचेलानी पेठे क्यारे पण फरतुं नथी. ॥ १६५ ॥ पछी चाणिक्ये सावध चैतन्यवाला थयेला तेओनी पासे योग्यता प्रमाणे याचना करी. कारण पुष्पने नहि किलामणा पमाडता भमरानी पेठे डाह्या माणसो स्वार्थने साधनारा होय छे.॥१६६॥ पहेलाए एक योजन सुधी गति करता हाथीना पगला प्रमाणे धन आप्युं, अने वली बीजाए एक तलथी उत्पन्न थयेला तल प्रमाणे धन आप्युं. त्रीजाए एक दिवसनुं माखण, अने चोथाए एक दिवसना अश्वो अने पांचमाए एक मासनुं धान्य आप्युं– अने मंत्रीए तो एमने वारुणी (मदिरा) आपी हती. ॥ ६७–६८ ॥ सूर्य पण वारुणी (पश्चिम दिशा) ना योगथी सर्व प्रकारे तेज रहित थाय छे. वली आपणे थोडाथी छुट्या छीए,एम ते वेपारीओ पण हर्ष पामता छता विचारता हता. ॥१६९॥ चाणिक्य ए प्रमाणे राजा चंद्रगुप्तना भंडारने धनथी, कोठारने धान्यथी अने सेनाने अश्वोथी भरपुर करीने पोताने कृतार्थ मानवा लाग्यो. ॥ १७०॥ वली काले करीने राजानो भंडार खाली थवा लाग्यो एटले ते वखते बीजो उपाय चिंतवीने प्रधाने

काले कृशेषु कोशेषु, पुनर्जातेषु भूभुजः ॥ उपायांतरमासूत्र्य, मंत्रीभ्यानाह्वयत्तदा ॥ १७१ ॥
बभूवुर्देवता दौस्थ्य--नाशकास्तस्य पाशकाः ॥ तानुपादाय दायज्ञः, स महेभ्यानरीरमत् ॥ १७२ ॥
पुरतः प्रस्फुरद्रत्न--जालं स्थालं विमुच्य सः ॥ उवाचेदं स गृह्णातु, यो जयत्येकदापि माम् ॥१७३॥
जयामि यमहं तेन, देयो दीनार एव मे ॥ ततो लोभाद्दीव्यंस्ते, न पुनस्तं विजिग्यिरे ॥१७४॥
प्रतिदायमुपादाय, तेभ्यो दीनारमेव सः ॥ बभार श्रीगृहं किं न, बिंदुभिर्भ्रियते सरः ॥ १७५ ॥
आप्तेषु दिव्येष्वपि पाशकेषु,जीयते मंत्री धनिभिः कदापि ॥ विरुद्धधर्मा न पुनर्मनुष्यो, भवाच्युतो मानुषतां लभेत ॥ १७६ ॥

वेपारीओने बोलाव्या ॥ १७१ ॥ ते वखते दारिद्रयने नाश करनारा देवता तेना पासा थया.ते पासाने लइ दावने जाणनारो मंत्री ते वेपारीओने जुगार रमाडवा लाग्यो. ॥ १७२ ॥ तेणे पोतानी आगल देदीप्यमान रत्नोथी भरेला थालने मूकीने कह्युं के--जे मने एकवार पण जीते ते आ थालने गृहण करो. ॥ १७३ ॥ अने हुं जेने जीतुं तेणे मने एक सोना मोहोरज आपवी. पछी लोभथी वेपारी रमवा लाग्या, परंतु तेने कोई जींती शक्यो नहीं. ॥ १७४ ॥ चाणिक्ये ए प्रमाणे दरेक दावमां ते वेपारीओ पासेथी एक एक सोना मोहोरज लइने राजानो भंडार भरी दीधो.कारण टीपे टीपे करीने सरोवर शुं न भराय? अर्थात् भराय. ॥ १७५ ॥ दिव्य एवा पण ते पासाने गृहण करी कदापि कोइ धनवंत पुरुषो मंत्रीने जीते, पण विरुद्ध धर्मनुं आचरण करनार कोइ पण मनुष्य मनुष्यभवथी चवीने फरी मनुष्यपणाने पामे नहीं. ॥ १७६ ॥ इति द्वितीय दृष्टांतः

अथान्नराशिदृष्टांतः

सर्वत्र भारते वर्षे, वर्षेऽभोदस्य भूयसि ॥ जायंते यानि धान्यानि, संमान्यानिलयोगतः ॥ १ ॥
तान्येकत्र सुरो राशी–कृत्य कुर्यात्तथा शिखाम् ॥ यथोपरि चरान्निंदुः, क्षणं रजतकुंभति ॥ २ ॥
तत्रैकः सर्षपप्रस्थः, क्षिप्त्वा मिश्रीकृतस्तथा ॥ यथाभूद्दुर्लभः सर्व–पूर्वगुप्तैकमंत्रवत् ॥ ३ ॥
वयसः परिपाकेन, धनुर्यष्टिरिवानता ॥ वाताधिक्येन वल्लीव, प्रचलत्पाणिपल्लवा ॥ ४ ॥
रोमभिः पलितैः शुष्क–तृण भूमिविलंबिनी ॥ निर्दंतास्यतुलारुढ–निष्कुलीकृतदाडिमा ॥ ५ ॥
अमावासीकृताशेष-तिथिर्नेत्रबलं विना ॥ आसन्नमृत्युरायासी-ज्जरती तत्र काचन ॥६॥ त्रिभिर्विशेषकं॥

सर्व भरत क्षेत्रने विषे घणो वर्षाद वर्षे छते उत्तम प्रमाणवाला वायुना योगथीं जेटलां धान्यो उत्पन्न थाय.॥१॥ कोइ देवता ते धान्यनो एक ढगलो करींने तेनी एवीं शग करे के–आकाशमां फरतो चंद्र क्षणमात्र तेना उपर रूपाना घडानीं उपमाने पामे. २ ते ढगलामां एक प्रस्थ (शेर) शर्षव नाखींने तेवी रींते मेलवीं देवा के जेवीं रींते सर्वे पूर्वोमां संताडी राखेला मंत्रनीं पेठे फरी मेलववा दुर्लभ थाय. ॥ ३ ॥ अवस्थाना परिपाकथीं धनुष्यनी लाकडींनी पेठे नमी गयेली, वायुना अधिकपणाथी वेलनीं पेठे कंपता हस्त पल्लववाली, धोलां थइ गयेलां रुंवाडाने लीधे सुकाइ गयेला तृणनी भूमि सरखीं, पडी गयेला दांतने लीधे काढी लींधेला बीजवाला दाडम सरखा मुखवाली, नेत्रबल विना अर्थात् न देखवाने लीधे अमासना सरखी सर्व तिथिओने माननारी अने मृत्युना समीपे आवेली एवी कोइ वृद्धा स्त्री त्यां आवे. ॥ ४–५–६ ॥ पोतानी अवस्थाने न जाणनारी ते

अनात्मज्ञा डुढोके सा, सूर्पमादाय कौतुकात् ॥ विभज्य सर्षपान् सर्वान्, प्रस्थं पूरयितुं पुनः॥७॥ कदापि सूर्पेण विविच्य धान्य-राशेर्भरत्याशुकदंबकैस्तैः ॥ प्रस्थं तथा सा जरती न भूयः, प्राप्नोत्यपुण्यो मनुजो नृजन्म ॥ ८ ॥

वृद्धा स्त्री कौतुकथी हाथमां सूपडुं लइ फरी एक शेर पुरा करवा माटे सघला सर्षवने विणीने खोली काढे ॥ ७ ॥ कदापि ते वृद्धा सूपडा वडे धान्यना ढगलामांथी खोली काढीने ते सर्षवरडे शिघ्र एक शेरने पुरो करे, परंतु ते अपुण्य माणस फरीथी मनुष्य जन्मने न पामे ॥ ८ ॥

इति तृतीय दृष्टांतः

अथ चतुर्थद्युतदृष्टांतः

हवे चोथुं द्यूतनुं दृष्टांत कहे छे.

अस्ति रत्नपुरं नाम, पुरं रत्नाकरश्रियम् ॥ यदुद्भूतैर्नरै रत्नै-रिव शृंगायते जगत् ॥ १ ॥ राजा शतायुधस्तत्र, नवीनः कुलिशायुधः ॥ यस्य कस्य न चित्राय, महिमा दानवर्द्धितः ॥२॥ सुधर्मागर्व

रत्नाकरना सरखी संपत्तिवाळुं रत्नपुर नामे नगर छे. रत्ननी पेठे जे नगरमां उत्पन्न थयेला पुरुषोए करीने जगत् श्रेष्ठता ने पाम्युं छे ॥ १ ॥ ते नगरमां नवीन इंद्रना सरखो शतायुध नामे राजा राज्य करतो हतो के जे राजानो दानथी वृद्धि पामेलो यश सर्व कोइने आश्चर्यकारी थयो हतो ॥ २ ॥ ते राजाने सुधर्मा सभानी गर्व रूपी सर्व संपत्तिने तोडीपाडवा माटे ज

सर्वस्व–मुच्छेतुमिव निर्मितम् ॥ अनन्यसममास्थान–मासीत्तस्य महीभूजः ॥ ३ ॥ यत्रोल्लोच स्थमुक्तास्त्रक्–प्रतिबिंबितभूतले ॥ किमधोऽप्यस्त्युडुचक्र–मिति संदिदिहे जनैः ॥ ४ ॥ यत्र स्फुरन्मणिघृणि–स्तोमापास्ततमस्ततौ ॥ क्रियते मंगलायैव, प्रदीपा रजनीमुखे ॥ ५ ॥ यौवराज्यं ददौ यूने, सूनवे नयविन्नृपः ॥ न चैष तावतातृप्य–ल्लोभो लाभे हि वर्द्धते ॥ ६ ॥ हत्वापि पितरं स्वस्य, राज्यश्रियमियेष सः ॥ धिक् राज्यं येन दुर्मित्रे–णेव दुर्बुद्धिरेधते ॥ ७ ॥ एतद्विवेद सर्वत्र, संचरश्चरलोचनः ॥ मंत्री कुमारदुर्वृत्तं, रहो राज्ञो जगाद च ॥८॥ अजानन्निव भूजानि–

बनावी होयनी ? एवी अतुल्य सभा हती ॥ ३ ॥ जे सभामां चंद्रवाने विषे लटकी रहेली मोतीनी मालाओथी प्रतिबिंबित थइ रहेली पृथ्वीने विषे शुं नीचे पण ताराचक्र छे ? एम माणसो संदेह पामता हता. ॥ ४ ॥ जे सभामां देदीप्यमान मणिओना किरणोना समूहथी अंधकारनो समूह नाश पाम्या छतां पण रात्रीने विषे फक्त मंगलने माटेज दीवा कराता हता. ॥ ५॥ पछी नितिने जाणनारा राजा शतायुधे पोताना युवान पुत्रने युवराज पद आप्युं, परंतु ते कुमार तेटलाथी तृप्त थयो नहीं. कारणके लाभ थवाथी लोभ वृद्धि पामे छे॥ ६ ॥ तेथी तेणे पोताना पिताने पण मारी नाखवानो विचार करीने राज्य संपत्तिनी इच्छा करी. राज्यने धिक्कार थाओ के दुष्ट मित्रनी पेठे जे राज्यनी संगतिथी दुष्ट बुद्धि वृद्धि पामे छे ॥ ७ ॥ सर्व स्थानके फरता गुप्त चाकर पासेथी मंत्रीए आ वात जाणी अने तेणे कुमारनुं दुराचरण एकांतमां राजाने कह्युं. ॥८॥ कोइ वखते राजा शता-

रन्यदा तनयं जगौ ॥ परिश्रांता वयं वत्स, धृत्वा राज्यधुरां चिरम् ॥ ९ ॥ निधित्सामस्त्वयि ज्येष्ठे, नंदने राज्यमेकतः ॥ अन्यतः कुलमर्यादां, परित्यक्तुं न शक्नुमः ॥ १० ॥ का तात कुलमर्यादा, पृष्टे तेनेति साग्रहम् ॥ भूपोऽभ्यधात्कुलेऽस्माकं, राज्यं द्यूतेन लभ्यते ॥ ११॥ अष्टोत्तरशतं स्तंभा, जृंभमाणमणित्विषः ॥ आस्थानेऽत्र प्रतिस्तंभं, संत्यष्टशतमश्रयः ॥ १२ ॥ अक्षैर्दीव्यन् मया साकं, त्वमाकंपविमुक्तधीः ॥ जयमासादयन्नश्रि–मेकां स्तंभस्य जेष्यसि ॥१३॥ पुनर्द्यूते जयन्नश्रिं,द्वितीयां च विजेष्यसे ॥ स्तंभस्यैकस्य निःशेषा, जेतव्या एवमश्रयः ॥ १४ ॥ एवमेव क्रमाज्जेयाः, शेषस्तं

दुधे आजाणनी पेठे पुत्रने कह्युं के–हे वत्स ! अमे घणा वखत सुधी राज्यनी धुंसरी धारण करीने थाकी गया छीये ॥ ९ ॥ अमे एक तरफथी मोटा पुत्र एवा तारे विषे राज्यने स्थापन करशुं अने बीजी तरफथी कुल मर्यादाने त्यजी देवा समर्थ नथी ॥ १० ॥ 'हे तात ! कुल मर्यादा शुं छे ?' एम ते पुत्रे आग्रह सहित पूछयुं एटले राजाए कह्युं के–आपणां कूलमां राज्य द्युतथी (जुगठुं रमवाथी) मेलवाय छे ॥ ११ ॥ आ सभामंडपमां प्रकाशीत थइ रहेली मणिनी कांतिवाला एक सो आठ थांभला छे अने दरेक थांभले एक सो आठ खूणा छे ॥ १२ ॥ निश्चल बुद्धिवालो तुं मारी साथे पासाथी रमतो छतो जयने पामे तो एक थांमलाना एक खूणाने जीतसे ॥ १३ ॥ वली फरीथी द्युतमां मने जीते तो बीजा खूणाने जीतशे. ए प्रमाणे एक थांभलाना सघला खूणा जीतवा ॥ १४ ॥ अने एज प्रमाणे अनुक्रमे सर्व थांभलाना सघला खूणा जीतवा. परंतु तेमां जो एक वखत पण

भाखिलाश्रयः ॥ यद्येकदापि स्खलति, तद्द्यूतं याति मूलतः ॥ १५ ॥ ततः स द्यूतनिष्णातः, तात घातनिवृत्तधीः ॥ प्रयासाभीरुरारेभे, रंतुं राज्याय भूभुजा ॥ १६ ॥ कदाप्यसावस्खलितं विजित्य, स्तंभानशेषानपि लाति राज्यम् ॥ अपुण्यनैपुण्यमना न भूयः, प्राप्नोति मानुष्यमहो मनुष्यः॥१७॥

हारी जाय तो मूलथी द्यूत हारी जाय. ॥ १५ ॥ पछी द्यूत रमवामां चतुर अने पितानो घात करवामां निवृत पामेली बुद्धिवाला, वली रमवाना प्रयास करवामां नहि बीकण एवा ते राजकुमारे राज्यने माटे राजानी साथे द्यूत रमवाने आरंभ कर्यो ॥ १६ ॥ कदापि ए राजकुमार अस्खलितपणे सघला एवाय पण थांभलाने जीतीने राज्यने पामे. परंतु आश्चर्य छे के-पापकृत्यमां चतुर बुद्धिवालो माणस फरीथी मनुष्य भव न पामे ॥ १७ ॥

इति चतुर्थदृष्टांतः

अथ पंचमरत्नदृष्टांतः

हवे पांचमुं रत्ननुं दृष्टांत कहे छे.

ऋद्धं धनसमृद्धाख्य–मस्ति ख्यातं क्षितौ पुरम् ॥ यस्य स्थिरस्य संसर्गा–दिव श्रीश्चापलं जहौ ॥१॥

पृथ्वी उपर समृद्धिवंत धनसमृद्ध नामनुं प्रसिद्ध नगर छे. स्थिर एवा जे नगरनी सोबतथीज होयनी ? एम ते नगरमां लक्ष्मीये चपलपणाने त्यजी दीधुं हतुं. ॥ १ ॥ ते नगरमां धनद नामनो शेठ वसतो हतो. जेणे नाना प्रकारनां रत्नोनो संग्रह

तत्राभूद्धनदः श्रेष्ठी, यो नानारत्नसंग्रहात् ॥ रत्नाकर इति ख्याति-मुदधेर्विदधे वृथा ॥ २ ॥
यद्यद्ददर्श सुश्राव, रत्नं क्वापि स कौतुकी ॥ तत्तत्संजगृहे दीप्ति-पात्रं शास्त्रं सुधीरिव ॥ ३ ॥
ग्राहं ग्राहं स रत्नानि, स्वमंदिरमपूरयत् ॥ इच्छुर्मनीषितं मूल्यं, व्यक्रीणीत न किंचन ॥ ४ ॥
कोटिध्वजौकःकोटिषु, पताकाः कोटिसंख्यया ॥ वेल्लंतीर्व्योम्नि वल्लीव, तत्पुत्रा आलुलोकिरे ॥ ५ ॥
दध्यिवांसश्च चेत्तात-स्तनुते रत्नविक्रयम् ॥ तदस्माकमपि द्रव्य-कोटयः स्युर्न दुर्घटाः ॥ ६ ॥
चलाचलांचलान् पश्चा-दुत्तम्भीमो ध्वजान्वयम् ॥ नीरसैर्जरठस्पर्शैं, रत्नैर्बंदीकृतैर्हि किम् ॥ ७ ॥

करवाथी समुद्रनी रत्नाकर एवी ख्यातिने निष्फल करी नाखी हती. ॥ २ ॥ उत्तम बुद्धिवालो माणस शास्त्रने जेम एकठुं करे तेम कौतुकी एवो ते शेठ जे जे तेजवंत एवां रत्नने क्यांइ पण देखे अथवा शांभले तो ते ते रत्नने खरीद करीने एकठां करे. ॥ ३ ॥ ए प्रमाणे ते शेठे रत्नोने ग्रहण करी करीने पोतानुं घर भरी दीधुं, परंतु ते रत्नोनां पोतानी इच्छा प्रमाणे मूल्यने इच्छतो एवो ते शेठ कोइ रत्नने वेचतो न हतो. ॥ ४ ॥ कोइ वखते ते शेठना पुत्रोए कोटिध्वज पुरुषोनां घरना उपर आकाशमां फरकती वेलनी पेठें क्रोडो गमे पताका (ध्वजाओ) दीठी. ॥ ५ ॥ अने तेओ विचार करवा लाग्या के-जो पिता रत्नोने वेची नाखे तो आपणने पण धननी क्रोडो अर्थात् क्रोडो गमे धन दुर्लभ न होय. ॥ ६ ॥ पछी आपणे पण स्थिर अने कंपता वस्त्रोवाली धजाओने उंची करीये. कारण रस विनाना, कठोर स्पर्शवाला अने बांधी मूकेला रत्नोए करीने शुं ?

यया द्विषो न दूयंते, प्रीयंते न च बांधवाः ॥ घटदीपिकयेवालं ऋद्धया बुद्धया च नस्तया ॥ ८ ॥
यदि कचित्पिता याति, नुन्नोऽस्माकं मनोरथैः ॥ तद्रत्नविक्रयात्कोटि–ध्वजनाम लभामहे ॥ ९ ॥
एवं विमृशतां तेषां, धनदो धनदोहदी ॥ ययौ देशांतरं न श्री–रस्ति दुस्त्यजसद्मनाम् ॥ १० ॥
विना सवित्रा पुत्रास्ते, तारावद्विजजृंभिरे ॥ आविश्वक्रुश्चिररत्नानि–रत्नान्यापणवीथिषु ॥ ११ ॥
ययाचे यो यथा रत्नं, मूल्येनाल्पेन भूयसा ॥ विक्रीय तत्तथा द्रव्य–मेव संजगृहुश्च ते ॥ १२ ॥
विदेश्या रत्नलाभात्ते, हृष्टा देशांतराण्ययुः ॥ व्यधुश्च श्रेष्ठिनः पुत्रा, ध्वजारोपं स्ववेश्मनि ॥ १३ ॥

॥ ७ ॥ जेनाथी शत्रुओ दुःख न पामे अने बांधवो प्रसन्न न थाय तेवी रीतें घडामां मूकी राखेला दीवाना सरखी बुद्धि अने ऋद्धिए करीने आपणने सर्युं. ॥ ८ ॥ जो अमारा मनोरथोए प्रेरेला पिता क्यांइ परदेश जाय तो रत्नोने वेचीने आपणे कोटिध्वजनुं नाम मेलवीए. ॥ ९ ॥ ए प्रमाणे ते पुत्रो विचार करता हता एवामां धन मेलववानी इच्छा करनारो धनद शेठ बीजे देश गयो. कारण घरने न त्यजनाराने अर्थात् घरे बेसी रहेनारने लक्ष्मी प्राप्त थती नथी. ॥ १० ॥ पछी पिता विना ते पुत्रो तारानी पेठे प्रकाशवा लाग्या अने पिताए घणा वखतथी एकठां करेलां रत्नोने बजारमां वेचवा लाग्या. ॥ ११ ॥ जेणे जेवी रीते रत्नने थोडा मूल्यथी अथवा घणा मूल्यथी माग्युं. ते रत्नने तेवी रीते वेचीने ते पुत्रो धननेज एकठुं करवा लाग्या.॥१२॥ रत्नना लाभथी हर्ष पामेला खरीद करनारा ते परदेशीओ पण बीजे देश चाल्या गया, अने शेठना पुत्रोए पोतानां घरने विषे ध्वज चडाव्यो. ॥ १३ ॥ ते पुत्रो रत्नना व्ययथी कोटिध्वज एवुं नाम पामे छते धन मेलववाथी वृद्धि पामेला धनद शेठें

रत्नव्ययाद्वात्तेषु, तेषु कोटिध्वजाभिधाम् ॥ धनार्जनोर्जितः श्रेष्ठी, निन्ये स्वोकः सनाथताम् ॥१४॥
वीचियितं मरुद्धुतै-र्यैः पुत्रानंदवारिधेः ॥ श्रेष्ठिनः शीर्षशूलाय, तैश्चपेटायितं ध्वजैः ॥ १५ ॥
रत्नविक्रयवार्द्धिष्णु-क्रोधलोहितलोचनः ॥ श्रेष्ठी यष्टिभिराहत्या-दिदेश तनयानिति ॥ १६ ॥
रे लक्ष्मीकंदकुद्दाला, बाला व्याला इवोन्मदाः ॥ गुरुगौरवगौरांशु-राहवः क्षामबाहवः ॥ १७ ॥
रत्नानि तान्यशेषाणि, दिशः सर्वा भ्रमन् भ्रमन् ॥ आहृत्य वेश्म विशत, सुचिरेणापि नान्यथा१८
एवं निर्वासिताः पित्रा, पुत्रास्ते रत्नलिप्सवः॥ भ्रेमुर्भ्रेशं भुवं रंका,इव भोगोचिता अपि॥१९॥ भ्रांत्वा

पोतानुं घर सनाथ (सार्थक) कर्युं. ॥ १४ ॥ पवनथी कंपती एवी जे धजाओ शेठना पुत्रोना आनंद समुद्रना तरंगरूप थइ ते ध्वजाओ घरे आवेला शेठना मस्तकने विषे शूल उत्पन्न करवा माटे लपडाक रूप थइ. ॥ १५ ॥ पछी रत्नोने वेची नाखवानी वात सांभली वृद्धि पामेला क्रोधथी राता नेत्रवाला शेठे पुत्रोने लाकडी वडे मारीने एवी आज्ञा करी के-॥ १६ ॥ अरे ! लक्ष्मीरूप कंदने खोदी नाखवाने कोदाला सरखा ! हाथीनी पेठे उन्मत्त थयेला ! वडिलोनी गौरवतारूप चंद्रने घेरी लेवामां राहु सरखा ! दुर्बल भूजावाला बालको ! ॥ १७ ॥ घणा काल सुधी पण सर्व दिशाओमां भमी भमीने मारां ते सघलां रत्नोने एकठां करीने पछी घरमां आवज्यो. नहिं तो आवशो नहीं. ॥ १८ ॥ ए प्रमाणे पिताए काढी मूकेला ते

चतस्रोऽपि दिशो लभेरं, तान्येव रत्नान्यखिलानि तेऽपि ॥ अक्लृप्तधर्मा न पुनर्मनुष्य–भवाच्च्युतो मानुषतां कदापि ॥ २० ॥

रत्नोने मेलववानी इच्छा करता पुत्रो भोग भोगववाने योग्य छतां पण रांकनी पेठे पृथ्वी उपर बहु काल भटक्या. ॥ १९ ॥ ते पुत्रो पण चारे दिशाओने विषे भमीने तेज सघलां रत्नोने फरी मेलवे, परंतु धर्मने नहिं करनारो अने मनुष्य भव हारी गयेलो माणस क्यारे पण फरी मनुष्यपणाने पामे नहीं. ॥ २० ॥

इति पंचम दृष्टांतः

अथ स्वप्ने चंद्रपानदृष्टांतः

हवे स्वप्नमां चंद्रपाननुं दृष्टांत कहे छे.

नगरं पाटलीपुत्र–मास्ति गौडाविभूषणम् ॥ यत्र मंगल्यदीपंति, सौधोर्द्धे निशि तारकाः ॥ १ ॥

तत्र भूपोऽभवच्छंखो, दक्षिणावर्त्तशंखवत् ॥ समुज्वलगुणः श्रीणां, कारणं वारिताशिवः ॥ २ ॥

गौड देशनुं आभूषणरूप पाटलीपुत्र नामनुं नगर छे. जे नगरमां घरोनी उपर रात्रीने विषे ताराओ मांगलिक दीवा समान देखाय छे. ॥ १ ॥ ते नगरमां दक्षिणावर्त्त शंखनी पेठे उज्वल गुणवालो, लक्ष्मीनुं कारण अने उपद्रवने निवारनारो शंख नामनो राजा राज्य करतो हतो. ॥ २ ॥ ते राजाने वखाणवा योग्य सौभाग्यवाली जयश्री राणीना उदरथी उत्पन्न थयेलो

तस्य प्रशस्यसौभाग्य–जयश्रीकुक्षिभूरभूत् ॥ पुत्रश्चित्रकलामूलं, मूलदेव इति श्रुतः ॥ ३ ॥ ह्रींकार इव निःशेष–मायाबीजं महामतिः ॥ आद्यो रूपवतां लीला–वतां योऽजनि यौवने ॥ ४ ॥ सरलक्रुरसच्चौर–पौरपामरपर्षदि ॥ सोऽमिलत्तादृशीभूय, वस्तुस्तोमे यथा जलम् ॥ ५ ॥ स द्यूतव्यसनी स्तैन्यं, पुरस्यांतरकारयत् ॥ धूमो वन्हेरिव स्तैन्यं, द्यूतस्याद्यं हि लक्षणम् ॥ ६ ॥ द्यूतं त्याजयितुं पित्रा, ततोऽसौ शिक्षितो रहः ॥ तच्छिक्षां न पुनर्मेने, मत्तद्विप इवांकुशम् ॥७॥ नृपोऽथ जनतानिष्टं, कुलिनमपि कश्मलम् ॥ चिरलग्नं पुरापंक–मिव दूरीचकार तम् ॥ ८ ॥ इत्थं मे

विचित्र कलाओना मूलरूप मूलदेव नामनो प्रसिद्ध पुत्र हतो. ॥ ३ ॥ समस्त माया बीज ह्रींकारनी पेठे महा बुद्धिवालो जे मूलदेव युवावस्थामां रूपवंत अने कलावंतोनी मध्ये अग्रेसर थयो. ॥ ४ ॥ जेम वस्तुओना समूहने विषे जल तेवां रूपे मली जाय तेम ते मूलदेव सरल, क्रुर, उत्तम, चोर, धनवंत अने निर्धननी सभामां तेवो तेवो थईने मली जतो हतो. ॥ ५ ॥ द्यूतनो व्यसनी एवो ते राजपुत्र नगरनी अंदर चोरी करावतो हतो. कारण के–जेम अग्निनुं लक्षण धूमाडो होय तेम द्यूतनुं मुख्य लक्षण चोरी छे. ॥ ६ ॥ पछी पिताए द्यूत तजाववा माटे एने एकांतमां शीखामण आपी, परंतु मदोन्मत्त हाथी अंकुशने जेम न माने तेम तेणे पितानी शीखामण मानी नहीं. ॥ ७ ॥ पछी राजाए घणा कालथी चोटी रहेला कादवनी पेठे नगर वासीओने अप्रीय अने कुलिन छतां पण पापरूप ते पुत्रने नगरथी काढी मूक्यो. ॥८॥ आ प्रमाणे थवाथी महारुं दूरना देश जोवा कतुंहलं

पूर्यतां दूर–देशदर्शनकौतुकम् ॥ इति ध्यायन् ययौ सोऽध्यु–ज्जयनीं जायिनीं दिवः ॥ ९ ॥ स तत्र
वामनः कुब्जो, भूत्वा गुटिकया रयात् ॥ कलाः प्रकटयामास, स्वाः शशीवांतरांतराम् ॥ १० ॥
परःशतगुणा प्राज्ञ–हृद्गता व्यक्तवर्णभाक् ॥ वेश्यात्र देवदत्ताभू–त्प्रवीणेत्युचितश्रुतिः ॥ ११ ॥
तां मोहयितुमन्येद्यु–स्तस्या उपानिकेतनम् ॥ स प्रातर्गानमारेभे, मधुरध्वनिरध्वनि ॥ १२ ॥
गायकः कोऽयमुत्यूचे, स्वदासी देवदत्तया ॥ सा पि वीक्ष्यावद्विज्ञे, कुब्जः कोऽप्येष गायति ॥ १३ ॥
कलावंतं तमाह्वातुं, प्रहिता देवदत्तया ॥ कुब्जांगा माधवी चेटी, मूलदेवं जगाविति ॥ १४ ॥

पूर्ण थाओ ? एम विचार करतो मूलदेव पण स्वर्गने जीतनारी एवी उज्जयिनी (उज्जण) नगरीमां गयो. ॥ ९ ॥ ते त्यां गोलीना प्रयोगवडे शीघ्र वामणो (कुबडो) थइने चंद्रनी पेठे वचे वचे पोतानी कलाओने प्रकट करवा लाग्यो. ॥ १० ॥ ए नगरीमां सौथी अधिक गुणवाली, चतुर पुरुषोनां मनमां रमी रहेली, गौर वर्णवाली सर्व कलामां प्रवीण अने योग्य वचन बोलनारी देवदत्ता ए नामनी वेश्या रहेती हती. ॥ ११ ॥ बीजे दिवसे मधुर शब्दवाला ते मूलदेवे ते वेश्याने मोह पमाडवा माटे तेनां घरनी पासे मार्गने विषे सवारमां गायन शरु कर्युं.॥१२॥ पछी देवदत्ताए पोतानी दासीने आ कोण गाय छे ? एम पूछयुं एटले दासी पण जोइने कहेवा लागी के–हे पंडिता ! ए कोइ पण कुबडो गाय छे. ॥ १३ ॥ देवदत्ताए पण कलावंत एवा तेने बोलाववा माटे मोकलेली कुबडा अंगवाली माधवी नामनी दासी त्यां जइने मूलदेवने आ प्रमाणे कहेवा लागी. ॥ १४ ॥

सर्वगाणिक्यमाणिक्यं, कोविद्प्रिय कोविदा ॥ त्वां मत्स्वामिनी देव–दत्ताह्वयति संप्रति ॥ १५ ॥
विशेषबहुमानेच्छुः, स तामुचे हले व्रज ॥ न वेश्यावेश्मनि वयं, स्ववशा निविशामहे ॥ १६ ॥
व्यवृत्तामथ तां पृष्ठे, मुष्टिनाहत्य मर्मवित् ॥ कुब्जामपि ऋजूचक्रे, स यष्टिमिव वर्द्धकिः ॥ १७ ॥
दास्या प्रोक्तेऽथ तद्वृत्ते, देवदत्तानुरागिणी ॥ स्वयं गत्वा चटूक्त्या त–मानिन्ये निजमंदिरम् ॥१८॥
तयोरन्योन्यमालापे, जाते पीयूषपारणे ॥ वीणाकारशिरोरत्नं, तत्रागात्कोऽपि गायकः ॥ १९ ॥
तद्वीणाक्कणितं श्रुत्वा,साधु साध्विति भाषिणी ॥ देवदत्ताधुनान्मौलिं,धूर्त्तः सोऽपि तथा करोत्॥२०॥

हे विद्वत्प्रिय! सर्व गणिकाना समूहने विषे माणिक्य रत्न समान चतुर एवी मारी स्वामिनी देवदत्ता तमने हवणां बोलावे छे. ॥ १५ ॥ विशेष बहु माननी इच्छा करनारा मूलदेवे तेने कह्युं. अरे दासी! अहिंथी चाली जा. स्वतंत्र एवा अमे वेश्यानां घरने विषे प्रवेश करता नथी. ॥ १६ ॥ पछी मर्मना जाण मूलदेवे पाछी जती एवी ते दासीने पाछल भागमां मुठीवडे मारीने सुथार लाकडीने जेम सिद्धि करे तेम ते कुब्जाने पण सिद्धी करी. ॥ १७ ॥ पछी दासीये ते वृत्तांत वेश्याने कह्यो एटले अनुराग धरती देवदत्ता पोते जइने मधुर वचनथी तेने पोतानां घरे तेडी लावी. ॥१८॥ त्यां ते बन्ने जणानी परस्पर अमृतना पारणा समान वातचित थती हती एवामां वीणा वगाडनारानी मध्ये मुकुटमणि सरखो कोइ पण गवैयो वेश्यानां घरे आव्यो.१९ ते गवैयाए वगाडेली वीणाना शब्दने सांभलीने ' बहु सारुं, बहु सारुं, ' एम कहेती एवी देवदत्ता माथुं धुणाववा लागी एटले धूर्त्त मूलदेव पण ते प्रमाणे माथुं धुणाववा लाग्यो. ॥ २० ॥ वेश्याए माथुं धुणाववानुं कारण पूछ्युं एटले महाधूर्त मूलदेव

पृष्टस्तया शिरःकंप-हेतुं धूर्त्ताधिपो जगौ ॥ अद्भूतं वीक्ष्यमाणस्य, शिरः कस्य न कंपते ॥ २१ ॥
स्त्रियः सर्वत्र वीक्ष्यंते, सगर्भा न पुनः पुमान् ॥ अद्य त्वद्धाम्नि वीक्ष्येते, स्त्रीपुंसावपि गर्भितौ ॥२२॥
स्त्रीवीणेयं सगर्भास्ति, पुमान् दंडोऽपि तादृशः ॥ इत्युक्त्वादर्शयत्तंत्र्यां, केशं दंडे च कर्करम् ॥ २३ ॥
अथ तस्मै निजां वीणां, प्रवीणार्पयतिस्म सा ॥ तयात्तया विरजेऽसौ, पुंरूपेव सरस्वती ॥ २४ ॥
मूलदेवे स्वयं वीणा-वादके देवदत्तया ॥ ऐंद्रं सदस्तदा मेने, निर्विश्वावसुतुंबरु ॥ २५ ॥
तं वीणावादनाम्नायं, वीणाकारेऽथ याचति ॥ धूर्तराजोऽभ्यधाद्भद्र, नाहं जानामि किंचन ॥ २६ ॥

कहेवा लाग्यो के, अद्भूत जोनारा कया माणसनुं माथुं नथी धुणतुं ? ॥ २१ ॥ जूओ सर्व स्थानके स्त्रीओ तो सगर्भा देखाय छे, परंतु पुरुष देखाता नथी. पण आजे तारां घरने विषे तो स्त्री अने पुरुष बन्ने गर्भवंत देखाय छे. ॥ २२ ॥ आ स्त्रीरूपी वीणा सगर्भा छे. अने पुरुषरूप दंड पण तेवो छे. एम कहीने तेणे वीणाना तारमां वलगी रहेला वालने अने दंडमां रहेला कांकराने देखाडी आप्यो. ॥ २३ ॥ पछी चतुर एवी देवदत्ताये तेने पोतानी वीणा आपी अने ग्रहण करेली ते वीणावडे ए मूलदेव पुरुषनां रूपने धारण करनारी सरस्वतीनी पेठे शोभवा लाग्यो. ॥ २४ ॥ ज्यारे मूलदेव पोते वीणाने वगाडवा लाग्यो त्यारे देवदत्ता वेश्या पोतानां घरने विश्वावसु अने तुंवरु विनानी इंद्र सभा मानवा लागी. ॥२५॥ पछी वीणा वगाडनार पुरुष मूलदेवने वीणा वगाडवाना नियमने पूछवा लाग्यो एटले धूर्त्तराज मूलदेव कहेवा लाग्यो के-हे भद्र ! हुं कांइ जाणतो नथी. ॥२६॥

आयुक्तः सर्वविद्यानां, वीणायाश्च विशेषतः ॥ विद्वान् विक्रमसेनोऽस्ति, पाटलीपुत्रपत्तने ॥ २७ ॥
तच्छिष्यो मूलदेवोऽस्ति, सोऽहं तत्पारिपार्श्विकः ॥ तलं कलाया नो वेद्मि, कुरुचिल्ल इवोदधेः॥२८॥
अत्रांतरे विश्वभूतौ, रंगाचार्ये समागते ॥ सा प्रोचे नामुना तुल्यः, कोऽप्यन्यो भारते श्रुतः॥२९॥
मूलदेवोऽभ्यधाद्भद्रे, येन त्वमपि शिक्षिता ॥ किं ब्रूमस्तस्य वैदुष्यं, तदपि ज्ञास्यतेऽथवा ॥ ३० ॥
कुब्जोऽयमित्यवज्ञाय, प्रारब्धे विश्वभूतिना ॥ विचारे भारते सोऽवक्, पूर्वापरविरोधताम् ॥ ३१ ॥
कस्त्वं कुब्ज विचारेऽस्मिन्, धनुर्वेद इवार्भकः ॥ विश्वभूतिर्वदन्नेवं, मूलदेवेन हक्कितः ॥ ३२ ॥

पण सर्व विद्यानो जाण अने वीणानो विशेष जाण विद्वान् विक्रमसेन पाटली पुत्र नगरमां छे.॥२७॥तेनो शिष्य मूलदेव छे.ते हुं तेनी पासे रहेनारो छुं.जेम समुद्रनी उपर फरनारो समुद्रना तलीयाने जाणतो नथी तेम हुं कलाना तलीयां (मूल) ने जाणतो नथी.॥२८॥आ वखते विश्वभूति नामनो नाटकाचार्य त्यां आव्यो एटले देवदत्ताए मूलदेवने कह्युं के–आना सरखो कोइ पण बीजो नाटकमां सांभल्यो नथी.२९मूलदेवे कह्युं. हे भद्रे ! जेणे तने पण शिक्षण आप्युं छे,तेनी चातुरीने शुं कहीये! अथवा ते पण जणाशे.॥३०॥पछी "आ कुबडो शुं जाणे ?." एम अपमानीने विश्वभूतिए नाटकनो विचार देवदत्ताने कहेवो शरु कर्यो एटले मूलदेवे तेनी पूर्वापर विरोधता कही बतावी. ॥३१॥ अरे कुब्ज ! बालक धनुर्वेदने जेम न जाणे तेम आ नाटकना विचारमां तुं कोण ? अर्थात् तुं शुं जाणे ? एम बोलता एवा ते विश्वभूतिने मूलदेवे हाकोटी काढयो. ॥ ३२ ॥ अरे रंडापंडित ! मारे विषे

किं मंडयसि पांडित्यं, रंडापंडित रे मयि ॥ बिभिमः किमु तालाभि–र्मठपारापता वयम् ॥ ३३ ॥
कथं कुर्मस्त्वया वादं, वयं सांप्रतमुत्सुकाः ॥ स्वं जाड्यमित्यपन्हुवन्, विश्वभूतिर्विनिर्ययौ ॥ ३४ ॥
दृष्ट्वा तत्पाटवं देव–दत्ता चित्तानुरागिणी ॥ निपत्य पादयोर्मूल–देवमेवं व्यजिज्ञपत् ॥ ३५ ॥
भारती भरतो विश्वा–वसुतुंबरुनारदाः ॥ प्रत्यक्षा अद्य सर्वेऽपि, त्वयि दक्ष निरीक्षिते ॥ ३६ ॥
कुलरूपाकृतीर्वक्ति, कलाकौशलमेव ते ॥ कुरुते कषरेखैव, विशेषं स्वर्णलोहयोः ॥ ३७ ॥
तथाप्याहृत्य रूपं स्वं, मेघमुक्त इवोडुपः ॥ प्रिय पूरय मद्दृष्टि–चकोरीपारणस्पृहाम् ॥ ३८ ॥

पंडितपणुं शुं माडे छे ? अर्थात् मने पंडितपणुं शुं देखाडे छे ? मठना पारेवा समान अमे तालीओवडे शुं भय पामशुं ? ॥ ३३॥ हवणां उत्साहवंत एवा अमे तारी साथे वाद केम करीए ? एम कहीने पोतानी मुर्खाइने छुपावतो विश्वभूति त्यांथी चाल्यो गयो. ॥ ३४ ॥ मूलदेवनां आवां चतुरपणाने जोइ चित्तने विषे अनुराग धरती देवदत्ता पगमां पडीने मूलदेवनी आ प्रमाणे विनंति करवा लागी ॥ ३५ ॥ हे चतुर ! तने जोवाथी आजे सरस्वती, भरतनाटकी, विश्वावसु, तुंबरु अने नारद सर्वे पण मने प्रत्यक्षज जोवाया छे. ॥ ३६ ॥ कलानुं कुशलपणुंज तारां कुल रूप अने आकृतिने कही आपे छे. कारण कसोटीनी रेखाज सोनाना अने लोढाना विशेषपणाने प्रगट करे छे. ॥ ३७ ॥ तोपण हे प्रिय ! वादलांथी मुक्त थयेला चंद्रनी पेठे पोतानां खरा स्वरूपने धारण करीने मारी दृष्टिरूप चकोरीना पारणानी इच्छाने तुं पूर्ण कर. ॥३८॥ देवदत्ताये ए प्रमाणे

तयेत्यभ्यर्थितो रूपं, स्वाभाविकमियाय सः ॥ अधिकादरदं तत् स्या-द्यत्प्रदीयेत चाटुभिः॥ ३९ ॥
तंमूर्त्तमिव कंदर्पं, चक्षुष्यमिव भास्करम् ॥ सचेतनमिव स्वर्णं, वीक्ष्य सापि विसिष्मिये ॥ ४०॥
प्रीणयित्वाथ तं स्नान-भोजनाच्छादनादिना ॥ देवदत्तावदत्तोष-निचिता रचितांजलिः ॥ ४१॥
न याचे भवतो भूषां, न च स्वर्णधनान्यपि ॥ एतत्तु याचे धामेदं, मां च मास्म मुचः सदा॥४२॥
सोप्युचे मयि निर्द्रव्ये, वैदेश्ये चानुरागिणी ॥ गुणज्ञे गणिकाधर्म-मर्म कस्मान्निकृंतसि ॥ ४३ ॥
सावदद्बाह्यवृत्त्यैव, रज्ये धनिषु धीधन ॥ मनः पुनः ममाजस्रं, विश्राम्यति कलावति ॥ ४४ ॥

प्रार्थना करेला मूलदेवे पोतानां स्वाभाविक स्वरूपने धारण कर्युं. कारण के जे मधुर वचनथी अपाय छे ते अधिक आदर आपनारुं थाय छे. ॥ ३९ ॥ देवदत्ता पण मूर्तिमंत कामदेव सरखा, नेत्ररक्षक सूर्यना सरखा अने सचेतन सुवर्णना सरखा मूलदेवने जोइने विस्मय पामी. ॥ ४० ॥ पछी मूलदेवने स्नान भोजन वस्त्र विगेरेथी प्रसन्न करीने संतोषथी व्याप्त थयेली देवदत्ताए हाथ जोडीने कह्युं. ॥ ४१ ॥ हुं तमारी पासेथी घरेणां नथी मागती, तेम सोनुं अने धन पण मागती नथी, पण एज मागुं छुं के-आ घरने अने मने निरंतर न मूको. अर्थात् हंमेशां मारी पासे रहो. ॥ ४२ ॥ मूलदेवे पण कह्युं-हे गुणज्ञे ! निर्धन अने परदेशी एवा मारे विषे अनुराग धरती तुं गणिकाधर्मना मर्मने शा माटे कापी नाखे छे ? ॥ ४३ ॥ वेश्या देवदत्ताये कह्युं. हे बुद्धिरूप धनवाला ! मारुं मन धनवंतोने विषे फक्त बाह्यवृत्तीथीज अनुरागवालुं थाय छे, परंतु कलावंत तारे विषे निरंतर विश्राम पामे छे. ॥ ४४ ॥ सूर्यना किरणो कुमुदिने (चंद्र विकाशी पोयणीने) फक्त बाहिरथीज स्पर्श करे छे.

कुमुदिन्या बहिः स्पर्शी, कुर्युर्वसुमतः कराः ॥ हृदयोद्घाटनं तस्याः, पुनरिंदुः कलामयः ॥ ४५ ॥
विदेशो वा स्वदेशो वा, गुणिनां गणनेति का ॥ विदेशेष्वेव लब्धार्था, हेममौक्तिकविद्रुमाः ॥४६ ॥
ओमिति प्रतिपेदाने, मूलदेवेऽथ तद्वचः ॥ हेमदंडकरस्तत्र–राज्ञो द्वाःस्थः समाययौ ॥ ४७ ॥
आहुता नर्तितुं तेन, नृपधाम जगाम सा ॥ हृष्टेवाऽलक्ष्यरूपेण, मूलदेवेन संयुता ॥ ४८ ॥
कुशले वाद्यविद्यायां, तस्मिन् पटहवादिनि ॥ सांद्रं गर्जति पर्जन्ये, मयुरीव ननर्त सा ॥ ४९ ॥
तुष्टस्तस्यै ददौ भूपः, प्रसादं सापि वाणिनी ॥ समये प्रार्थयिष्येऽह–मिति न्यासीचकार तम्॥५०॥

परंतु ते कुमुदिनां हृदयने उघाडनार तो कलामय चंद्र छे. ॥ ४५ ॥ गुणवंत माणसोने विदेश अथवा तो स्वदेश एवी गणना शी ? सोनुं मुक्ताफल अने वैडूर्य विदेशने विषेज पोतानी किंमतने पाम्या छे. ॥ ४६ ॥ पछी मूलदेवे ते वेश्यानां वचनने बहु सारूं एम कहीने कबुल कर्युं, एवामां त्यां हाथमां सुवर्णदंडने धारण करनारो राजानो द्वारपाल आव्यो. ॥ ४७ ॥ तेणे नाच करवाने माटे बोलावेली ते जाणे हर्ष पामेली होयनी ? एम न ओलखी सकाय एवा रूपवाला मूलदेव सहित राजमंदिरमां गइ. ॥ ४८ ॥ त्यां वाद्यविद्यामां कुशल एवा मुलदेवे पटह वगाडवा मांड्यो एटले घणो मेघ गाजवाथी मयुरीनी पेठे ते देवदत्ता नाचवा लागी. ॥ ४९ ॥ पछी प्रसन्न थयेला राजाए ते वेश्याने कांइ वरदान मागवा कह्युं, एटले वेश्याए पण 'हुं ते अवसरे मागीश, एम कहीने ते राजानी पासे थापण तरीके राख्युं. ॥ ५० ॥ पछी राजमान्य एवी देवदत्ताये कानने प्रिय एवुं गीत

सा जगौ राजगौरव्या, ततो गीतं श्रुतिप्रियम् ॥ ददौ प्रमुदितस्तस्यै, स्वांगभूषां नरेश्वरः ॥ ५१ ॥
मधुमत्तपिकीकंठ–कुंठीकरणकारणम् ॥ अगायन्मूलदेवोऽपि, वीणाक्वणितमिश्रितम् ॥ ५२ ॥
सखंडाम्ररसास्वाद–मिवादाने महीपतौ ॥ सभा बभार तद्गान–विरामाशंकिनी शुचम् ॥ ५३ ॥
प्राप्तः कार्यवशात्तत्र, पाटलीपुत्रभूभुजः ॥ भुजमुत्तभ्य विमल–सिंहो मंत्रीत्यवोचत ॥ ५४ ॥
इयं गीतकला मूल–देव एवापरत्र न ॥ छन्नवेषः स एवैष, विज्ञेयो नात्र संशयः ॥ ५५ ॥
अभ्यर्थितस्ततो राज्ञा, मुख्यं रूपमुपागतः॥नत्वा विमलसिंहेन, स्वामिसूनुः स सस्वजे ॥ ५६॥

गयुं, एटले खुशी थयेला राजाए तेने पोतानां अंगनां आभूषणो आप्यां. ॥ ५१ ॥ पछी मूलदेवे पण चैत्रमासमां मदोन्मत्त कोयलना कंठने कुंठीत करवाना कारणरूप वीणाना शब्दथी मीश्रित गायन कर्युं.॥५२॥राजा मूलदेवना गायनने साकर सहित आम्ररसना स्वादनी पेठे ग्रहण करते छते सभा तेना गायनना विरामनी शंका पामती छती शोकने धारण करती हती. ॥५३॥ आ वखते कांइ कार्य प्रसंगे त्यां आवेला पाटलीपुत्र राजाना विमलसिंह मंत्रीए हाथ उंचो करीने आ प्रमाणे कह्युं. ॥ ५४ ॥ आवी गीतकला मूलदेवने विषेज छे. बीजाने विषे नथी. गुप्त वेषवालो तेज आ पोतेज जाणवो, एमां संशय नथी. ॥५५॥ पछी राजाए विनंती करी एटले मूल रूपने पामेला ते राजपुत्रने विमलसिंह नमन करीने भेटी पड्यो. ॥ ५६ ॥ राजाए

क्रोडीकृत्य नरेशेन, गाढं गौरवितोऽपि सः ॥ वाक्पाशपतितो भेजे, भवनं पणयोषितः ॥ ५७ ॥
भुंजानः स तया सार्कं, भोगानक्षैर्निरंतरम् ॥ दिदेव देवदत्तापि, तापितेव जगाद तम् ॥ ५८ ॥
प्रतिकुलं महत्त्वस्या–नुकूलं सकलापदाम् ॥ द्यूतं दोषैरनुस्यूतं, दयितेदं विमुच्यताम् ॥ ५९॥
जिते लोभोदधिक्षोभो, हारिते तु जयस्पृहा ॥ जिते वा हारिते वापि, द्यूतेनोभयथाऽसुखम् ॥६०॥
नरः कृशोऽस्तु नत्वीडे, शोफात्तं मेदुरोदरम् ॥ सदारिद्रयं श्रियेऽप्येत–न्नाभिष्टं मेदुरोदरम् ॥ ६१ ॥
नाजन्मशिक्षितं द्यूतं,प्रियोक्त्यापिमुमोच सः ॥ यद्वा सितानुविद्धापि,किं शुंठी तैक्ष्णमुज्झति ॥६२॥

खोलामां बेसारीने अत्यंत गौरव पमाडेलो एवोय पण ते मूलदेव वचन पासमां बंधायलो होवाथी फरी वेश्यानां घरे गयो. ॥ ५७ ॥ त्यां वेश्यानी साथे भोगोने भोगवतो ते मूलदेव निरंतर पासावडे रमतो हतो. देवदत्ता पण जाणे ताप पामी होयनी एम तेने कहेवा लागीके–॥ ५८ ॥ हे दयित ! महोटाइना शत्रु सरखा, अने सर्व आपत्तिओना मित्र सरखा, वली दोषोथी जोडायला एवा आ जुगारने त्यजी घो. ॥ ५९ ॥ जुगारमां जय थाय तो लोभरूप समुद्र वधे अने हारी जवाय नो फरी जीतवानी स्पृहा थाय. माटे जुवटार्थी जीतवामां अथवा तो हारवामां एम बन्ने रीते असुख छे. ॥ ६० ॥ माणस दुर्बल भले हो. पण सोझाथी वृद्धि पामेला उदरवालाने हुं नथी वखाणती. दारिद्रय सहित ए निर्धनपणुं सारुं, पण द्यूत नहि सारुं. ॥ ६१ ॥ आ प्रमाणे प्रिया एवी देवदत्ताये कह्या छतां पण मूलदेवे जन्मथी आरंभीने शीखेला जुगारने त्यजी दीधुं नहीं. अथवा तो

नाहर्नापि निशां च वेत्ति विकलो जानाति न क्षुत्तृषौ,वक्त्यश्लीलगिरो धनं निधनयत्याशु प्रयासार्जितम्॥
हास्यः स्पष्टधियां भवत्यवसनो हेद्यूतभूत त्वदा–घ्रातस्तत्पुनरत्र चित्रमफलो यन्मंत्रतंत्रक्रमः ॥६३॥
इतश्चास्त्यचलस्तत्र, धनी सार्थपतिर्युवा ॥ स्वीकृत्य वीतदानेन, देवदत्तामभुंक्त सः ॥ ६४ ॥
तस्मिन् दुःकर्मवन्नित्यांऽतरायेऽप्यंतरातरा ॥ तां भेजे मूलदेवोऽपि, श्रद्धालुः समतामिव ॥ ६५ ॥
अक्काऽवक् देवदत्तां तां, मूलदेवं त्यजाधनम् ॥ अचलं निश्चलीभूय, भज वत्से श्रियां पदम् ॥ ६६॥
स्त्रीणां भवति मान्यत्वं, समृद्धे सति भर्तरि ॥ उत्तरादिक्कृता पूज्या, धनेशोऽस्या यतः पतिः ॥६७॥
साकरथी युक्त करेली एवी पण सुंठ शुं तीखासने त्यजीदे खरी ? ॥ ६२ ॥ हे द्यूतरूप भूत ! ताराथी पकडायलो विकल माणस दिवसने अने रातने नथी जाणतो. वली भूख तरसने पण नथी जाणतो. तेमज गांडा वचन बोले छे, अने महा महेनते एकठां करेलां धनने तुरत नाश करे छे. तथा वस्त्र रहित एवो ते बुद्धिवंतोने हांसी करवा योग्य थाय छे. वली अहिं ते आश्चर्य छे के, जेने विषे मंत्रतंत्रनो क्रम पण निष्फल थाय छे. ॥ ६३ ॥ एवामां त्यां अचल नामनो धनवंत युवान सार्थपति रहेतो हतो तेणे धन आपी देवदत्ताने वश्य करी भोगववा लाग्यो. ॥ ६४ ॥ नितिमां दुःकर्मनी पेठे ते अचलनो अंतराय छतां वच्चे वच्चे श्रद्धालु जेम समताने भजे तेम मूलदेव पण ते देवदत्ताने सेववा लाग्यो. ॥ ६५ ॥ कोइवखते अक्काए ते देवदत्ताने कह्युं. हे वत्से ! निर्धन एवा मूलदेवने त्यजी दे अने निश्चल थइने लक्ष्मीना स्थानरूप अचलने सेव. ॥ ६६ ॥ भर्तार समृद्धिवत होय तो स्त्रीओनुं मान्यपणुं होय छे. जूओ उत्तर दिशा पूज्य कराई, कारण के जेनो पति धनवंत कुबेर छे. ॥६७॥ बे शास्त्र, बे

उभे शास्त्रे उभे विद्ये,उभौ मार्गावुभौ विभू ॥ समं सिसेविषोः पुंसो, नैकोऽपि, फलदो भवेत् ॥६८॥
साप्यूचे मातरेषास्मि, नैकांतेन धनार्थिनी ॥ किंतु मेऽस्त्यादरश्चाप--यष्टेरिव गुणेष्वपि ॥ ६९ ॥
अयं गुणी गुणज्ञश्च, सुरूपः सुभगः शुचिः॥ उचितज्ञः प्रियः पुण्यैः, प्राप्तः किं त्याज्यते त्वया॥७०॥
नहि स्वीकारमर्हंति, धनवंतोऽपि निर्गुणाः ॥ मुक्ताभारोपि नारोपि, वक्षो दक्षैर्गुणं विना ॥ ७१ ॥
तच्छ्रुत्वा कुटिनी तस्यां, व्यवाहार्षीद्दिनात्ततः ॥ साकिनीव सपत्नीव, वैरिणीवोरंगीव वा ॥७२ ॥
सा कदाचिद्ययाचेंबां, तैलेक्षू अथ यावकम् ॥ खलकूर्चकानिर्णिक्त--पक्ष्मकाणि तु सा ददौ ॥ ७३ ॥

विद्या, बे मार्ग अने बे पति एटलाने साथे सेवनारा पुरुषने एक पण फल आपनार न थाय. ॥ ६८ ॥ देवदत्ताये कह्युं--हे मात ! हुं एकांतथी धननी स्पृहावाली नथी, परंतु मारो धनुष्यनीं लाकडीनी पेठे गुणने विषेज आदर छे. ॥ ६९ ॥ आ मूलदेव गुणवंत छे, अने गुणने जाणनार छे. वली उत्तम रुपवालो, सौभाग्यवंत तथा पवित्र छे. तेमज उचितने जाणनारो अने प्रिय ए पुण्यथीज प्राप्त थयो छे. तो तुं शा माटे मने तजावे छे ? ॥ ७० ॥ धनवंत एवाय पण निर्गुण पुरुषो स्वीकार करवाने निश्चे योग्य नथी, जूओ, डाह्या पुरुषो गुण (दोरा) विना मुक्ताफलना समूहने पण छाती उपर नथी आरोपता. ॥ ॥ ७१ ॥ एवां देवदत्तानां वचन सांभली ते दिवसथी आरंभीने कुट्टिनी देवदत्ताने विषे साकिनीनी पेठे, शोक्यनी पेठे, वैरिणीनी पेठे अथवा तो सर्पिणीनी पेठे व्यवहार राखवा लागी. ॥ ७२ ॥ कोइ दिवसे देवदत्ताये पोतानी माता (अक्का) पासे तेल, शेरडी अने लाक्षारस माग्यो एटले तो वली तेणे खोल शेरडीना कूचा अने रसरहित पोथीना छोतरा आप्यां.॥७३॥

मातः किमेतादिति सा,तया पृष्टा रुषा जगौ ॥ प्रियस्तवास्ति निःसारो,यादृक् तादृश्यमून्यपि ॥७४॥
सपद्मं याति भृंगीभं, सपद्मं वारि हंस्यपि॥ निष्पद्मं च रता ताभ्यां,पशुभ्यामपि हीयसे॥ ७५ ॥
ज्ञात्वा तदाशयं सापि, प्रोचे मातरिमान्यपि ॥ गोकुले भाजने भग्ने, प्रदीपे ह्युपकुर्वते ॥ ७६ ॥
मूलदेवो न निःसारो, यः प्रवेको विवेकिषु ॥ निःसारोऽचल एवासौ, यो विवेकेन वर्जितः ॥७७॥
दर्शयिष्ये तवाप्येत–दित्युक्त्वा प्रेष्य माधवीम् ॥ अचलं ज्ञापयामास,सा श्रद्धामिक्षुभक्षणे ॥७८॥
सोऽपि प्राप्य तदादेश–मनंक इव किंकरः ॥ प्राहिणोदिक्षुसंपूर्ण–मनः स्वमनसा सह ॥ ७९ ॥

हे मात ! आ शुं ? एम देवदत्ताये पूछ्युं एटले अक्काए क्रोधथी कह्युं के–जेवो तारो प्रिय सार रहित छे तेवी आ वस्तुओ पण छे. ॥ ७४ ॥ भमरी मदयुक्त एवा गजराज तरफ जाय छे अने हंसली पण पद्म सहित एवा पाणी तरफ जाय छे. वली लक्ष्मी रहित मर्त्ये प्रीति पामेली तुं तो ते भमरी अने हंसलीथी पण तुच्छ छे. ॥ ७५ ॥ अक्काना आशयने जाणीने देवदत्ताए पण कह्युं. हे मात ! ए वस्तुओ पण बलदना समूहे पात्र फोडी नाख्ये छते निश्चे दीवा उपर उपकार करे छे. ॥ ७६ ॥ मूलदेव निःसार नथी. कारण ते विवेकि पुरुषोमां चतुर छे. वली निस्सार तो आ अचलज छे के जे विवेक विनानो छे. ॥ ७७ ॥ तने पण ए देखाडी आपीश. एम कहीने तेणे माधवी दासीने मोकलीने शेरडी खावानी पोतानी इच्छा अचलने जणावी.॥७८॥ अचले पण तेनी आज्ञाथी चिन्ह विनाना चाकरनी पेठे पोतानां मन सहित शेरडीथी भरेलुं गाडुं मोकली आप्युं ॥ ७९ ॥ पछी

तदौदार्यं प्रशंसंत्या–मक्कायामभ्यधत्त सा ॥ किं मक्ष्यिस्मि येनेक्षू–नद्मि मूलदलैः सह ॥ ८० ॥
तमेव दोहदं मूल–देवोऽपि ज्ञापितस्तया ॥ स्ववचांसीव सरसा–निक्षूनादत्त पंचषान् ॥ ८१ ॥
मूलाग्राणि दृढाः सर्व–ग्रंथीरपि परित्यजन्॥ इक्षून्निस्तक्ष्य चक्रे स, खंडान् द्वित्रांगुलायतान् ॥ ८२ ॥
भित्तैर्भृत्वा शरावांस्तै–श्चतुर्जातकवासितैः ॥ प्रोतैर्बब्बूलाशूलाभिः, स प्रैषीदुपवल्लभम् ॥ ८३ ॥
हृष्टाथ देवदत्ता तां, बभाषे मातरं तरम् ॥ विवेको मूलदेवस्या–चलस्यापि निभालय ॥ ८४ ॥
इयं मुग्धा विप्रलब्धा, धूर्त्तेनानेन धिक् कथम् ॥ कार्पण्यं दोषमप्यस्य, यत्पश्यति गुणाशया॥८५॥

मूलदेवना औदार्यने वखाणती एवी अक्काने देवदत्ता कहेवा लागी के–शुं हुं भेंश छुं ? जे मूल अने पांदडा सहित आ शेरडीने खाउं ? ॥ ८० ॥ पछी देवदत्ताये तेज पोतानी इच्छा मूलदेवने पण जणावी. एटले ते पोतानां वचननां सरखा सरस पांच छ शेरडीना सांठा लाव्यो. ॥ ८१ ॥ पछी मूल तथा अग्रभागने तेमज कठीण एवी सर्व गांठोने काढी नाखी मूलदेवे शेरडीने छोली नाखीने बे त्रण अंगुल लांबा ककडा कर्या. ॥ ८२ ॥ सुगंधित वस्तुथी वासीत करेला ते ककडा काचना चार पात्रमां भरी ते उपर चार वस्त्र ढांकी ते वस्त्रने बावलनी शूलोथी टांकी मूलदेवे देवदत्ता पासे मोकल्या. ॥ ८३ ॥ पछी हर्ष पामेली देवदत्ता ते अक्काने कहेवा लागीके–जो आ मूलदेवनो तथा अचलनो विवेक !॥ ८४ ॥ धिक्कार थाओ, धुतारायी ठगायली आ भोलीने ! एना कृपणपणाना दोषने पण ए गुणनी आशाथी केम जूए छे ? ॥ ८५ ॥ मनुष्यनां शल्यनी पेठे आ मूलदेव

नृशल्यमिव निर्वास्य, एवायं सदनादिति ॥ कल्पांतवार्द्धिवीचीवा—चलं चानयति स्म सा ॥८६॥
दिनाधीशोदयेऽवोच—द्देवदत्तामथाचलः ॥ एष ग्रामांतरं यामि, कामिन्यस्तु शिवं तव ॥ ८७ ॥
गुणाग्रहे गृहाणेदं, नित्यव्ययकृते धनम् ॥ मृद्वि मद्विरहान्मा भै—स्त्वं मे वससि चेतसि ॥ ८८ ॥
अचले चलिते सद्म, सा निनाय स्वनायकम् ॥ गते म्लेच्छबले बिंब—मिव चैत्यमशंकिता ॥ ८९॥
स्निग्धताजितगोस्तन्या, गोस्तन्या अपि पेशलाः॥प्रावर्तत मिथो वार्ता, एकतल्पस्थयोस्तयोः ॥९०॥
अक्कासंकेतितस्ताव—दचलः सुभटान्वितः ॥ विद्युद्गोल इवापत्य, सहसा प्राविशद्गृहे ॥ ९१ ॥ मूल

घरथी काढवा योग्यज छे, एम विचारीने वली ते अक्काए कल्पांतकालना समुद्रना तरंगनी पेठे अचलने पोतानां घरने विषे बोलाव्यो. ॥ ८६ ॥ पछी सवारे सूर्यना उदय वखते अचले देवदत्ताने कह्युं. हे कामिनी ! हुं बीजे गाम जाउं छुं. तारुं कल्याण थाओ. ॥ ८७ ॥ हे गुणना आग्रहवाली ! हमेशां वापरवा माटे आ धनने ग्रहण कर. हे कोमलांगी ! मारा वियोगथी भय पामीश नहीं, तुं मारा चित्तने विषे वसे छे. ॥ ८८ ॥ म्लेच्छबल गया पछी चैत्य (देरासरमां) प्रतिबिंब लाववानी पेठे अचल गया पछी शंका रहित एवी देवदत्ता पोताना नायक मूलदेवने घरमां लावी. ॥ ८९ ॥ एक शय्यामां बेठेला ते बन्ने जणानी द्राखथकी वधारे स्निग्ध अने वधारे सुंदर एवी परस्पर वातो चाली. ॥ ९० ॥ तेटलामां अक्काए संकेत करी राखेलो अचल सुभटो सहित विजलीना गोलानी पेठे आवीने एकदम घरमां पेठो. ॥ ९१ ॥ ते वखते देवदत्ताए मूलदेवने शय्यातले

देवं न्यधाद्देव-दत्ता तल्पतले तदा ॥ मूक्त्वा तस्यांतिके स्वांतं, सा तन्वाचलमभ्यगात् ॥ ९२ ॥
निषसादाचलस्तल्पे, विकल्पे दुर्मना इव ॥ अक्का भ्रूसंज्ञयावादी-दधस्थं तस्य वैरिणम् ॥९३॥
अचलेनाचलेनेवो-पर्याक्रांतो विमूढधीः ॥ न निर्गतुं न च स्थातुं, शशाक नृपनंदनः ॥ ९४ ॥
इभ्योऽवदत्प्रिये नासं-श्चलतः शकुनानि मे ॥ ज्ञाने जानंति मच्चित्तं,तानि त्वद्विरहास्पदम् ॥९५॥
सस्नौ तल्पे सचेलोऽहं,निशीति स्वप्नमीक्षितम् ॥ सत्याकर्तुमिह स्नास्या-म्यद्य तत्प्रगुणी भव ९६
सा बभाषे प्रभो स्नातुं,स्नानपीठमलंकुरु॥मा विनश्यादियं तूली,भोगार्हा स्नानवारिणा ॥ ९७ ॥

राखी अने तेनी पासे पोतानुं चित्त छतां ते फक्त शरीरवडे अचल पासे गइ.॥९२॥दुष्ट मनवालो माणस जेम विकल्पने विषे निवास करे तेम अचल शय्या उपर बेठो,एटले अक्काए भ्रकुटीनी संज्ञा करीने शय्या नीचे रहेला तेना शत्रुने कही देखाडयो. ॥९३॥पर्वतनी पेठे अचल शय्या उपर बेठो एटले मुढ बुद्धिवालो ए राजपुत्र नीकलवाने समर्थ थयो नही, तेम रहेवाने पण समर्थ थयो नही ॥ ९४ ॥ अचले कह्युं. हे प्रिये ! जता एवा मने शुकन थया नहीं, ज्ञानने विषे मारुं चित्त जाणे छे के-ते शुकन तारा वियोगनां स्थानरूप छे. ॥९५ ॥ हुं वस्त्र सहित शय्यामां नाह्यो. एवुं स्वप्न में रात्रिने विषे दीठुं छे, माटे तेने साचुं करवा माटे आजे हुं अहिं शय्या उपर नाहीश, माटे तैयारी कर.॥९६॥देवदत्ताये कह्युं. हे प्रभो ! न्हावाने माटे, न्हावाना बाजठ उपर बेसो, के जेथी करीने भोगने योग्य एवी आ शय्या न्हावाना पाणीथी विनाश पामे नहीं. ॥ ९७ ॥ हठ पामेला शठ अचले

शठो जातहठोऽवादी–द्चलस्तां मनस्विनि ॥ अद्य स्नातव्यमत्रैव, मया स्वप्नानुरोधतः ॥ ९८ ॥
सार्थेशगोत्रदेवीव, पुत्रीं शास्तिस्म कुट्टिनी ॥ वत्से कोऽयं स्वभावस्ते, पत्युः प्रत्युत्तरार्पणम् ॥९९॥
अवशा सा तमभ्यज्य, स्नपयामास पाथसा ॥ तेनाधःपतता क्षत्रः, सस्नावस्नापितोऽपि सः ॥१००॥
जुगुप्समानः स्वं कर्म, वणिग्मलजलाविलः ॥ तत्र सोऽस्थात् क्षणं ग्राम–स्रोतसीव सितच्छदः॥१०१॥
यद्भाव्यं तद्भवत्वाशु, न तु स्थातुमिहौचिती ॥ ध्यात्वेति भूपभूर्निर्य–न्नेवारुध्यत तद्भटैः ॥१०२॥
चौरवद् दृढवद्धं तं, कृतांत इव दारुणः ॥ ऊचिवानचलः कुर्वे, किमन्यायकृतस्तव ॥ १०३ ॥

हठ पामेला शठ अचले देवदत्ताने कह्युं. हे मनस्विनी ! आजे मारे स्वप्नाने अनुसारे अहिंज न्हावुं छे. ॥ ९८ ॥ पछी सार्थपतिनी गोत्रदेवीनी पेठे अक्काए पुत्रीने कह्युं के–हे वत्से ! पतिने सामो उत्तर आपवो ए तारो स्वभाव क्यो ? ॥ ९९ ॥ पछी परवश एवी देवदत्ताए अचलने तेल चोळीने त्यांज पाणीवडे न्हवराव्यो ! अने ते नीचे पडता पाणीथी नहीं न्हवरावेलो एवो ते मूलदेव पण न्हायो ॥१०१॥ पोतानां कर्मनी नींदा करतो अने वणिकना मलीन पाणीथी भींजाइ रहेलो ते मूलदेव नगरनी खालमां रहेला हंसनी पेठे क्षणमात्र त्यांज रह्यो ॥ १०१ ॥ जे थवुं होय ते शीघ्र थाओ, पण अहिं रहेवुं योग्य नथी. एम विचारीने निकलताज ते राजपुत्र मूलदेवने अचलना सुभटोए पकड्यो ॥ १०२ ॥ यमराजना सरखा दारुण एवा अचले चोरनी पेठे मजबूत बांधीने मूलदेवने कह्युं के–अन्याय करनारा तने हुं शुं करुं ? ॥१०३॥ अवसरे अपकार करवाने इच्छता

समयेऽपचिकीर्षुस्तं, मूलदेवोऽब्रवीदिति ॥ यत् क्रियेताभिपन्नस्य, कुरु घातं च तन्मम ॥ १०४ ॥
व्यमृशद्देवदत्तांतः, साधूक्तं दयितेन मे ॥ नीचैर्नमन्नयं चाप, इवारातिं हनिष्यति ॥ १०५ ॥
स प्रोचे याहि मुक्तोऽसि,मुंचेस्त्वमपि जातु माम्॥ पुच्छकं छगणस्यैव,धिग्निःसत्वं वणिग्जनम् ॥१०६॥
आबद्धशकुनग्रंथि–र्निगत्य नगराद्बहिः ॥ स्नातः सरसि सोऽचालीत्, पुरं बेन्नातटंप्रति ॥ १०७ ॥
एकस्माद्चलात्रस्तः, पुरोऽचलचयाकुलाम् ॥ वीक्ष्याटवीं सशंकोऽसौ, सहायं कंचिदैहत ॥ १०८ ॥
तावत्तत्रागतः कोऽपि, सबलः सक्तुशंबलात् ॥ विप्रस्तेन क यासीति, बभाषे मुदितात्मना॥१०९॥

मूलदेवे तेने कह्युं के–शरणे आवेलाने जे कराय ते मारो घात कर ॥ १०४ ॥ देवदत्ता मनमां विचारवा लागी के–मारा प्रियतमे सारुं कह्युं. धनुष्यनी पेठे नीचे नमनो ए शत्रुने मारशे ॥ १०५ ॥ अचले कह्युं. जा, तुं मारावडे मुक्त थयो छे. वली तुं क्यारे मने मुक्त करजे. छाणना पुंछडानी पेठे सत्व विनाना वणिकजनने धिक्कार थाओ ॥ १०६ ॥ पछी शुकन जोइ नगरथी बहार नीकलीने तलावमां स्नान करवा पूर्वक ते मूलदेव बेन्नातट नगर तरफ चाल्यो ॥ १०७ ॥ एक अचलथी त्रास पामेलो होवाने लीधे अने आगल बहु अचलो (पर्वतो) ना समूहथी भरपुर एवी अटवी जोइने शंका पामेलो ए मूलदेव कोइनी सहायने इच्छवा लाग्यो ॥ १०८ ॥ तेटलामां साथवाना भाथाने लीधे सबल अर्थात् साथवानुं घणुं भाथुं साथे राखनारो कोइ पण ब्राह्मण त्यां आव्यो, एटले हर्ष पामेला मूलदेवे 'तुं क्यां जाय छे ?' एम पूछयुं ॥ १०९ ॥ "हुं बेन्नातट नगरनी

यामि वीरप्रधानाख्यं, ग्रामं बेन्नातटांतिके ॥ इत्युक्तिशालिना तेन, मूलदेवः सहाचलत् ॥ ११० ॥
वार्ताविनोदतोऽन्योऽन्य, जातसौहृदयोस्तयोः ॥ क्षीरोदस्पर्द्धि मध्यान्हे, ययौ दृग्गोचरं सरः॥१११॥
मराललीलया तत्र, कृतकेलिर्न्यलीयत ॥ अपाथेयः पथश्रांतो, मूलदेवस्तरोस्तले ॥ ११२ ॥
स्वोदरप्रमितान् सक्तू–नसक्तो दानकर्मणि ॥ क्षणादालोडयामास, भोक्तुकामोऽभसा द्विजः॥११३॥
रीतिज्ञोऽप्ययमद्यापि, किं नाह्वयति मामिति ॥ कुमारे विमृशत्येव, शक्तूनेकोऽप्यभुंक्त सः ॥११४॥
भुक्त्वा प्रचलिते विप्रे, राजपुत्रो व्यभावयत्॥ नाद्याल्पशक्तुरेषोऽद्य–द्भोजनं स्वस्तु दास्यति॥११५॥

पासेना वीरप्रधान नामना गामे जाउं छुं." एम कहेता एवा ते ब्राह्मणनी साथे मूलदेव चाल्यो ॥ ११० ॥ वार्ता विनोदथी परस्पर मित्रताने पामेला ते बन्ने जणा क्षीरसमुद्र सरखा कोइ तलावनी पासे मध्यान्हने वखते आवी पहोच्या ॥ १११ ॥ ते तलावमां हंसनी पेठे स्नान करी भाथुं पासे न होवाने लीधे मार्गना श्रमथी थाकी गयेलो मूलदेव वृक्षनी नीचे सूई गयो. ॥ ११२ ॥ बीजाने आपवाने असमर्थ अने भोजन करवानी इच्छावाला ते ब्राह्मणे तो पोतानुं उदर पुराय एटलो साथवो पाणीथी क्षणमात्रमां भींजवी नाख्यो ॥ ११३ ॥ रीतिनो जाण ए हजी सुधी पण मने शुं नहि बोलावे ? एम कुमार मूलदेव विचार करतो हतो एवामां एकलो एवो पण ते ब्राह्मण सघला साथवाने खाई गयो ॥ ११४ ॥ ब्राह्मण भोजन करीने चाल्यो एटले राजपुत्र विचार करवा लाग्यो के–एणे आजे मने थोडो पण साथवो आप्यो नथी. परंतु काले आपसे ॥ ११५ ॥ ए

न द्वितीये तृतीयेऽपि, दिनेऽसौ तमबूभुजत् ॥ भिक्षाककुलजातेषु, प्रायो दानकथा वृथा॥ ११६ ॥
त्र्यहेणातीतकांतारं, कुमारं न्यगदद् द्विजः॥ स्वस्त्यस्तु सौम्य ते यास्या–म्यहं तु वर्त्मनामुना ॥११७॥
अवदन्मूलदेवस्त–मियं द्वादशयोजना ॥ गृहांगणमिवालंघि, त्वत्सहाय्यान्मयाटवी ॥ ११८ ॥
ध्रुवं त्वमुपकारार्हः, किं कुर्वे निर्द्धनोऽधुना ॥ मूलदेवं नृपं श्रुत्वा, विप्र क्षिप्रं समापतेः ॥ ११९ ॥
अथासौ मूलदेवेन, नामपृष्टोऽब्रवीदिति ॥ लोकैर्निर्घणशर्माख्यां, लंभितः सिद्धडोऽस्म्यहम् ॥१२०॥
द्विजः काको जनैर्युक्तं, स्मर्यते भोजनक्षणे ॥ बंधून् लब्ध्वाल्पभक्ष्योऽपि, भोक्तुमाह्वयतीह यः ॥१२१॥

ब्राह्मणे बीजे तथा त्रीजे दिवसे पण तेने न खवराव्युं. कारण घणुं करीने भिक्षा मागीने खानारानां कुलने विषे दान आपवानी वात पण होती नथी ॥ ११६ ॥ ब्राह्मणे त्रण दिवसे अटवीने उलंघन करीने कुमारने कह्युं. हे सौम्य ! तारुं कल्याण थाओ. अने हवे हुं आ मार्गे जईश ॥ ११७ ॥ मूलदेवे पण ते ब्राह्मणने कह्युं. आ बार योजननी अटवी में तारी सहायथी घरना आंगणानी पेठे ओलंघी छे ॥ ११८ ॥ निश्चे तुं उपकारने योग्य छे. परंतु हवणां निर्धन एवो हुं शुं करुं ? हे विप्र ! मूलदेवने राजा सांभलीने तारे शीघ्र आववुं ॥ ११९ ॥ पछी मूलदेवे एने नाम पूछ्युं एटले तेणे कह्युं के–लोकोए तो निर्घण शर्मा (लज्जारहित) एवुं मारुं नाम पाड्युं छे, परंतु हुं सिद्धड छुं. अर्थात् मारुं नाम सिद्धड छे ॥ १२० ॥ ए योग्य छे के–माणसो भोजनने अवसरे ब्राह्मण अने कागडाने संभारे छे. आ लोकमां अल्प भोजनवालो पण जे बंधुओने पामीने भोजनने

द्विजा दंता वसंत्यास्ये, युक्तं यद्भक्ष्यमाप्यते ॥ स्वेन मृद्नंति यच्छान्ति, जिह्वायास्त्वौरसं रसम् ॥१२२॥
विधुर्धत्ते द्विजेशाख्यां, युक्तं यातोदयो ह्यसौ ॥ सौहित्यं जीवलोकस्य, करोति स्वकरामृतैः ॥१२३॥
आत्मंभरिरपूर्वोऽयं, मम मार्गसुहृद्द्विजः ॥ अस्य नामांतरं तन्व–न्न मृषावाग्महाजनः ॥ १२४ ॥
औदार्यभूरिति ध्यायन्, बेन्नातटपुरं प्रति ॥ प्रस्थितो भूपभूरेकं, विवेश ग्राममध्वनि ॥ १२५ ॥
भ्रांतभूरिग्रहः प्राप, कुल्माषांस्तत्र भिक्षुवत् ॥ कुल्माषास्तेऽभवंस्तस्य, मोदकेभ्यः प्रमोदकाः ॥१२६॥
अनाकुलमनास्तेषां, भक्षणे क्षुधितोऽपि सः ॥ व्यभावयदुपग्राम–सरस्तीरं गतः कृती ॥ १२७ ॥

माटे बोलावे छे ॥ १२१ ॥ द्विज अने दांत मुखमां वसे छे, ए युक्त छे. कारण जेनावडे भक्ष्य मेलवाय छे. पोते मर्दन करे छे अर्थात् चावे छे अने जिव्हाने घणो रस आपे छे ॥ १२२ ॥ चंद्र द्विजेश एवा नामने धारण करे छे ते योग्य छे. कारण उदय पामेलो ए चंद्र पोताना किरणोना अमृतवडे जीवलोकने तृप्त करे छे ॥ १२३ ॥ मारो मार्गमित्र आ ब्राह्मण अपूर्व पेट भरो छे. एनुं बीजुं नाम पाडनारो मोटो पुरुष मृषा वाणीवालो नथी ॥ १२४ ॥ औदार्यनी भूमिरूप राजपुत्र ए प्रमाणे विचार करतो अने बेन्नातट नगर तरफ जतो मार्गमां कोइ एक गामने विषे गयो ॥ १२५ ॥ त्यां भिक्षुकनी पेठे घणां घरे भमता तेने बाकला मल्या. अने ते बाकला पण तेने लाडवाथी वधारे हर्ष आपनारा थया ॥ १२६ ॥ भूख्यो छतां पण ते बाकला खावाने नहि आतुर मनवालो ते पुण्यवान् मूलदेव गामनी पासे तलावने कांठे जइने विचार करवा लाग्यो ॥१२७॥

क तन्मे पैतृकं राज्यं, क्व साऽवंतीविलासिता ॥ क्व च कुग्रामभिक्षेयं, सर्वमीषत्करं विधेः ॥१२८॥
एक स दिवसो यस्मि–न्नर्थिव्रातमजीवयम् ॥ एकोऽयं दिवसो यत्र, नोदरंभरिरप्यहम् ॥ १२९ ॥
उपवासत्रयांतेऽमी, कुल्माषा लेभिरे मया ॥ तत्कस्मैचिददत्त्वैतान्, किं रंक इव यक्षिमि ॥ १३० ॥
योऽपि सोऽपि समायातो, भिक्षुस्तोषाय संप्रति ॥ सत्पात्रं प्राप्यते येन, क्व तादृग् भाग्यमस्ति मे ॥१३१॥
एवं भावयतस्तस्या–कृष्टः पुण्यैरिवाययौ ॥ तपोराशिरिवांगस्थः, साधुर्मासमुपोषितः ॥ १३२ ॥
राज्यं रोरः सुतं वंध्यः, चक्षुरंधः श्रुतं जडः ॥ वाचं मूको निधिं दुःस्थ–इव तं प्राप्य सोऽहृषत् ॥१३३॥

क्यां ते मारुं पिता संबंधी राज्य? क्यां ते अवंतीना विलासो? वली क्यां आ कुग्रामनी भीक्षा? आ सर्व विधात्रानुं करवुं छे ॥ १२८ ॥ एक तेवो दिवस हतो के–जेमां हुं याचकोना समूहने जीवाडतो हतो, अने एक आ पण दिवस छे के–जेमां हुं मारुं पेट पण भरी शकतो नथी ॥ १२९ ॥ त्रण उपवासने अंते मने आ बाकला मल्या. माटे कोईने ते आप्या विना रांकनी पेठे शुं हुं खाउं? ॥ १३० ॥ हवणां जेवो तेवो पण आवेलो भिक्षुक मारा संतोष माटे छे. परंतु जेणे करीने सत्पात्र प्राप्त थाय तेवुं मारुं भाग्य क्यां छे? ॥१३१॥ ए प्रमाणे भावना भावता ते मूलदेवनां पुण्यथी खेंचायला होयनी? एवा शरीरधारी तपसमूह समान एक मासना उपवासी साधु त्यां आव्या ॥ १३२ ॥ रांक राज्यने, वांझीयो पुत्रने, आंधलो नेत्रने, जड शास्त्रने, मुंगो वाणीने अने दारिद्री निधानने जेम पामे तेम ते मूलदेव साधुने पामीने हर्ष पाम्यो ॥ १३३ ॥ अजने ठेकाणे

अजस्थाने गजप्राप्ते–र्मणिलाभाद् दृषत्पदे ॥ स्वं धन्यं मन्यमानोऽसौ, मुनिं नत्वा व्यजिज्ञपत् ॥१३४॥
त्वादृक्षा नास्त्यसौ भिक्षा, पुनर्भावं प्रमाणयन् ॥ गतकल्मषकुल्माषान् गृहाणानुगृहाण माम् ॥१३५॥
विवर्द्धयिषुरानंदं, दातुर्दांतमना मुनिः ॥ दौस्थाब्धिं तरितुं पोत–मिव पात्रं पुरो दधे ॥ १३६ ॥
मुनये मूलदेवेऽथ, ददाने दानमंजसा ॥ अवदद्देवता व्योम्नि, तत्पुण्यस्येव साक्षिणी ॥ १३७ ॥
धन्यानां हि नराणां स्युः, कुल्माषाः साधुपारणे ॥ यद्याचसे परार्द्धेन, मूलदेव वदामि तत् ॥१३८॥
गणिका देवदत्तेभ–सहस्रं राज्यमस्तु मे ॥ इति तस्मिन्नधियाने, पुनः प्रोवाच देवता ॥ १३९ ॥

गजराजनी प्राप्ती थवाथी अने पत्थरने ठेकाणे मणिनो लाभ थवाथी पोताने धन्य मानतो ए मूलदेव मुनिने नमीने विनंती करवा लाग्यो ॥ १३४ ॥ हे मुनि ! जो के आ भीक्षा तमारा योग्य नथी तोपण मारा भावने प्रमाण करता एवा तमे आ निर्दोष बाकलाने ग्रहण करीने मारा उपर अनुग्रह करो ॥ १३५ ॥ दातारने आनंद वधारवानी ईच्छावाळा शांत मुनिए दारिद्र्यरूप समुद्रने तरवा माटे वहाण समान पात्रने आगळ धर्युं ॥ १३६ ॥ पछी मूलदेवे मुनीने सुखे दान आप्युं एटले ते पुण्यनी साक्षीणी होयनी ? एम आकाशवाणी थइ के–॥१३७॥ निश्चे धन्य पुरुषोना बाकला साधुओना पारणामां होय छे. हे मूलदेव ! परार्द्धे करीने जे तुं मागे ते हुं तने कहुं. अर्थात् ते हुं तने आपुं ॥१३८॥ गणीका देवदत्ता सहीत हजार हाथीवाळुं राज्य मने मलो. एम ते मूलदेवे कह्युं एटले फरी देवताए कह्युं ॥१३९॥ आजथी सातमे दीवसे तने राज्य प्राप्त थशे, वळी ते देवदत्ता पण अनुक्रमे

सप्तमेऽहनि राज्यं ते, देवदत्ता तु सा क्रमात् ॥ भविष्यत्येव पुण्यं हि, क्रमेणैव विपच्यते ॥ १४० ॥
सोऽथ कृत्वा पुनर्भिक्षा–प्राप्तकुल्माषभोजनम् ॥ सायाहनि शनैर्गच्छ–न्नाप बेन्नातटं पुरम् ॥१४१॥
प्रसुप्तः पांथशालायां, परिपूर्णं ददर्श सः ॥ निशावसाने शशिनं, विशंतं वदनोदरे ॥ १४२ ॥
कश्चित्कार्पटिकोऽप्येवं, तदा स्वप्नं व्यलोकत ॥ अवोचच्च सतीर्थ्यानां, निद्रामुकुलिताक्षरम् ॥१४३॥
तेऽप्यूचुः स्वप्नदृष्टस्या–नुभावान्मृगलक्ष्मणः ॥ त्वं लप्स्यसेऽद्य भिक्षायां, मंडकं गुडमंडितम् ॥१४४॥
स्वप्न चिंतामणौ काची–यतस्तान्मंदमेधसः ॥ निंदन्नुदारमारामं, मूलदेवो ययौ प्रगे ॥ १४५ ॥

मलशेज. कारण पुण्य अनुक्रमे करीनेज फले छे ॥ १४० ॥ पछी मूलदेव फरी भीक्षामां प्राप्त थयेला बाकलानुं भोजन करीने धीमे धीमे जतो छतो सांजे बेन्नातट नगरे आवी पहोच्यो॥१४१॥ त्यां धर्मशालामां सूता एवा तेणे स्वप्नामां रात्रीने अंते (परोढीये) परीपूर्ण एवा चंद्रने पोतानां मुखमां प्रवेश करता दीठो ॥ १४२ ॥ ते वखते कोइ कापडीये पण एज प्रमाणे स्वप्नने दीठुं अने तेणे पोताना गुरुभाइओने नीद्राथी अस्पष्ट अक्षरवालुं स्वप्न कहीं दीधुं ॥१४३॥ तेओए पण कह्युं. स्वप्नमां दीठेला चंद्रना प्रभावथी तुं आजे भीक्षामां गोलथी बनावेला मांडा पामशे ॥१४४॥ स्वप्नरूप चिंतामणी रत्नने वीषे काच समान ते मंद बुद्धीवालाने निंदतो मूलदेव सवारे मनोहर एवा उद्यानमां गयो ॥ १४५ ॥ सर्व प्रकारना कर्मने जाणनारा ते मूलदेवे पुष्पने चुंटी

मालिकं सर्वकर्मज्ञो-ऽप्रीणात्पुष्पप्रचायतः ॥ तस्मात्पुष्पफलान्याप्य, ययौ स्वप्नज्ञधाम सः ॥१४६॥
दत्वा पुष्पफले पृष्टः, स्वप्नार्थं स विचक्षणः ॥ आचख्यौ तदहं वच्मि, जायसे चेन्ममातिथिः ॥१४७॥
तथेति प्रतिपेदानं, विहितस्नानभोजनम् ॥ रूपस्याधिभुवा स स्व-पुत्र्या तमुदवाहयत् ॥ १४८ ॥
ततोऽवदश्च शीतांशु-पानस्वप्नानुभावतः ॥ सप्तमेऽहनि लब्धासे, वत्स राज्यमिह स्थितः ॥ १४९ ॥
स्वप्नस्य देवतावाचि-साचिव्यं चिंतयन्नसौ ॥ निष्कंपश्चंपकस्याधः, प्रसुप्तः सप्तमेऽहनि ॥ १५० ॥
निधान इव निष्पत्रे, निष्पुत्रे भूपतौ मृते ॥ तदा तत्र पुरि प्राज्या, राज्यायंतिस्म गोत्रिणः ॥१५१॥

आपवार्थी मालीने प्रसन्न कर्यो, अने ते माली पासेथी थोडां पुष्पफलने लइने ते स्वप्नपाठकने घरे गयो ॥ १४६ ॥ त्यां तेणे पुष्पफल स्वप्न पाठकने आपीने स्वप्ननो अर्थ पूछयो एटले वीचक्षणतावालो ते स्वप्नपाठक कहेवा लाग्यो के-जो तुं मारो परणो था तो ते हुं तने कहुं ॥१४७॥ मूलदेवे ते वात कबूल करी एटले स्नान भोजन करावीने तेने स्वप्नपाठके पोतानी रूपवती पुत्री परणावी ॥ १४८ ॥ अने पछी ते स्वप्नपाठक कहेवा लाग्यो के-हे वत्स ! चंद्रपानना स्वप्न प्रभावथी तुं आजथी सातमे दीवसे अहीं रह्यो छतो राज्यने पामीश ॥१४९॥ स्वप्नना अने देवतानी वाणीमां रहेला प्राधान्यपणाने वीचार करतो नीश्चल ए मूलदेव सातमे दीवसे उद्यानमां चांपाना वृक्षनी नीचे सूतो हतो ॥१५०॥ ते वखते वारस वीनाना नीधाननी पेठे पुत्र वीनानो ते नगरनो राजा मृत्यु पाम्यो एटले त्यां नगरने वीषे घणा गोत्रीओ ते राज्यनी इच्छा करवा लाग्या ॥१५१॥ पछी आ पंच दीव्य

यस्मै राज्यं दास्यतीदं, स राजास्त्विति वादिभिः ॥ प्रधानैरधिवास्याथ, मुमुचे दिव्यपंचकम् ॥१५२॥
कुमाराः कृतशृंगाराः, क्षत्रमंत्रिद्विजन्मनाम् ॥ पुरस्तस्य चरंतिस्म, स्वैरं विचरतः पुरे ॥ १५३ ॥
राज्यार्हं कंचिदप्राप्य, पुरस्यांतः पुराद्बहिः ॥ पंचदिव्यान्यगुस्तत्र, यत्र सुप्तोऽस्ति भूपभूः ॥ १५४ ॥
तं वीक्ष्याहेषि तार्क्ष्येण, करेण च करेणुना ॥ स स्वस्कंधे समारोपि, पर्जन्येनेव गर्जता ॥ १५५ ॥
दुधुवे चामराभ्यां च, छत्रेणोपरि पप्रथे ॥ अर्घस्तस्य वितेने च, भृंगारेण नवातिथेः ॥ १५६ ॥
मौलिस्पृष्टमहीपीठ–लुठिताशेषशेखरैः ॥ सामंतैः स नमश्चक्रे–चिरं नंदेति वादिभिः ॥ १५७ ॥

जेने राज्य आपशे ते राजा हो ! एम कहेता एवा प्रधानोए पंच दीव्यने प्रकट करीने छुटुं मूक्युं ॥ १५२ ॥ पोतानी मरजी प्रमाणे नगरमां वीचरता एवा ते पंच दीव्यनी आगल क्षत्रीय मंत्री अने ब्राह्मणोना शृंगारधारी कुमारो चालता हता ॥१५३॥ नगरनी अंदर राज्य योग्य कोई पुरुषने नहि पामवाथी ते पंच दीव्य नगरथी बहार ज्यां गयुं के ज्यां राजपुत्र मूलदेव सूतो हतो ॥१५४॥ ते मूलदेवने जोइने अश्वे खुंखारो कर्यो अने मेघनी पेठे गर्जना करती हाथणीए सुंढवडे उपाडीने ते मूलदेवने पोताना स्कंध उपर बेसार्यो ॥१५५॥ वली ते बे चामरोवडे वीजावा लाग्यो अने छत्र मस्तक उपर वीस्तार पाम्युं. वली झारी नवा अतीथी-रूप ते मूलदेवने अर्घ आपवा लागी ॥१५६॥ वली मुकुटोवडे पृथ्वीपीठनो स्पर्श करता समस्त मोटा सामंतोए, दीर्घकाल सुधी आनंद पामो ? एम बोलता छतां तेने नमस्कार कर्यो ॥१५७॥ पछी हारबंध उभा रहेला माणसोना समूहनां नेत्रोथी निर्माण

श्रेणिस्थजनतानेत्र–निर्मितांभोजतोरणे ॥ प्राविशन्नगरे मूल–देवो देवेंद्रलीलया ॥ १५८ ॥
सभासीनः स सामंतैः, साम्राज्यायाभ्यषिच्यत ॥ अंतर्हिता तदा सैवं, बभाषे व्योम्नि देवता॥१५९॥
रेमे यः किल राजकुंजरकुले गौडेषु गर्जस्ततः । सत्क्रीडाभिरवंतिभूपतिसभां संशोभयामास यः ॥
दानोदारमतिर्यतिद्विपकरे योऽयोजयत् स्वं करम्। सत्यं सोऽयमनेकपो विजयते श्रीमूलदेवो नृपः॥१६०॥
ततः स भूपतिस्ताय–मानो जनकवत्प्रजाः ॥ अवंतीशेन सौहार्दं, चक्रे चक्रेश्वरः श्रिया ॥ १६१ ॥
सोऽथ निर्घृणशर्माख्यो, विप्रस्तत्र समाययौ ॥ दत्त्विष्टस्यैव तद्वास–ग्रामं तस्मै ददौ नृपः ॥ १६२ ॥

करेल। कमलोना तोरणवाला नगरने विषे मूलदेवे इंद्रना सरखी शोभाथी प्रवेश कर्यो ॥१५८॥ पछी सामंतोए सभामां बेठेला ते मूलदेवने साम्राज्यपदनो अभिषेक कर्यो. ते वखते आकाशमां गुप्तपणे उभी रहेली तेज देवी कहेवा लागी के–॥१५९॥ निश्चे जेणे गौडदेशमां गर्जना करता राजाओने विषे कुंजर (हाथी) समान थइ राजाना कुलने विषे क्रीडा करी छे. त्यार पछी जेणे उत्तम क्रीडाये करीने अवंती राजानी सभाने उत्तम रीते शोभावी छे. वली दान आपवामां उदार बुद्धिवाला जेणे साधु रूप हाथीना हस्तने विषे पोतानो हाथ जोडयो हतो. अर्थात् जेणे मुनिने बाकलानुं दान आप्युं हतुं ते आ खरेखर अनेक जीवोनुं पालन करनारो मूलदेव राजा विजयवंतो वर्ते छे ॥ १६० ॥ पछी संपत्तिथी चक्रवर्ति सरखा ते मूलदेवे पितानी पेठे प्रजानुं रक्षण करता छतां अवंतीपतिनी साथे मित्रता करी ॥ १६१ ॥ ते निर्घृणशर्मा ब्राह्मण पण त्यां आव्यो एटले राजाए

तदानीं देवदत्तापि, मूलदेवविडंबनाम् ॥ साक्षान्निरीक्ष्य चुक्रोशा–चलं क्रोशायतस्वरा ॥ १६३ ॥
रे त्वया किमुदूढास्मि, यन्नान्यमिह मृष्यसि ॥ धनांध मद्गृहं मुंच, नो चेत्त्यक्ष्यसि जीवितम् ॥१६४॥
तन्निर्वास्य गृहाद्देव–दत्ता गत्वोपभूपतिम् ॥ अयाचत प्रसादं तं, न्यासीकृतवरं तदा ॥ १६५ ॥
ददामि ते किमित्युक्त–वति भूभृति सा जगौ ॥ मूलदेवं विना स्वामि–न्न प्रसाद्यः पुमान् मम॥ १६६॥
कुपितेव ब्रवाणासि, किमित्युक्ता नृपेण सा ॥ जगादाचलदुर्वृत्तं, ज्वलत्यशनिवत्क्रुधा ॥ १६७ ॥

दूरनुंज तेनुं निवास गाम तेने आप्युं ॥ १६२ ॥ हवे ते वखते मूलदेवनी विडंबनाने प्रत्यक्ष जोइने मोटो आक्रोश करती देवदत्ता पण अचलने तिरस्कार करवा लागी के–॥ १६३ ॥ अरे ! तुं शुं मने परण्यो छे? जे बीजाने अहिं सहन करी शकतो नथी ? हे धनांध ! मारां घरने त्यजी दे. नहिं तो तुं जीवितने त्यजी दइश. अर्थात् मृत्यु पामीश ॥ १६४ ॥ एम अचलने तिरस्कार पूर्वक घरथी काढी मुकीने देवदत्ताए राजा पासे जइने ते वखते पोते थापण तरीके मूकेला वरदानरूप ते प्रसादने माग्यो ॥ १६५ ॥ "हुं तने शुं आपुं ?" एम राजाए कह्युं एटले देवदत्ताए कह्युं के–हे स्वामिन ! मूलदेव विना मारे बीजो कोइ पुरुष प्रसाद करवा योग्य नथी. अर्थात् मूलदेव विना हुं बीजा कोइ साथे बोलवा इच्छती नथी ॥ १६६ ॥ 'तुं क्रोध पामेलानी पेठे केम बोले छे?' एम राजए पूछ्युं एटले देवदत्ताए क्रोधथी वज्रनी पेठे बळता छनां अचलनुं दुराचरण कही संभळाव्युं ॥ १६७ ॥ पछी राजाए अचलने

अथाहुयाचलं भूपो–ऽभ्यधात् किं रे पुरे मम ॥ नेतासि कुरुषे येन, निग्रहानुग्रहौ स्वयम् ॥१६८॥
असूयन्मूलदेवाय, त्वं वध्योऽसीति भाषिणः ॥ भूपालव्यालतः सैव, कथंचन ररक्ष तम् ॥१६९॥
मद्दृष्टौ तमनानीय, मायासीरिति भूभुजः ॥ आज्ञौषधं पुराद्व्याधि–मिव तं निरवासयत् ॥१७०॥
मूलदेवं ततोऽन्वेष्टुं–मचलः प्रचचाल सः ॥ न तु क्वचन तं प्राप, निपुण्य इव शेवधिम् ॥१७१॥
दध्यौ च मूलदेवोऽपि, रहितं देवदत्तया ॥ श्यामया तारया चक्षु–रिव राज्यं वृथा मम ॥१७२॥
कलाः पंचदशायांति, यांति वा चंद्रमंडलम् ॥ एका पुनर्ध्रुवा तिष्ठे–न्न चंद्रस्तां विना यतः ॥१७३॥

बोलावीने कह्युं के–अरे ! मारा नगरमां शुं तुं धणी छे ? जे पोते निग्रह तथा अनुग्रह करे छे ? ॥ १६८ ॥ मूलदेव उपर इर्ष्या करतो तुं वध करवा योग्य छे, एम कहेता एवा राजारूप सर्पथी ते देवदत्ताएज अचलने महाकष्टथी बचाव्यो ॥ १६९ ॥ मूलदेवने लाव्या विना मारी नजर आगल न आवीश, एम राजाए आज्ञारूप ओषध पाइने व्याधि (रोग) नी पेठे ते अचलने नगरमांथी काढी मूक्यो. ॥ १७० ॥ पछी ते अचल मूलदेवने शोधवा चाल्यो, परंतु अपुण्य माणस निधानने जेम न पामे तेम मूलदेवने क्यांइ पाम्यो नहीं. ॥१७१॥ वली अहिं मूलदेव पण विचार करवा लाग्यो के–श्याम तारा (कीकी) विनानां नेत्रनी पेठे देवदत्ता सुंदरी विनानुं मारुं राज्य वृथा छे. ॥ १७२ ॥ पंदर कलाओ चंद्रमंडलप्रत्ये आवे छे अथवा जाय छे, परंतु एक कला तो निश्चल रहे छे, कारण चंद्र तेना विना रही शकतो नथी. ॥१७३॥ एज प्रमाणे मारां मन प्रत्ये कइ कइ स्त्री आवी गइ नथी ?

एवं मम मनः का का, कामिनी नागता गता ॥ तस्थौ सा तु स्थिरीभूय, न मनस्तां विना यतः ॥१७४॥
सोऽथ दूतमुखेनैव–मवंतीश्वरमालपत् ॥ चौरी मच्चेतसो देव–दत्ता वसति ते पुरे ॥१७५॥
तामत्र प्रेषयेर्येन, निबिडस्नेहबंधनाम् ॥ रुणध्मि स्वमनोगुप्तौ, नान्यस्तस्या हि निग्रहः ॥१७६॥
ज्ञात्वा तदाशयं प्रैषी–त्तां ततोऽवंतीनायकः ॥ देवतादत्तसाम्राज्यः, स ह्यनुलंघ्यशासनः ॥१७७॥
देवदत्ता रथारूढा ययौ बेनातटं पुरम् ॥ प्रावेश्यत च भूपेनां–तःपुरं परमोत्सवैः ॥१७८॥
वियोगचित्रातापार्त्ता, चिरात्प्राप्य हृदीश्वरम् ॥ स्वात्यंभ इव सस्यश्रीः,सापि प्रोल्लासमासदत् ॥१७९॥

वली ते देवदत्ता तो स्थीर थइने रही छे. कारण तेना विना मारुं मन स्थिर रहेतुं नथी. ॥१७४॥ पछी ते मूलदेवे दूत मुखथी अवंतीपतिने कहेवराव्युं के–मारां चित्तने हरण करनारी देवदत्ता तमारा नगरमां वसे छे. ॥ १७५ ॥ गाढ स्नेह बंधनवाली ते देवदत्ताने अहिं मोकली आपो के, जेने पोतानां मनरूप केदखानामां पुरी मूकुं. कारण तेने बीजो कोइ निग्रह नथी. ॥१७६॥ पछी अवंतीपतिए तेना आशयने जाणीने देवदत्ताने मोकली आपी. कारण के–देवताए आपेला साम्राज्य पदवाला ते मूलदेव राजानो हुकम उल्लंघन करी शकाय एवो नहोतो. ॥ १७७ ॥ रथमां बेठेली देवदत्ता पण बेनातट नगरे गइ अने त्यां राजाए मोटा उत्सवथी तेने अंतःपुरमां प्रवेश कराव्यो. ॥ १७८ ॥ धान्य संपत्ति स्वातिनां पाणीने पामीने जेम हर्ष पामे तेम वियोग-रूपी चित्राना तापथी पीडा पामेली ते देवदत्ता पण घणे वखते पोताना प्राणनाथने पामीने हर्ष पामी. ॥ १७९ ॥ हवे

इतश्च भृतभांडोऽगा–द्चलः पारसं तटम् ॥ आत्ततद्भांडसंभारः–प्राप बेनातटं पुरम् ॥१८०॥
उपादायामुपादाय, स्थालं रत्नौघपूरितम् ॥ उपतस्थे महीनाथं, सोऽथ द्वास्थनिवेदितः ॥१८१॥
दूरादवनतं प्रीति–प्रांजलं पटुचेतनः ॥ अचलोऽयमिति क्षिप्रं, क्षितीशस्तमलक्षयत् ॥१८२॥
मूलदेवं तु भूपालं, नोपलक्षयतिस्म सः ॥ को लक्षयति वैशाखे, शाखिनं फाल्गुनेक्षितम् ॥१८३॥
अजानतेव भूपेन, पृष्टे तस्याभिधादिके ॥ उच्छ्वसन्निव हर्षेण, स्ववृत्तमचलो जगौ ॥१८४॥
वदनस्थितहर्षेण, हृदि न्यासीकृतक्रुधा ॥ शुल्कार्द्धीकरणाच्चक्रे, प्रसादस्तस्य भूभुजा ॥ १८५ ॥

एवामां वासण भरीने अचल पारस तट नामना नगरे गयो. अने त्यांथी त्यांना वासणो भरीने बेनातट नगरे आव्यो. ॥१८०॥ पछी अचले भेटमां रत्नसमूहथी भरेलो थाल लईने द्वारपाले निवेदन कर्यो थको राजा पासे गयो. ॥ १८१ ॥ त्यां चतुर मनवाला राजा मूलदेवे दूरथी नमेला अने प्रीतिथी हाथ जोडी रहेला तेने ‘ आ अचल छे. ’ एम तुरत ओलख्यो. ॥ १८२ ॥ वली अचल तो मूलदेव राजाने ओलखी शक्यो नहि. कारण फागण मासमां जोयेला आंबाना वृक्षने वैशाख मासमां कोण ओलखी शके ? ॥ १८३ ॥ पछी अजाणनी पेठे राजाए तेनुं नाम विगेरे पूच्छयुं एटले हर्षथी उत्साह पामवानी पेठे अचले पोतानुं वृत्तांत कही दीधुं. ॥ १८४ ॥ मुख उपर रहेला हर्षवाला अने हृदयमां धारण करेला क्रोधवाला राजा मूलदेवे अर्धुं दाण माफ करवाथी ते अचल उपर प्रसाद कर्यो. ॥ १८५ ॥ अमारी दाण चोरीथी प्राणांत एवी पण शिक्षा कराय छे.

अस्माकं दानचौर्येण, स्यात्प्राणांतोऽपि निग्रहः ॥ शेषार्द्धे न ततश्छद्म, विधेयमिति चोच्यते ॥१८६॥
दानमंडपिकां गत्वा, वस्तुभांडान्यदर्शयत् ॥ यावत्पंचकुलायासौ, तावत्तत्रमाययौ नृपः ॥१८७॥
तव किं शुल्कनिर्वाहो–ऽभवन्नो चेत्करोम्यहम् ॥ इत्युक्ते भूभुजा हर्षा–द्रचलो द्विगुणोऽभवत् ॥१८८॥
स्वामिन् तव प्रसादेन, मंक्षु पंचकुलं मम ॥ सर्वं निर्वाहयामास, शुल्कमेव मुवाच सः ॥१८९॥
अथ भ्रूसंज्ञया राज्ञा, शौल्किकाः प्रगुणीकृताः ॥ मर्माणीव पुनस्तस्य, वस्तुभाडान्यशोधयत् ॥१९०॥
राज्ञोचे भो किमिक्षध्वे, मृषाभाषी हि नाचलः ॥ तथापि यदि संदेहो, दार्यतां भांडवस्तु तत् ॥१९१॥

माटे शेष बाकी रहेला अर्द्ध भागमां छल करवुं जोइए नहीं, एम तने कहेवाय छे. ॥ १८६ ॥ पछी जेटलामां ए अचल दाणनी मांडवीए जईने दाण लेनाराने वस्तु पात्र विगेरे देखाडतो हतो तेटलामां त्यां राजा आव्यो. ॥ १८७ ॥ तारो दाणनो निकाल शुं थयो ? जो न थयो होय तो हुं करुं ? एम राजाए कह्युं एटले तो अचल हर्षथी फुलाइ गयो. ॥ १८८ ॥ 'हे स्वामिन् ! तमारी कृपाथी दाण लेनाराए तुरत मारुं सर्व दाण तपासी लीधुं छे.' अचले एम दाण कही बताव्युं. ॥ १८९ ॥ पछी राजाए भ्रकुटीनी संज्ञाथी दाण लेनाराने संकेत कर्यो एटले तेओ फरीथी मर्मने जोता होयनी ? एम तेनां वस्तु पात्रने जोवा लाग्या. ॥ १९० ॥ राजाए कह्युं. अरे ! तमे शुं जूओ छो ? निश्चे अचल जूठुं बोलनार न होय. तो पण जो तमने संशय होय तो पात्र वस्तु खुली करीने जूओ. ॥ १९१ ॥ दाणवालाओए ते प्रमाणे कर्युं एटले बहारथी असार देखाता वस्तु पात्रथी

तैस्तथा विहिते वस्तु—भांडाद्बहिरसारतः ॥ गुप्तं तस्यांतरात्मेव, सारं वस्तु विनिर्ययौ ॥ १९२ ॥
अथ रोषेण संहार—रुद्ररौद्रवपुर्नृपः ॥ सर्वं वस्तु स्वमुद्रांकं, कृत्वाचलमबंधयत् ॥ १९३ ॥
वस्तुव्ययेन चेन्मुच्ये, जीवं तद्भाग्यवानहम् ॥ चिंतयेति चकंपेऽसौ, झंझयेव जरद्गवः ॥ १९४ ॥
क्ष्मापः स्वभवनं प्राप, नीतो बद्धः स चाग्रतः ॥ किमेवं कुरुषे कूट—मित्युक्तो भूभुजाभ्यधात् ॥१९५॥
विश्वस्तवंचनं माया—रचनं वचनं मृषा ॥ गुरून् विनापि विद्येयं, वणिजां स्यादयत्नजाः ॥ १९६ ॥
अधीते यत्किंचित्तदपि मुषितुं ग्राहकजनं । मृदु ब्रूते यद्वा तदपि विवशीकर्तुमपरम् ॥

संताडेली तेना अंतरात्मानी पेठे सार वस्तु निकली. ॥ १९२ ॥ पछी क्रोधथी संहाररुद्रना सरखा भयंकर शरीरवाला राजाए सर्व वस्तुने पोतानी मुद्रायुक्त करीने अचलने बंधाव्यो. ॥ १९३ ॥ जो सर्व वस्तुने आपी देवाथी जीवतो छुकाउं तो हुं भाग्यवान. एवी चिंताथी ए अचल तोफानी पवनथी वृद्ध बलदनी पेठे कंपवा लाग्यो. ॥ १९४ ॥ राजा पोताने राजमंदिरे गयो अने ते अचलने तो बांधीने आगलथी मोकलावी दीधो हतो. त्यां 'तुं आवुं कपट केम करे छे?' एम राजाए पूछयुं एटले ते अचल कहेवा लाग्यो के—॥ १९५ ॥ विश्वासवालाने छेतरवुं, माया रचवी, जूठुं वचन कहेवुं. गुरु विना पण आ विद्या वाणीयाओने यत्न विना प्राप्त थयेली होय छे. ॥ १९६ ॥ जे कांइ भणे छे ते पण ग्राहकजनने ठगवा माटे, अथवा जे मधुर बोले छे ते पण बीजाने वश करवा माटे, वली जे कांइ आपे छे ते पण अधिक लेवा माटे. अहह ! वाणीयाओनो आ कोइ पण

प्रदत्ते यत्किंचि त्तदपि समुपादातुमधिकम् । प्रपंचोऽयं वृत्तेरहह गहनः कोऽपि वणिजाम् ॥१९७॥ इत्युक्तवंतमंतस्थ–भयं तमनुयुक्तवान् ॥ किं भो प्रत्यभिजानासि, मां न वेत्ति नरेश्वरः ॥ १९८ ॥ को वेत्ति भानुवन्न त्वां, नत्वा तेनेति भाषिते ॥ भूपोऽभ्यधत्त चाटूनि, मुंच जल्प यथा-तथम् ॥ १९९ ॥ तर्हि सम्यग् न जानामी–त्युक्तवत्यचले भिया ॥ साक्षादिव श्रियं देव–दत्ता मानययन्नृपः ॥ २०० ॥ ह्रीणस्तां वीक्ष्य तं जानन् । मूलदेवमिलापतिम् ॥ संजाताद्विगुणातंको, बभाषे भूभुजाचलः ॥ २०१ ॥ मुंचेः कदापि मामेवं, त्वया प्रोक्तं तदा ततः ॥ प्राप्तोऽपि निग्रह-स्थानं, मया संप्रति मुच्यसे ॥ २०२ ॥ अथ श्लथितबंधस्य, तस्य प्रत्यार्पयन्नृपः ॥ समस्तमपि

आजीविकानो गहन प्रपंच छे. ॥ १९७ ॥ ए प्रमाणे कहेता अने अंतरमां भय पामता ते अचलने राजा मूलदेवे 'अरे तुं मने शुं ओळखे छे ? अथवा नथी ओळखतो ?' एम पूछयुं. ॥ १९८ ॥ 'सूर्यनी पेठे तमने कोण न जाणे' एम तेणे नमन करीने कह्युं एटले राजाए कह्युं के–तुं मिथ्या स्तुति करनारां वचनने मूकी दे अने जे होय ते सत्य कहे. ॥ १९९ ॥ 'तो हुं बराबर नथी जाणतो.' एम भयथी अचले कह्युं एटले राजा मूलदेवे साक्षात् लक्ष्मीना सरखी देवदत्ताने त्यां बोलावी. ॥ २०० ॥ ते देवदत्ताने जोइने लज्जा पामेला अने पृथ्वीपति ते मूलदेवने जाणवाथी बमणा त्रासने पामेला अचलने राजाए कह्युं. ॥२०१॥ 'कोइ वखते मने मूकी देवो.' एम ते वखते तें कह्युं हतुं, तेथी निग्रहस्थानने अर्थात् मरणांत शीक्षाने प्राप्त थयो छतां पण हुं हवणां तने मूकी दउंछुं. ॥ २०२ ॥ पछी राजा मूलदेवे बंध छोडी नाखेला ते अचलने सघली एवी पण तेनी वस्तु पाछी

तद्वस्तु, न संतश्छलघातिनः ॥ २०३ ॥ व्यजिज्ञपन्नृपं सार्थ–नाथो नाथ तथा कुरु ॥ यथावंतीश्वरोऽवंत्यां, प्रवेशं मेऽनुमन्यते ॥ २०४ ॥ पृथिवीपुरुहूतोऽथ, दूतं तस्मै ददौ निजम् ॥ दूतोक्त्यावंतीनाथोऽपि, तमवंत्यामवीविशत् ॥ २०५ ॥ अथान्यदा मूलदेवं, महीनाथं सदःस्थितम् ॥ एत्य व्यजिज्ञपत् पौरा–श्चौराकुलितचेतसः ॥ २०६ ॥ यच्छास्त्रेषु श्रुतं पूर्वं, न तु प्रत्यक्षमीक्षितम् ॥ तद्देव चौर्यमद्यस्वः, पुरे तव भवत्यहो ॥ २०७ ॥ समं समस्तशृंगारै–श्चौरै राज्ञे धनेऽधुना ॥ निर्ग्रंथेभ्यः परं वेणि–श्मश्रुणास्माकमस्ति भित् ॥ २०८ ॥ तद्देवो यततामस्मा–

आपी. कारण संत पुरुषो छलथी बीजानो घात करनारा होता नथी. ॥ २०३ ॥ पछी अचले राजाने विनंति करी के-हे नाथ ! तमे तेवुं करो के–जेवी रीते अवंतीपति अवंतीमां मने प्रवेश करवा आपे. ॥ २०४ ॥ पछी पृथ्वीना इंद्ररूप मूलदेवे पोतानो दूत तेनी साथे मोकल्यो. अने दूतनां वचनथी अवंतीपतिए पण तेने अवंतीमां प्रवेश करवा दीधो. ॥ ५ ॥ पछी कोइ वखते चोरथी व्याकुल चित्तवाला नगरवासी लोकोए आवीने सभामां बेठेला पृथ्वीपति मूलदेवने विनंति करी के–॥२०६॥ हे देव ! आश्चर्य छे के–शास्त्रने विषे पूर्वे जे सांभली छे, परंतु प्रत्यक्ष जोयेली नथी ते चोरी आजकाल तमारा नगरने विषे थाय छे. ॥ २०७ ॥ चोरो सर्व आभूषणो सहित धन चोरी जवाथी हवणां अमने निर्ग्रंथो (निर्धनो)थी शिखा तथा दाढी मुच्छवडे घणो भय छे. ॥ २०८ ॥ माटे आप आ चोरना संकटथी अमारुं रक्षण करो. वली रक्षण माटे अथवा सुखे निवास

नस्मात्तस्करसंकटात् ॥ त्रातुं ददातु वा स्थानं, सुखवासाय किंचन ॥ २०९ ॥ अथ भूपः स्फुरत्कोपः, प्रोवाचारक्षकानिति ॥ रे पुरे चोरिका केयं, भवत्सु प्रभवत्स्वपि ॥ २१० ॥ ते प्रोचुरेक एवासौ, चौरोऽस्ति न तु भूरयः ॥ परं स दुर्ग्रहोऽस्माकं, मनः क्लीवात्मनामिव ॥ २११ ॥ स चौरो दैत्यवक्रूरो, न लेभे न च लप्स्यते ॥ अस्ति नः केवलं रात्री–जागरो रोगवृद्धये ॥ २१२ ॥ नृपो दध्यावमीभिः किं, वराकैर्हत सिध्यति ॥ मयैव जेष्यते चौरः, श्रीरामेणेव रावणः ॥ २१३ ॥ माधत्त तस्करभयं, भवताद्भवतां धृतिः ॥ इत्युक्त्वा बहुमानेन, व्यसृजन्नागरान्नृपः ॥ २१४ ॥

करवा माटे कांइ स्थान आपो. ॥ २०९ ॥ पछी प्रगट थयेला क्रोधवालो राजा मूलदेव कोटवालोने आ प्रमाणे कहेवा लाग्यो के–अरे! तमे समर्थ छतां पण नगरमां आ चोरी शी? ॥ २१० ॥ ते कोटवालो कहेवा लाग्या के–हे देव! ए एकज चोर छे. पण घणा नथी. परंतु क्लीव (कायर) माणसोथी जेम मन वश थतुं नथी तेम अमाराथी ते चोर ग्रहण करी शकातो नथी. ॥२११॥ दैत्यना सरखो क्रुर ते चोर नथी मल्यो अने नहि मलशे–वली अमारे तो फक्त रात्रीनो उजागरो रोगवृद्धिने माटे छे.२१२ राजा विचार करवा लाग्यो के–अरे! आ रांकोथी शुं कार्य सिद्ध थाय? रामे रावणने जेम जीत्यो तेम हुं पोतेज ए चोरने जीतीश. ॥ २१३ ॥ तमे चोरनो भय न राखो, पण धैर्य राखो. एम कहीने राजाए बहु मानथी नगरवासीओने रजा आपी.

स्वयं च सायमाधाय, सहायमिव साहसम् ॥ नीलांबरधरो ध्वांता-धिदैवतामिवाचलत् ॥२१५॥
भ्रमन् पुरेऽभितो वीक्षां-चक्रे वक्रेण चक्षुषा ॥ चौरं क्वापि न तु प्राप, क्ष्मापः पापमिवोत्तमे ॥२१६॥
भ्रमं भ्रमं श्रमात् खिन्न-मना देवकुले क्वचित् ॥ अनाथ इव भूनाथः, शिश्ये कपटनिद्रया ॥२१७॥
पाप प्रचंडदोर्दंडो, मंडिकस्तस्कराग्रणीः ॥ तावत्तत्रायय़ौ रक्ष-इव भ्राम्यंस्तमोबलात् ॥२१८॥
प्रभुः प्रेष्यमिव क्ष्मापं, घृष्ट्वा सावज्ञमंह्रिणा ॥ सोऽजागरयदूचे च, कोऽसि त्वमिति दुर्मतिः ॥२१९॥
अकालचर्यया चौरं, ज्ञात्वा तं नृपतिः कृती ॥ शाठयादूचे जन्मदुःस्थो, मठेऽस्मिन् शयितोऽस्म्य-

॥ २१४ ॥ अने पोते सांज वखते सहायनी पेठे साहसने धारण करी कालां वस्त्र पहेरवा पूर्वक अंधकारनी अधिष्ठायक देवी-नी पेठे चाली निकल्यो. ॥ १५ ॥ नगरमां भमता एवा तेणे चारे तरफ वांकां नेत्रथी जोयुं, परंतु उत्तम पुरुषने विषे पापनी पेठे क्यांइ पण चोरने न पाम्यो. ॥ २१६ ॥ भमता भमता श्रमथी खेद पामेला मनवालो राजा मूलदेव अनाथनी पेठे कोइ देवमंदिरमां कपट निद्राथी सूतो. ॥ २१७ ॥ तेटलामां पापथी प्रचंड भुजावाळो चोराधिपति परिव्राजक घणुं अंधारुं होवाथी राक्षसनी पेठे भमतो भमतो त्यां आव्यो. ॥ २१८ ॥ राजा चाकरने जेम घसडे तेम ते चोरे राजाने अवज्ञापूर्वक पग खेंचीने जगाड्यो अने अरे दुर्मति ! तुं कोण छे ? एम पूछ्युं. ॥ २१९ ॥ पुण्यवंत एवो राजा तेने अवसर विना फरतो होवाथी चोर जाणीने कपटथी कहेवा लाग्यो के-जन्म दरिद्री एवो हुं आ मठमां सुतो छुं. ॥ २२० ॥ कुवामां न्हावुं, अन्नक्षेत्रमां

हम् ॥ २२० ॥ स्नानं कूपेऽशनं शत्रा–गारे स्वापः पुनर्मठे ॥ धिग् दैवं यद्दरिद्राणा–मपि लोके जिजीविषा ॥ २२१ ॥ चौरः प्रोचे मयि प्राप्ते–प्येवं भोः किमु खिद्यसे ॥ हस्तस्थिते सुरमणौ, का दारिद्र्यविहस्तता ॥ २२२ ॥ वत्सागच्छ मया साकं, यदि संपदमिच्छसि ॥ इत्युक्त्वा तं सहादाय, सोऽचलच्छललोचनः ॥ २२३ ॥ लक्ष्मीलीलारविंदेऽसौ, कस्यापीभ्यस्य मंदिरे ॥ दत्तखात्रो मणिस्वर्ण–पेटा प्राची कटद्बहिः ॥२२४॥ दृष्ट्वा तच्चेष्टितं दष्टा–धरोऽपि क्ष्मापतिः क्रुधा ॥ तन्मूलस्थानजिज्ञासुः, प्रतिचक्रे न किंचन ॥ २२५ ॥ पेटा उवाह वाहीक–इव ता स्तद्गिरा नृपः ॥ कार्य

खावुं, वली मठमां सूवुं, दैवने धिक्कार थाओ जे एम छतां दरिद्रीओने पण लोकमां जीववानी आशा होय छे. ॥ २२१ ॥ चोरे कह्युं. अरे ! हुं अहिं प्राप्त थया छतां पण आ प्रमाणे तुं केम खेद करे छे ? चिंतामणी रत्न हाथमां आव्ये छते दारिद्र्यपणानी व्याकुलता केम रहे ? ॥ २२२ ॥ हे वत्स ! जो तुं संपत्तिने इच्छतो होय तो मारी साथे चाल. एम कहीने तेने साथे लईने छलनेत्रवालो ते चोर त्यांथी चाल्यो. ॥ २२३ ॥ ए चोरे लक्ष्मीने क्रीडा करवाना कमल समान कोइ एवा शेठनां घरने विषे खातर पाडीने मणि अने सुवर्णथी भरेली पेटीओ बहार काढी. ॥ २२४ ॥ चोरना ते चरित्रने जोइने क्रोधथी होठने डसता एवा पण राजा मूलदेवे तेना मूल स्थानने जोवानी इच्छाथी कांइ पण प्रतिकार कर्यो नहीं. ॥ २२५ ॥ राजाए चोरनां

सिध्यै शठा दस्यो–रपि दास्यं प्रकुर्वते ॥ २२६ ॥ भूपेनानुगतश्चौरो, निर्गत्य नगराद्बहिः ॥ क्रीडा स्थानं यमस्येव, जीर्णोद्यानं रयाद्यात् ॥ २२७ ॥ तत्र नानानिकुंजांतः, शिलाच्छन्नमुखं सुखम् ॥ स भुमीगृहमुद्घाटय, विवेश सह भूभुजा ॥ २२८ ॥ तत्रापश्यत्कनीमेकां, भूपो रूपवंती पुरः ॥ सर्वा अपि तिथी राकाः, कुर्वंती स्वमुखेंदुना ॥ २२९ ॥ तद्दर्शनसुधाकुंड–क्रीडया प्राप भूपतिः ॥ विहारभारजं स्वेदं, वमन् समधिकं सुखम् ॥ २३० ॥ न वयं तस्करा एत–त्तव दौःस्थ्यभिदे कृतम् ॥ तन्मुंच भारमित्युक्त–स्तेन पेटां नृपोऽमुचत् ॥ २३१ ॥ स्वसारं तत्समादाय, स्वसारं तां

वचनथी ते पेटीओ भार उचकनारानी पेठे उचकी. कारण शठ पुरुषो कार्यसिद्धिने माटे चोरना पण दासपणाने करे छे. ॥ २२६ ॥ राजा मूलदेवनी पाछल जतो चोर नगरथी बहार नीकलीने यमराजनां क्रीडास्थान सरखा जीर्णोद्यानमां वेगथी गयो. ॥ २२७ ॥ त्यां ते चोर नाना प्रकारना झाडोना जत्थानी अंदर शीलाथी ढंकायला मुखवाला भोयराने सुखे उघाडीने राजा सहित अंदर पेठो. ॥ २२८ ॥ राजाए त्यां सर्व पण तिथीओने पोतानां मुखचंद्रथी पुनम समान करती एवी एक रूपवाली कन्याने दीठी. ॥२२९॥ राजा तेना दर्शनरूप अमृतकुंडमां क्रीडा करवाथी होयनी ! एम चालवाथी अने भार-थी उत्पन्न थयेला परसेवाथी भींजायो छतो अधिक सुख पाम्यो. ॥ २३० ॥ अमे चोर नथी, परंतु में तारा दारिद्रथ-पणाने कापी नाखवा माटे आ कर्युं छे. माटे हवे भारने नीचे मूक. एम ते चोरे कह्युं एटले राजाए पेटीने नीचे मूकी. ॥२३१॥

मलिम्लुचः ॥ क्षालयास्यातिथेः पादा-वित्यादिक्षदलक्षधिः ॥ २३२ ॥ क्रौर्यनिर्जितकृत्याशा, कुकृत्याचरणे रता ॥ उपकूपतटं भूप-स्यासनं समतिष्टपत् ॥ २३३ ॥ तत्रासीनस्य सा राज्ञः, क्षालयंती मृदू पदौ ॥ विचक्षणा लक्षयंती, लक्षणानि व्यभावयत् ॥ २३४ ॥ निपात्यंतेस्म कूपेऽस्मिन्, ये पुरा तेऽपरे जनाः ॥ अयं लोकोत्तरः कोऽपि, पुनर्नरशिरोमणिः ॥ २३५ ॥ देया कामं निहत्यामुं, लक्षाणामुदरंभरिम् ॥ पताका पातकावासे, हा मया विश्ववामया ॥ २३६ ॥ जीवन्नसौ कदापि स्या-न्मम भर्तापि भाग्यतः ॥ यद्वा केयं दुराशा मे, क घुकी क च भास्करः ॥२३७॥

न जाणी शकाय एवी बुद्धिवाला चोरे ते धन लइने पोतानी बहेनने 'आ परोणाना बे पग धो' एम आज्ञा करी. ॥ २३२ ॥ क्रुरताथी राक्षसीने जीतनारी, अने कुकृत्य आचरवामां प्रीतिवाली ते बहेने कूवाना कांठानी समीपे राजानुं आसन नाख्युं. ॥ २३३ ॥ ते आसन उपर बेठेला राजाना कोमल पगने धोती अने लक्षणोने जाणती ते चतुर बहेन विचार करवा लागी. ॥ २३४ ॥ पूर्वे आ कूवामां जे पुरुषोने पाडी दीधा छे तेओ बीजा साधारण माणसो हता. वली आतो कोइ पण लोकमां उत्तम एवो नर शिरोमणि छे. ॥ २३५ ॥ अरे ! जगतने विषे अवला आचरणवाली मारे लाखोना पेट भरनारा आ पुरुषने मारीने पापरूप महेल उपर धजा चडाववा सरखुं करवुं छे. ॥ २३६ ॥ जीवतो एवो आ पुरुष कोइ वखते भाग्ययोग्यथी मारो भर्तार पण थाय. अथवा तो मारे आ खोटी आशा शी करवी ? कारण मारा सरखी घुवडी क्यां ? अने आ पुरुष

तथापि रक्षणीयोऽयं, माभूज्जगद्नायकम् ॥ ततस्तं सा जगौ याहि, याहि भो मा मृथा वृथा ॥२३८॥
जिघांसुः समये भूप-श्चौरं शूराग्रणीरपि ॥ अपासरत्ततः स्थानात्, त्वरितत्वरितैः पदैः ॥ २३९ ॥
रक्षितोऽयं मया मृत्योः रक्ष्यं स्वस्याथ दूषणम् ॥ ध्यात्वेति साथ पूच्चक्रे, गतः सैष ममाग्रतः ॥२४०॥
प्राप्तोऽहं रे क्व यासीति, प्रजल्पन् तस्कराधमः ॥ कंकखड्गं करे कृत्वा, दधावे तस्य पृष्ठतः ॥२४१॥
वीक्ष्यायान्तमुदस्त्रं तं-भुत्युत्थामिव वृश्चिकम् ॥ चत्वरस्थं शिलास्तंभ-मवष्टंभ्य नृपः स्थितः ॥२४२॥

सरखो सूर्य क्यां ? ॥ २३७ ॥ तो पण आ रक्षण करवा योग्य छे, कारण जगत नायक विनानुं न हो. एम विचारीने पछी ते बहेन मूलदेव राजाने कहेवा लागी के-अरे पुरुष ! नासी जा, नासी जा. तुं वृथा मृत्यु न पाम. ॥ २३८ ॥ शूरवीर पुरुषोमां अग्रेसर एवोय पण राजा मूलदेव अवसरे चोरने मारवानी इच्छा करतो छतो ते स्थानकथी उतावले उतावले पगले पाछो फर्यो. ॥ २३९ ॥ में एने मृत्युथी बचाव्यो. हवे मारे पोताना दूषणनुं रक्षण करवुं. एम विचारीने तेणे पोकार कर्यो के-ते आ पुरुष मारी आगलथी नासी गयो. ॥ २४० ॥ अरे ! हुं आ आव्यो, तुं क्यां जाय छे ? एम बोलातो एवो अधम चोर हाथमां कंकखड्ग लइने तेनी पाछल दोडयो. ॥ २४१ ॥ राखथी उत्पन्न थयेला विछिनी पेठे उगामेला शस्त्रवाला आवता ते चोरने जोइने राजा मन्नेव चाचर (चोक) मां रहेला पत्थरना स्तंभनो आश्रय लइने उभो रह्यो ॥ २४२ ॥

कोपांधिताक्षश्चौरोऽपि, समुपेत्य पुमानिति ॥ भ्रांत्या खड्गेन कदली–कांडवत् स्तंभमच्छिनत् ॥२४३॥
तस्मिन्निवृत्ते चौराति–निवृत्तात्मा नरेश्वरः ॥ निजं निवासमासाद्य, निशाशेषमतीयिवान् ॥ २४४ ॥
क द्रक्ष्यामि पुनश्चौर–मितिजातकुतुहलः ॥ राजा विनिर्ययौ राज–पाटिकाव्याजतः प्रगे ॥ २४५ ॥
नृपो दिक्षु क्षिपंश्चक्षु–रपश्यत् पश्यतोहरम् ॥ तमेव नूत्नकृत्कर्म, कुर्वाणं दौष्पिकापणे ॥ २४६ ॥
राजा रजनि दृष्टत्वात्, लक्षयामास तं क्षणात् ॥ आह्वयामास च निजैः, पुरुषैः सदनं गतः॥२४७॥
सशल्य इव सारांकः, सोऽपि भूपांतिकं ययौ ॥ व्रणीव निविडं बद्ध–पटकः स्वांगसंधिषु ॥ २४८ ॥

क्रोधथी आंधला थयेला नेत्रवाला चोरे पण स्तंभनी पासे आवीने "आ पुरुष छे." एवी भ्रांतीथी खड्ग वडे केलना स्तंभनी पेठे ते पत्थरना स्तंभने कापी नाख्यो. ॥ २४३ ॥ पछी ते चोर पाछो गयो एटले चोरनी प्राप्ती थवाथी अर्थात् चोरनी खबर मलवाथी निरांत पामेला मनवाला राजा मूलदेवे पोताना निवास भुवने आवीने बाकीनी रात्री निर्गमन करी. ॥ २४४ ॥ "हुं फरी चोरने क्यां जोउं" एम कुतुहलने पामेलो राजा सवारमां रयवाडीना मीषथी बहार निकल्यो. ॥२४५॥ दिशाओमां नेत्रने फेंकता अर्थात् चारे तरफ जोता एवा राजाए कापडवालानी दुकाने तेवां कर्म करता तेज चोरने दीठो. ॥ २४६ ॥ राजाए रात्रीए दीठेलो होवाथी क्षणमात्रमां तेने ओलखी काढ्यो. वली सभामां गयेला तेणे पोताना पुरुषो मोकली तेने तेडाव्यो. ॥ २४७ ॥ शल्यवालानी पेठे शंका सहित एवो ते चोर पण अंगे गुमडा निकल्यानी पेठे पोतानां अंगना सांधाने विषे

अंतः संयमितक्रोध—स्तं नमंतं निजांतिके ॥ निवेश्य नृपतिः प्रोचे, मृदुवाचा वयस्यवत् ॥ २४९ ॥
स्वां जामिं देहि भो मह्यं, सा हि देयैव कस्यचित् ॥ तच्छ्रुत्वा वज्रघातेने—वाकुलो सो व्यचिंतयत्॥२५०॥
रंकवन्मिलितो यो मे, निशि सोऽयं महीपतिः ॥ जीवन् यदि तदामुक्त—स्तद्यथेष्टं विचेष्टताम् ॥२५१॥
प्रस्ताववेद्यथो चौरो—ऽवदत्किमिदमुच्यते ॥ आस्तां कन्या त्वमेवासि, सर्वस्वस्यापि नः प्रभुः॥२५२॥
तेन दत्तां ततो भूमान्, कन्यकां परिणीय ताम् ॥ प्रसादपात्रमकरोत्, कृतज्ञाः किल तादृशाः॥२५३॥
मंडिकस्य महामात्य—पदवीं प्रददौ नृपः ॥ पोषयंति द्विषं छाग—मिव छेका जिघांसवः ॥ २५४ ॥

मजबुत पाटा बांधीने राजानी पासे गयो. ॥ २४८ ॥ मनमां क्रोधने दबावी राखता राजाए नमन करता ते चोरने पोतानी पासे बेसारीने मित्रनी पेठे कोमल वाणीथी कह्युं. ॥ २४९ ॥ अरे ! तुं पोतानी बहेन मने आप. कारणके—ते तारे कोइने आपवा योग्य छेज, राजानां ते वचन सांभली वज्रप्रहारनी पेठे व्याकुळ थयो छतो ते चोर विचार करवा लाग्यो. ॥ २५० ॥ रात्रीने विषे मने जे रांकना सरखो मल्यो हतो ते आ राजा हतो. जो ते वखते जीवतो मूक्यो तो हवे ते मरजी प्रमाणे आचरण करो. ॥ २५१ ॥ पछी अवसरनो जाण चोर कहेवा लाग्यो. तमे आ शुं बोलो छो ? भले तमारी कन्या हो. कारण तमेज अमारा सघला धनना पण स्वामी छो. ॥ २५२ ॥ पछी राजा मूलदेव चोरे आपेली कन्याने परण्यो. अने चोरने प्रसाद पात्र कर्यो. निश्चे कृतज्ञ पुरुषो तेवा होय छे. ॥ २५३ ॥ वली राजाए ए मंडिक चोरने मोटा प्रधाननी पद्वी आपी. कारणके—

प्रणाल्येव द्रुमः कूप–स्यांभस्तस्याखिलं धनम् ॥ अग्राहयत्तया पत्न्या, तत्तत्कार्यमिषान्नृपः ॥२५५॥
अन्यदा कियदद्यापि, बंधोस्ते विद्यते धनम् ॥ इत्युक्ता भूभुजा सावग्, निःस्वोऽथायमभूदिति॥२५६॥
ततो विडंब्य निविडं, भुजानि निजघान तम् ॥ अचिरेण विपच्येत, चौर्यपापतरोः फलम् ॥२५७॥
सर्वं समर्प्य लोकानां, स्वस्वनामांकितं धनम् ॥ भुधनः पालयामास, भुवं वासवलीलया ॥ २५८ ॥
साम्राज्यं मूलदेवस्य, श्रुत्वा स्वप्नानुभावजम् ॥ स्वं स कार्पटिकोऽनिंदत्, सुस्वप्ने दुर्विचारणम्॥२५९॥
तस्मै स्वप्नाय शिष्येऽसौ, निशि व्यात्ताननो बहिः ॥ तन्मुखे वल्गुलीविष्टा, पपात न पुनः शशी॥२६०॥

शत्रुने हणवानी इच्छा करनारा चतुर पुरुषो बकरानी पेठे शत्रुने पोषण करे छे. ॥ २५४ ॥ वृक्ष कूवाना पाणीने नीकवडे जेम खेंची लहे तेम राजाए ते पोतानी स्त्रीवडे ते चोरनुं सघलुं धन ते ते कार्यना मिषथी ग्रहण करी लीधुं. ॥ २५५ ॥ कोइ वखते 'हजी पण तारा भाइने केटलुं धन छे?' एम राजाए पूछयुं एटले ते कन्याए 'हवे ए निर्धन थयो' एम कह्युं. ॥ २५६ ॥ पछी राजाए घणी विटंबना पमाडीने तेने मारी नाख्यो. कारण चोरीरूप पापवृक्षनुं फल थोडा वखतमां पाके छे. ॥ २५७ पछी राजा मूलदेवे लोकोने पोतपोतानां नाम नीशानवालुं सघलुं धन पाछुं सोंपी दइने पोते इंद्रनी पेठे पृथ्वीने पालन करवा लाग्यो. ॥ २५८ ॥ स्वप्नना प्रभावथी प्रगट थयेला मूलदेवना साम्राज्यने सांभलीने ते कापडी उत्तम स्वप्नने विषे पोताना दुष्ट विचारने निंदवा लाग्यो. ॥ ॥ २५९ ॥ पछी ए कापडी ते स्वप्नने माटे नित्य रात्रीने विषे मोढुं

पुनः पुनः कार्पटिकः शयानः, कदापि कुर्वीत शशांकपानम् ॥ विराद्धधर्मा न पुनर्मनुष्य-भवाच्च्युतो मानुषतां लभेत ॥ २६१ ॥

॥ इति मूलदेव दृष्टांतः ॥ ६

अथ चक्रदृष्टांतः सप्तमः

हवे सातमुं चक्रनुं दृष्टांत कहे छे.

पुरमिंद्रपुरं नाम, श्लाघ्यमिंद्रपुरादपि ॥ तस्मिन् पवित्र एवैकः, पवित्रोऽत्राखिलोजनः ॥ १ ॥ इंद्रदत्तो महीपालः, पालयामास तत्पुरम् ॥ श्यामाप्यसिलता यस्य, सुषुवे विषदं यशः ॥२॥ भिन्न-भिन्नजनीजाताः, तस्य द्वाविंशतिः सुताः ॥ उपोपाध्यायमध्येतुं, प्रावर्तताखिलाः कलाः ॥ ३ ॥

फाडीने बहार सूवा लाग्यो. तेथी तेनां मोढामां वागोळनी वीष्टा पडी, परंतु चंद्र पड्यो नही. ॥ २६० ॥ वारंवार बहार सूतो एवो ते कापडी कदापि कोइ वखते चंद्र पान करे, परंतु धर्मनी विराधना करनारो मनुष्यभवथी चवेलो माणस फरी मनुष्यपणाने पामे नहीं. ॥ २६१ ॥

इंद्र पुरीथी पण वखाणवा योग्य इंद्रपुर नामनुं नगर छे. ते इंद्रपुरीने विषे तो एकज पवित्र इंद्र छे, परंतु ए इंद्रपुरमां तो सर्व माणसो समृद्धिथी इंद्र समान छे. ॥१॥ इंद्रदत्त नामनो राजा ते नगरने पालन करतो हतो. अने जे राजानी श्याम एवी पण खड्गलता निर्मल यशने जन्म आपती हती. ॥ २ ॥ ते राजाना जूदी जूदी स्त्रीथी उत्पन्न थयेला बात्रीस पुत्रो उपाध्यायनी

सुबुद्धसचिवस्योप-मंदिरं संचरन्नृपः ॥ अधित्यकायां खेलंतीं, तस्य कन्यामवैक्षत ॥ ४ ॥
तद्रूपमोहितो भूमा-नभ्यर्थ्य सचिवं शुचिः ॥ अचिरात् परिणीन्ये तां, सर्वकार्येषु स प्रभुः ॥ ५ ॥
मंत्री तामिति शास्तिस्म, स्मयभूः पुत्रि मास्मभूः ॥ संध्याभ्रवद्भवद्दोषाः, क्षणरागा हि भूभुजः ॥ ६ ॥
श्रेयःप्रयोजनां प्राची-मिव प्राक् पद्मिनीपतिः ॥ सरागां त्वामसौ राग-सागरः संगमिष्यति ॥ ७ ॥
यदादिशति यद्दत्ते, यद्ब्रुते यच्च चेष्टते ॥ त्वय्यसौ प्रथमस्नेहा-त्तत्सर्वं मे निवेदयेः ॥ ८ ॥
सापि सर्वं तथा चक्रे, तदुक्तं मंत्रिपुंगवः ॥ लिलेख पत्रके शेषं, दीर्घदर्शी न सीदति ॥ ९ ॥ गौरवं

पासे सर्व कलाओने भणवा माटे जता हता. ॥ ३ ॥ कोइ वखते सुबुद्धि मंत्रीना घरनी पासेथी जता एवा राजाए उपरनी भूमी उपर रमती ते प्रधाननी पुत्रीने दिठी. ॥ ४ ॥ ते कन्यानां रूपने जोइने मोह पामेलो पवित्र राजा प्रधाननी पासे मागुं करीने थोडा वखतमां तेने परण्यो. कारण राजा सर्व कार्यने विषे समर्थ होय छे. ॥ ५ ॥ मंत्री ते पुत्रीने आ प्रमाणे शीखामण आपतो हतो के--हे पुत्री तुं गर्वनी भूमि न थजे. कारणके-तमारा दोषो संध्या कालना वादला जेवा होय छे अने राजाओ क्षण मात्रना रागवाला होय छे. ॥ ६ ॥ सूर्य प्रथम स्नेहना प्रयोजनवाली पूर्व दिशाने जेम मले छे तेम रागनो समुद्र ए राजा रागवाली तने मलशे. ॥ ७ ॥ ए राजा तारा विषे प्रथम स्नेहने लीधे जे आज्ञा करे, जे आपे, जे बोले अने जे चेष्टा करे ते सघलुं मने कहेवुं. ॥ ८ ॥ ते पुत्रीये पण सघलुं ते प्रमाणे कर्युं, अने उत्तम मंत्रीए ते पुत्रीनुं कहेलुं सर्व कागलने विषे लखी राख्युं. कारण लांबा विचारवालो माणस क्यारे पण खेद पामतो नथी. ॥ ९ ॥ घणा

लभमाना सा, पत्युः सर्वोत्तरं चिरम् ॥ मुक्ताफलं शुक्तिरिव, क्रमाद्गर्भमधारयत् ॥ १० ॥ कालेन तां विसस्मार, भूपो विद्यामिवालसः ॥ अवश्यायस्य राज्ञश्च, स्नेहः तिष्ठति किं चिरम् ॥ ११ ॥ मंत्री निन्ये निजं गेहं, गुर्विणीं गौरवेण ताम् ॥ गतिः पितृगृहं स्त्रीणां, द्विधापि पतिधिक्कृतौ ॥१२॥ अशेषदोषनिर्मुक्ते, दिवसे शिवसेवधौ ॥ सुरेंद्रदत्तनामानं, सा सुखं सुषुवे सुतम् ॥ १३ ॥ अग्निकः पर्वतश्चैव, बहली सागरस्तथा ॥ दासेरा इति चत्वार–स्तेनैधांचक्रिरे सह ॥ १४ ॥ अन्योऽन्यं तस्य तेषां च, तुल्याहर्जन्मनामपि ॥ सहकारकरीराणा–मिव भेदो महानभूत् ॥ १५ ॥ कला-

वखत सुधी पतिना सर्वोत्तम एवा गौरव (मान) ने पामती एवी ते प्रधान पुत्रीए छीप जेम मुक्ताफलने धारण करे तेम अनुक्रमे गर्भने धारण कर्यो. ॥ १० ॥ आलसु माणस न संभारवाथी विद्याने जेम भूली जाय तेम राजा मूलदेव काले करीने ते प्रधान पुत्रीने भूली गयो. ए वात खरी छे के–हिमनो अने राजानो स्नेह शुं घणो वखत रहे खरो ? ॥ ११ ॥ मंत्री गर्भवंती एवी ते पुत्रीने गौरवताथी पोताने घरे लइ गयो. कारणके–स्त्रीओने पतिना अपमानने अवसरे बन्ने रीते पण पितानुं घर गति (शरण) रूप छे. ॥ १२ ॥ पछी सर्व प्रकारे दोषथी रहित एवा कल्याणकारी दिवसने विषे ते प्रधान पुत्रीए सुरेंद्रदत्त नामना पुत्रने सुखे जन्म आप्यो. ॥ १३ ॥ अग्निक, पर्वत, बहली तथा सागर ए चारे सेवको ते सुरेंद्रदत्त कुमारनी साथे वृद्धि पामता हता ॥ १४ ॥ ते सुरेंद्रदत्त अने समान दिवसे जन्म पामेला एवाय पण ते चार सेवकोनो परस्पर आंबा अने केरडानी

विलासभवना-द्गुरोरध्याप्यतेस्म सः ॥ मातामहेन संजाता-वसरः सकलाः कलाः ॥ १६ ॥ अंगार-मिव शृंगारं, महिला प्रहिला इव ॥ विषदिग्धमिव स्निग्धं, क्रीडाः पीडा इवाखिलाः ॥ १७ ॥ अग्नितापमिवालापं, भोगान् रोगानिव स्मरन् ॥ अधीयन्नेकतानोऽभूत्, श्रुत एव स लालसः ॥ १८ ॥ युग्मम् ॥ विश्वाधिवथेन विश्वासु, कलासु विललास सः ॥ जातकातरनिर्वेदे, धनुर्वेदे विशेषतः ॥ १९ ॥ तत्रापि स तथा धीरो, राधावेधे व्यजृंभत ॥ यथा ययौ धनुष्मत्सु, पार्थस्याथा-र्घतां यशः ॥ २० ॥ तस्य साधयतो राधा-वेधं विद्यागुरोः पुनः ॥ दासेयाः स्खलनं चक्रु-र्न तु

उत्कृष्टपदे यदाऽजितनाथवारक इव सर्वत्रापि मनुष्यक्षेत्रे सामस्त्येन चिंतमाना मनुष्याः सर्वोत्कृष्टा भवंति, तदानीमपि मनुजाः संख्येयाः कोटिकोटयो ज्ञवंति । संख्येयकोटिकोटित्वं च जघन्यपदेऽप्यस्ति, परं तस्मादिदं बृहत्तरमवसेयं । संख्येयकस्य संख्येयभेदभिन्नत्वात् । ततः स्थितमेतत् । मनुष्या जघन्यत उत्कृष्टतश्च । संख्येयत्वात् स्तोका एव ॥

उत्कृष्टपदमां ज्यारे अजितनाथना वारानी पेठे सर्वठेकाणे पण मनुष्यक्षेत्रमां समस्तपणे चिंतवन करेला मनुष्यो सर्वोत्कृष्ट होय छे त्यारे पण मनुष्यो संख्याता कोडाकोडी थाय छे, अने संख्याता कोडाकोडीपणुं जघन्यपदमां पण छे. परंतु ते थकी आ वधारे म्होटुं जाणवुं. कारण के–संख्यातासंख्याता भेदमां पण भिन्नपणुं छे. तेथी तात्पर्य ए आव्युं के–मनुष्यो जघन्यथी अने उत्कृष्टथी होय छे. तेमां संख्यातापणाने लीधे थोडाज जाणवा.

ननु समूर्च्छिममीलनेन मनुष्या अप्यसंख्येयाः स्युस्तेषां श्रेण्यसंख्येयभागवर्त्तिनज्ञःप्रदेशराशिप्रमाणत्वादत आह ॥

अहिं शंका करे छे के-संमूर्च्छिमने एकठा करवाथी मनुष्यो पण असख्याता थाय. कारणके-तेओनी श्रेणिना असंख्याता भागमां रहेला आकाशप्रदेशनी राशिनुं प्रमाणपणुं छे माटे, अहिं तेनो उत्तर कहे छे के-

जीवियमईहिं तणुआ-मुच्छिममणुआ निगोयजीवव्व ॥
तम्हा इह अहिगारो, न हु तेहिं असंखएहिंपि ॥ ११ ॥

संमूर्च्छिम मनुष्यो निगोदेना जीवनी पेठे आयुष्य तथा चैतन्ये करीने हीन होय छे. ते कारणथी अहिं निश्चे तेमने असंख्याताए करीने पण अधिकार नथी.

व्याख्या-मूर्च्छनं मूर्च्छः गर्भोपपातव्यतिरेकेणोत्पादः। तेन निर्वृत्ता मूर्च्छिमाः। भावादिम इतीमप्रत्ययः। मूर्च्छिमाश्चते मनुजाश्च मूर्च्छिममनुजा। गर्भजानामेव वातपित्तादिसमुद्भवाः

मूर्च्छन जे मूर्च्छ एटले के-गर्भनी उत्पत्ति विनानी उत्पत्ति, ते कारणे मूर्च्छथी निवृत्त थयेला, अहिं 'भावादिम' एवा व्याकरणना नियमथी इम प्रत्यय लागी मूर्च्छिम ए शब्द थयो छे. अने मूर्च्छिम एवा ते मनुष्य जाणवा. वली ते मूर्च्छिम मनुष्यो गर्भजमनुष्योनाज वमनपित्तविगेरेमां उत्पन्न थाय छे.

यदागमः। कहिणं भंते समुच्छिममणुस्सा संमुच्छंति। गोयमा! अंतोमणुस्सखित्ते, अड्ढाइज्जेसु दीवसमुद्देसु, पनरससु कम्मभुमीसु, तीसाए अकम्मभुमीसु, छप्पन्नाए अंतरदीवेसु, गप्भवक्कंतिय-

मणुस्साणं व उच्चारेसु वा पासवणेसु वा खेलेसु वा सिंघाणेसु वा वंतेसु वा पित्तेसु वा पूएसु वा सोणिएसु वा सुकेसु वा सुक्कपुग्गलपरिसाडेसु वा विगयकलेवरेसु वा थीपुरिससंयोगेसु वा नगरनिद्धमणेसु वा सव्वेसु चेव असुइट्ठाणेसु वा इत्थ णं समुच्छिममणुस्सा समुच्छंति। अंगुलस्स असंखिज्जइ भागमित्तीए ओगाहणाए असणीमिच्छादिट्ठी सव्वाहिं पज्जत्तीहिं अपज्जत्तगा अंतोमुहुत्ताउआ चेव कालं करंति।

आगममां कह्युं छे के–हे भगवन्! केटले ठेकाणे संमूर्च्छिम मनुष्यो उत्पन्न थाय छे? प्रभुए कह्युं. हे गौतम! मनुष्य क्षेत्रनी मध्यमां, अढी द्वीप समुद्रमां, पंदर कर्म भूमिमां, त्रीस अकर्मभूमिमां, छप्पन्न अंतरद्वीपमां, वळी गर्भज मनुष्योनी वडीनितिमां, लघुनीतिमां, बलखामां, लींटमां, उलटीमां, पित्तमां, पाचमां, लोहिमां, विर्यमां, वीर्यपुद्गलना सडेला भागमां, मृतकलेवरमां, स्त्रीपुरुषना संयोगमां, नगरनी खालमां अने सर्व एवाय पण अरुचि स्थानने विषे एटले ठेकाणे समुर्च्छिम मनुष्यो उप्पन्न थाय छे. वळी अंगुलना असंख्याता भाग जेटली अवगाहनामां असंज्ञी मिथ्यादृष्टि ते सर्वपर्याप्तिथी अपर्याप्ता छता अंतर्मुहूर्त्तना आयुष्यवाला समूर्च्छिमजीवो निश्चे कालने करे छे.

एते च निगोदजीवा इव जीवितमतिभ्यामायुश्चैतन्याभ्यां तनवो हीना भवंति। यथा निगोदजीवा उत्कृष्टतोऽप्यंतर्मुहूर्त्तायुषस्तथा एतेऽपि। यथा च निगोदजीवानां महामोहत्वादरूपी-

यसी चेतना तथैषामपि । मनसाऽपर्याप्तानामेवमरणात् । छद्मस्थचैतन्यानां च मनःपर्याप्तिनिबंधनत्वात् यत एवं ।

वली ए संमूर्च्छिमजीवो निगोदना जीवोनी पेठे जीवित तथा मतिए करीने अर्थात् आयुष्य तथा चैतन्ये करीने तनु एटले ओछा होय छे. जेवी रीते निगोदना जीवो उत्कृष्टथी पण अंतर्मुहूर्त्तना आयुष्यवाला होय छे तेवी रीते ए संमूर्च्छिम जीवो पण होय छे. वली जेवी रीते निगोदना जीवोने महामोहने लीधे घणीज थोडी चेतना होय छे, तेवी रीते ए संमूर्च्छिमने पण होय छे. कारण मनवडे अपर्याप्ताओ छतां तेमने मरण होय छे माटे, अने छद्मस्थ चैतन्यवालाने मनःपर्याप्तिना निबंधनपणाने लीधेज जेथी ए प्रमाणे कह्युं छे.

तस्मादिह धर्मसामग्र्या विचारे तैः समूर्छिममनुष्यैरसंख्यैरपि नाधिकारः । आयुष्मत्त्वेन सचेतनत्वेन च गर्भजानामेव तदधिकृतत्त्वात् । ते च संख्येया एवेति गाथार्थः ।

माटे अहिं धर्मसामग्रीना विचारमां ते असंख्याता समूर्च्छिम मनुष्योवडे पण अधिकार नथी. कारणके–आयुष्यपणाए करीने तथा सचेतनपणाए करीने गर्भजोनोज त्यां अधिकार छे माटे. अने ते मनुष्यो संख्याताज छे. ए प्रमाणे गाथानो अर्थ पूर्ण थयो.

एवं मानुष्यं दुर्लभमुक्त्वाऽथार्यक्षेत्रस्य दुर्लभतामाह ॥

ए प्रमाणे मनुष्यपणानुं दुर्लभपणुं कहीने हवे आर्यक्षेत्रनुं दुर्लभपणुं कहे छे.

पत्तेवि माणुसत्ते, आरियखित्तेसु दुल्लहो जम्मो ॥
सड्ढपणवीस आरिय–देसा जरहम्मि मगधाई ॥ १२ ॥

मनुष्यपणुं प्राप्त थयां छतां पण आर्यक्षेत्रमां जन्म दुर्लभ छे. भरतक्षेत्रमां मगध विगेरे साडी पचवीस आर्यदेश छे. ॥१२॥

उत्तानार्था । नवरं आराद्दूरेण हेयधर्मेभ्यो याता आर्यास्ते च द्विधा । ऋद्धिप्राप्ता अऋद्धिप्राप्ताश्च । तत्र ऋद्धिप्राप्ताः षोढा । तद्यथा । तीर्थंकर–चक्रवर्ति–वासुदेव–बलदेव–चारणमुनि विद्यधराः । अऋद्धिप्राप्ताश्चार्या नवधा । क्षेत्र जाति कुल कर्म शिल्प भाषा ज्ञान दर्शन चारित्रार्यभेदात् । एषां तत्त्वार्थः श्रीप्रज्ञापनातोऽनुसर्त्तव्यः । इह तु क्षेत्रार्यैरेवाधिकारः

उपर कहेली गाथा स्पष्ट अर्थवाली छे,तोपण तेमां एटलुं विशेष छे के–त्यजवा योग्य धर्मवालाथीं अर्थात् अधर्मी पुरुषोथी आरात् केतां दूर रहेला आर्य कहेवाय. अने ते आर्य बे प्रकारना छे. एक ऋद्धिप्राप्त अने बीजा अऋद्धिप्राप्त. तेमां ऋद्धिप्राप्त छ प्रकारना छे. ते आ प्रमाणे–तीर्थंकर चक्रवर्ती वासुदेव बलदेव चारणमुनि अने विद्याधर । अने अऋद्धिप्राप्त आर्य नव प्रकारना छे. ते क्षेत्र जाति कुल कर्म शिल्प भाषा ज्ञान दर्शन अने चारित्ररूप आर्यना भेदथी जाणवा. ए छ तथा नव भेदनो तत्त्वार्थ श्रीप्रज्ञापना सूत्रथी जाणी लेवो, परंतु अहिं तो क्षेत्र अने आर्यवडेज अधिकार छे.

॥ अथार्यदेशान्नामग्राहमाह ॥

हवे आर्यदेशोने नामग्रहण पूर्वक कहे छे.

मगहं ग वंग कासी, कलिंग कुरु कोसला कुसट्टाय ॥
जंगल वच्छ विदेहा, पंचाल सुरट्ठ संदिप्भा ॥ १३ ॥
मलय ऽच्छ सिंधु वेई, वइराड दसन्न जंगि वट्टाय ॥
लाटाय सुरसेणा, कुणाल तह केयई अद्धं ॥ १४ ॥

मगध, अंग, वंग, कासी, कलिंग, कुरु, कोसला, कुशार्त, जंगल, वच्छ, विदेह, पंचाल, सौराष्ट्र, संदर्भ, मलय, अच्छ, सिंधु, वेदि, वइराट, दशार्ण, भंगी, वर्त्तोला, सुरसेन, कुणाल तेमज केतकी अर्द्ध ॥ १३-१४ ॥

द्वे अपि सुबोधे । नवरं केतकीदेशस्यार्द्धमेवार्यं अर्द्धं त्वनार्यमत एव सार्द्धपंचविंशतिसंख्यार्यदेशानामुपपद्यते । यदार्षं । खित्तारिया अद्धछव्वीसविहा पणत्ता । एते च सम्यगुपलक्षणाय प्रज्ञापनायां प्रथमपदे राजधानीसहिता पठयंते ।

आ बन्ने गाथाओ पण समजी सकाय तेवी छे. तेमां एटलुं विशेष छे के–केतकी देशनो अर्द्धज भाग आर्य छे अने अर्द्ध भाग अनार्य छे. एटला कारणथी साडी पचीसनी संख्या आर्यदेशनी थाय छे. जेने माटे आगममां कह्युं छे के–आर्यक्षेत्र

साडी पच्चीस कह्या छे. अने ते साडीपच्चीस देश सारीरीते ओलखवा माटे प्रज्ञापना सूत्रना प्रथमपदमां राजधानी सहित कह्या छे.

तद्यथा । रायगिह मगह चंपा, अंगा तह तामलित्ति वंगाय ॥

कंचणपुरं कलिंगा, वाणारसिमेव कासीय ॥ १ ॥

ते आ प्रमाणे–राजग्रही नगरी मगधदेशमां, चंपानगरी अंगदेशमां, तेमज तामलिप्तिनगरी वंगदेशमां, कंचनपुर कलिंगदेशमां, तथा वणारसी नगरी कासीदेशमां छे. ॥ १ ॥

साएए कोसला गय–उरं च कुरु सोरियं कुसट्टाय ॥

कंपिलं पंचाला, अहिछत्ता जंगला चेव ॥ २ ॥

साकेतपुर कोशलादेशमां, गजपुर कुरुदेशमां, सौरीपुर कुशार्तदेशमां, कंपिलपुर पंचाल देशमां, अने अहिछत्रा नगरी जंगल देशमां छे. ॥ २ ॥

बारवइ य सुरट्ठा, मिहिल विदेहाय वच्छकोसंबी ॥

नंदिपुरं संडिप्न्ता, भद्दिलपुरमेव मलयाय ॥ ३ ॥

द्वारका नगरी सौराष्ट्रदेशमां, मिथिला नगरी विदेहदेशमां, कौशांबी नगरी वच्छदेशमां, नंदीपुर संदर्भदेशमां, अने भद्दिलपुर मलयदेशमां छे. ॥ ३ ॥

वइराड वच्छ वरणा—अच्छ तह मुत्तियावई दसणा ॥
सुत्तियमईयवेइ, वीतभयं सिंधुसोवीरा ॥ ४ ॥

वइराटनगर वच्छदेशमां, वरणा नगरी अच्छदेशमां, तेमज शुक्तिकावती दशार्णदेशमां, शुक्तिमती वेदीदेशमां, अने वीतभय नगर सिंधुसौवीर देशमां छे. ॥ ४ ॥

महुराय सूरसेणा, पावा भंगीय मासपुरिवट्टा ॥
सावत्थीय कुणाला, कोडीवरिसं च लाटाय ॥ ५ ॥

मथुरा नगरी शूरसेन देशमां, पावापुरी भंगीदेशमां, मासपुरी वर्त्तदेशमां, श्रावस्ती कुणालदेशमां अने कोटिवरिस नगरी लाट देशमां छे. ॥ ५ ॥

सेयवियावियनयरी, केयइ अद्धं च आरियं भणियं ॥
इत्थुप्पत्ति जिणाणं, चक्कीणं रामकण्हाणं ॥ ६ ॥

सेतविता नगरी केतकी देशमां छे. वली ते केतकी अर्द्ध देश आर्य कह्यो छे. ए साडीपचीस देशमां जिनेश्वरोनी, चक्रवर्तीओनी अने रामकृष्णनी उत्पत्ति थाय छे. ॥ ६ ॥

एते च प्रत्यासत्त्या भरतक्षेत्रवर्तिन एव प्रोक्ताः। उपलक्षणत्वादन्येप्यैरावतमहाविदेहांतर्वर्त्तिविजयमध्यखंडादिषु यथासंभवं वाच्याः। अमी च कालविशेषेण सीम्ना नाम्ना च परिवर्त्ते-

तेऽपि ततः श्रोतृणामव्यामोहाय तल्लक्षणमाह ॥

अने ए देशो नजीक होवाने लीधे भरतक्षेत्रमांज कह्या छे. उपलक्षणपणाथी बीजा पण ऐरवत तथा महाविदेह क्षेत्रना मध्ये रहेली विजयोना मध्यखंड विगेरेमां जेम घटे तेम कहेवा. वली ए देशो काल विशेषे करीने सीम तथा नामथी बदलाइ गया होय तो पण तेथी सांभलनारने न मुझावामाटे तेना लक्षणने कहे छे.

जत्थ न जिण कल्लाणा, न चक्किबलकेसवाण अवयारा ॥ न य जिणधम्मपवित्ती, सगजवणाई अणज्जा ते ॥ १५ ॥

ज्यां जिनकल्याणक नथी, ज्यां चक्रवर्ती बलदेव वासुदेवना अवतार नथी, वली ज्यां जिनधर्मनी प्रवृत्ति नथी. ते शक यवन विगेरे अनार्यदेश कहेवाय छे. ॥ १५ ॥

व्याख्या, यत्र जिनानामर्हतां संबंधीनि कल्याणानि जन्मदीक्षादीनि न जायंते । तथा यत्र चक्रिबलकेशवानां चक्रवर्त्तिबलदेववासुदेवानामवतारा न भवंति । तथा यत्र साधूनामनुपगमान्न च जिनधर्मस्य प्रवृत्तिर्व्यापारः कोऽप्यस्ति । ते देशा शकयवनादयोऽनार्या इत्युच्यंते ॥

ज्यां जिन जे अरिहंत तेमना संबंधी कल्याणको एटले जन्मदीक्षा विगेरे थता नथी, तेमज ज्यां चक्री बल केशव एटले चक्रवर्त्ती बलदेव तथा वासुदेवना अवतारो थया नथी, तेमज ज्यां साधुओना न आववाथी जिनधर्मनी प्रवृत्ति नथी, ते शकयवनादिक देशो अनार्य छे, एम कहेवाय छे.

यदागमः । सग जवण सबर बब्बर–कायमुरंडोड्डुगोड्डुपक्कणया ॥ अरवागड्डुण रोमस–पारस खसखासिया चेव ॥ १ ॥ डुबिलय लउस बोकस–भिल्लंबपुलिंदकुंचभमररया ॥ कुंचाय चीण-चंचुअ–मालव दमिला कुलग्घाय ॥ २ ॥ केकय किराय हयमुह–खरमुह तह तुरग मिंढग मुहाय ॥ हयकण्णा गयकण्णा, अणेय अणारिया बहवे ॥ ३ ॥ पावा पंचरुद्दा, अणारिया निग्घिणा निरणुकंपा ॥ धम्मोत्ति अरकराइं, जे सुनन्नंति सुविणेवि ॥ ४ ॥

जेने माटे आगममां कह्युं छे के–शक, यवन, सवर, बब्बर, कायमुरंड, उड्डग, उड्डपकण, अरवा, गड्डण, रोमस, पारस, खसखसिया ॥१॥ दुबिलय, लउस, बोकस, भिल्लंब, पुलिन्द, कुंच, भमररय, कुंचाय, चीण, चंचुअ, मालव, दमिल कुलघात ॥ २ ॥ केकय, किरात, हयमुख, खरमुख, तेमज तुरगमुख, मिंढगमुख, हयकर्ण, गजकर्ण, एम अनेक जातिना घणा अनार्यो छे ॥ ३ ॥ पापी, प्रचंड क्रोधवाला, निर्दय तथा अनुकंपा विनाना जे अनार्यो स्वप्नामां पण धर्म ए अक्षरोने सांभलता नथी ॥ ४ ॥

एवं चानार्यलक्षणे प्ररूपिते आर्यलक्षणमपि प्ररूपितमेव तद्विपरीतत्वात् ॥

वली ए प्रमाणे अनार्यनुं लक्षण निरुपण कर्युं एटले आर्यलक्षण पण निरुपण करायुंज. कारण अनार्यथी आर्यनुं विपरीतपणुं छे माटे.

अथ तत्तथा दुर्लभमपि लब्धं मानुष्यमार्याणामेव सफलं नानार्याणामित्याह ॥

हवे ते तेवीरीते दुर्लभ एवुं पण प्राप्त थयेलुं मानुष्यपणुं आर्योनेज सफल थाय छे. अनार्योने थतुं नथी. ते कहे छे.

जहजह तेसिं इंदिय–मणोबलं तह तहायरो पावे ॥
ता तेहिं तो मन्ने, पवरं एगिंदियत्तंपि ॥ १६ ॥

जेम जेम ते अनार्योने इंद्रिय तथा मननुं बल वधारे होय छे, तेम तेम तेमने पापमां वधारे आदर होय छे, तेथी हुं एम मानुं छुं के–ते अनार्योथी एकेंद्रियपणुं पण उत्तम छे.

व्याख्या । यथा यथा तेषामनार्याणामिंद्रियमनोबलं पटुपटुतरं स्यादिति गम्यते तथा तथा पापे जीवसंहारमांसाहारपरदाररमणाद्यकृत्ये आदरस्तीव्रतरो जायते । ततो मन्ये इति ॥ वितर्कार्थो निपातः । तेभ्योऽनार्यमनुष्येभ्य एकेंद्रियत्वमपि प्रवरं श्रेयः ।

जेम जेम ते अनार्योने इंद्रिय तथा मननुं बल घणुं सारुं सारुं होय छे, तेम तेम तेमने पापमां एटले जीवहिंसा, मांसाहार अने परस्त्री साथे क्रीडा इत्यादि अकृत्यने विषे घणोज आदर थाय छे. अहिं इति ए वितर्क अर्थवालो निपात छे. तेथी एम मानुं छुं के–ते अनार्यमाणसोथी एकेंद्रियपणुं पण प्रवर एटले सारुं छे.

अयमर्थः। वयमपि जानिमो न हि पापप्रकृतय एकेंद्रियाः कदापि पंचेंद्रियेभ्यः प्रशस्या भवंति। परं तेषां इंद्रियपटुतया मनोबलेन च दुस्तरतरनरकनिबंधने पापकर्मणि सविशेषां प्रवृत्तिमालोक्य स्यादयमपि वितर्को यदेभ्य एकेंद्रिया अपि वरियांसः स्वल्पप्रयत्नतया स्वल्प चेतनया च तेषां नरकार्हकर्म्मबंधाभावात्। न च वाच्यं अनार्यदेश्योऽपि संयमश्रियं बभार। श्रीआर्द्रकुमार इति परमसुहृत् श्रीअभयकुमारबुद्धिसाध्यत्वात्तत्प्रतिबोधस्येत्याह॥

अहिं तात्पर्य अर्थ ए छे के–अमे पण जाणीये छीये जे निश्चे पाप प्रकृतिवाला एकेंद्रिय जीवो क्यारे पण पंचेंद्रिय जीवोथी वखाणवा योग्य नथी, परंतु ते पंचेंद्रिय जीवोनी इंद्रियश्रेष्ठता तथा मनोबले करीने अत्यंत दुस्तर एवा नरक निबंधन पापकर्मने विषे विशेष प्रवृत्ति जोइने आ पण वितर्क थाय छे जे आ एकेंद्रियो पण श्रेष्ठ छे. कारण के–थोडा प्रयत्नपणाथी अने थोडी चेतनाथी तेमने नरकने योग्य एवा कर्मबंधनो अभाव छे. वली अनार्यदेशवालो प्राणी संयमलक्ष्मीने धारण करे छे एम पण न कहेवुं. कारण श्री आर्द्रकुमार तो परममित्र एवा श्री अभयकुमारनी बुद्धिनी सहाय्यथी प्रतिबोध पामेल छे. तेज वात कहे छे.

उप्पन्नोऽवि अणारिय–देसे जं अद्दउ वयं पत्तो ॥
सो बुद्धिमहानिहिणो, महिमा खलु अभयमित्तस्स ॥ १७ ॥

अनार्य देशमां उत्पन्न थयां छतां पण आर्द्रकुमार जे कारणथी व्रतने पाम्यो, ते निश्चे बुद्धिना महाभंडार एवा अभयकुमार मित्रनो प्रभाव छे. ॥ १७ ॥

गाथार्थः स्पष्टो भावार्थस्तु कथानकगम्यः ॥

आ गाथानो अर्थ प्रगट छे, परंतु भावार्थ कथाथी जाणी शकाय तेवो छे.

॥ आर्द्रकुमारनी कथा ॥

आसीन्मगधदेशस्थे, ग्रामे नाम्ना वसंतके ॥ सामायिक इति क्षेत्री, तस्य बंधुमती प्रिया ॥ १ ॥

मगधदेशमां वसंतनामना गामने विषे सामायिक एवा नामनो खेडु (कणबी) रहेतो हतो, तेने बंधुमती नामनी स्त्री हती.॥१॥

अन्यदा सुस्थिताचार्य–व्याख्यायां तावुभावपि ॥ संसारभारनिर्विण्णौ, जेजाते युगपद्व्रतम् ॥ २ ॥
सूत्रार्थलालसः साधु–र्व्यहरद् गुरुभिः सह॥ साध्वी पुनः प्रवर्त्तिन्या, साकं देशे प्रथक् प्रथक् ॥३॥
अन्यदा विहरंतौ तौ, कंचन ग्राममीयतुः॥ सस्मार प्राग्विलासानां, साधुः साध्वीं निरीक्ष्य ताम्॥४॥
चित्तमुच्छृंखलीभूतं, यदा तेन न्यरुध्यते ॥ तन्मत्तशंडवत्क्षेत्रं, प्रत्यधावत्तदाधिकम् ॥ ५ ॥

कोइ वखते सुस्थित नामना आचार्यनुं व्याख्यान सांभली ते बन्ने जणाए संसारना भारथी वैराग्य पामी साथे व्रत ग्रहण कर्युं. ॥ २ ॥

पछी सूत्रार्थनी इच्छावाला ते साधु गुरुओ साथे विहार करवा लाग्या. अने साध्वी गुरुणीनी साथे जूदा जूदा देशमां विहार करवा लागी. ॥ ३ ॥

कोइ वखते विहार करता ते बन्ने जणा कोइ गाममां एकठा थइ गया. त्यां साधु ते साध्वीने जोइने पूर्वना विलासोने संभारवा लाग्या. ॥ ४ ॥

ज्यारे ते साधु पोताना व्याकुल थयेला मनने जेम जेम रोकवा लाग्या तेम तेम खेतर तरफ मदोन्मत्त सांढनी पेठे तेनुं चित्त साध्वी तरफ अधिक दोडवा लाग्युं. ॥ ५ ॥

तच्चेतश्चापलं तेन, द्वितीयो ज्ञापितो मुनिः जगाद ही प्रमादस्ते, कोऽयं साधो श्रुतोदधेः ॥ ६ ॥

शल्यं कामा विषं कामा, कामा विषधरोपमाः॥ कामान् प्रार्थयमाना हि, अकामा यांति दुर्गतिम्॥७॥

सोऽप्युचे किं करोम्येष, एषा दृग्गोचरं गता ॥ फलं मंकुटिकेवोच्च–माकृषत्येव मे मनः ॥ ८ ॥

सोऽप्यथाख्यत्प्रवर्तिन्या, बंधुमत्याश्च साप्यहो ॥ वातोद्धुतं रज इव, साधो गोप्यं वितस्तिरे ॥ ९ ॥

ते मुनिए पोतानां चित्तनुं चपलपणुं बीजा मुनिने कह्युं. एटले ते बीजा मुनिए कह्युं के–अरे साधो ! श्रुतना समुद्र एवा तमजे आ प्रमाद क्यो ? ॥ ६ ॥

काम शल्य छे अने काम विष छे. वली काम विषधर जे सर्प तेनी उपमावाला छे. कामनी इच्छा करनारा एवाय पण अकामा एटले कामने नहि पामेला जीवो दुर्गतिने पामे छे. ॥ ७ ॥

ते साधुए पण कह्युं. आ हुं शुं करुं ? मारा नेत्रनी आगल आवेली ए साध्वी मंकोडी जेम फलने पोताना तरफ खेंचे छे तेम अधिकपणे मारा मनने खेंचे छे. ॥ ८ ॥

पछी ते साधुए गुरुणीने कह्युं अने गुरुणीए बंधुमतीने कह्युं. अहो ! वायुथी उडेलां रजनी पेठे साधुने रक्षण करवा योग्य कार्य विस्तार पाम्युं. ॥ ९ ॥

दध्यौ बंधुमती धिग्मां, सर्वथाऽनर्थहेतुकाम् ॥ यया धूमलहर्येव, मुनेर्मलिनितं मनः ॥ १० ॥
शीलात्मा मयि जीवंत्यां, साधोरस्य न जीवति॥ तन्मे मृत्युरपि श्रेया–नित्युचे सा प्रवर्तिनीम् ॥११॥
सा सुबुद्धिः स्वमुद्बध्या–नशनेन दिवो ययौ ॥ तन्निशम्य यतिर्जात–वैलक्ष्यो दध्यिवानिति॥ १२ ॥
अबलाया अहो सत्वं, यदेवं सा विपेदुषी॥ पुरुषस्यापि धिक् क्लैव्यं, ममाद्यापि जिजीविषोः॥ १३ ॥

बंधुमती पण विचार करवा लागी के–सर्व प्रकारे अनर्थनी हेतु एवी मने धिक्कार थाओ, के जे में धुमाडानी लहेरनी पेठे मुनिना मनने मलीन कर्युं. ॥ १० ॥

हुं जीवती छतां आ साधुनो शीलात्मा नहि जीवे. अर्थात् साधुनुं शीयल नहि रहे, माटे मारे मृत्यु पामवुं सारुं छे, एम बंधुमतीए गुरुणीने कह्युं. ॥ ११ ॥

उतम बुद्धिवाली ते बंधुमती पोताने उंचे बांधीने अर्थात् गले फांसो खाइने अनशनथी स्वर्गे गइ. ते वात सांभलीने विलखो थयेलो साधु आ प्रमाणे विचार करवा लाग्यो. ॥ १२ ॥

अहो ! ए अबलानुं धैर्य आश्चर्यकारी छे. जे आ प्रमाणे ते मृत्यु पामी. वली हजी सुधी जीववानी आशा राखनारा पुरुष जाति एवाय पण मारा क्लीब (नपुंसक) पणाने धिक्कार थाओ. ॥ १३ ॥

अथात्तानशनः सूरे–स्तदनालोच्य दुष्कृतम् ॥ स प्रियोत्कंठित इव, तदैव त्रिदिवं ययौ ॥ १४ ॥

द्वीपोऽस्त्यंतरकूपारं, कूपाराममनोहरः ॥ श्रीमानमुद्रसामुद्र–सारकोश इवार्द्रकः ॥ १५ ॥

राजाभूदार्द्रकस्तत्र, शत्रुभिन्मित्रवर्द्धकः ॥ आर्द्रिकेति प्रिया तस्य, प्राप्ता श्रीरिव वारिधेः ॥ १६ ॥

साधुजीवो दिवश्च्युत्वा, तस्याः कुक्षाववातरत्॥ जातः सोऽप्यार्द्रकाभिख्यां, धत्ते तेषां ह्यसौ स्थितिः॥१७॥

पछी गुरु पासे ते पापनी आलोयणा लीधा विना अनशन लइने ते मुनि प्रियाने विषे उत्साहवाला होयनी ? एम तेज वखते स्वर्गे गया. ॥ १४ ॥

समुद्रनी मध्यमां, कूवा अने बगीचाओथी मनोहर जाणे मुद्रा रहित समुद्र संबंधी श्रेष्ट भंडार होयनी ? एवो श्रीमान् आर्द्रक नामनो द्वीप छे. ॥ १५ ॥

ते द्वीपमां शत्रुने नाश करनारो तथा मित्रने वधारनारो आर्द्रक नामनो राजा हतो, अने ते राजाने समुद्रथी प्राप्त थयेली लक्ष्मी होयना ? एवी आर्द्रिका ए नामनी स्त्री हती. ॥ १६ ॥

हवे साधुनो जीव स्वर्गथी चवीने ते आर्द्रिकाना उदरने विषे अवतर्यो. अने ज्यारे जन्म पाम्यो त्यारे ते पण आर्द्रककुमार एवा नामने पाम्यो, कारण के तेओनी एवी परंपरा छे. ॥ १७ ॥

पितृभ्यामार्द्रको भूमि–जलाभ्यामार्द्रकंदवत् ॥ अवर्द्धत गुणैर्जीवै–रिवानंतैः श्रितः सदा ॥ १८ ॥
मंत्री श्रेणिकराजस्य, सदःस्थं नृपमन्यदा ॥ निर्दिष्टो वेत्रिणा नंसी–द्विमुच्योपायनं पुरः ॥ १९ ॥
प्रफुल्लवदनः प्रीत्या, तं बभाषे नरेश्वरः ॥ कच्चिन्नः कुशली बंधुः,श्रीमान् श्रेणिकभूपतिः ॥ २० ॥
सोऽप्यूचे नोत्पलस्येव, तस्याकुशलसंभवः ॥ बालमित्रं भवान् यस्य, दिवाकर इवोदितः ॥ २१ ॥
अत्रांतरे कुमारेणा–र्द्रकिणा लपितं पितुः ॥ यद्वार्त्ताश्रवणे यूयं, सतृष्णाः श्रेणिकः स कः ॥ २२ ॥

अनंता जीवोनी पेठे अनंता गुणोए करीने निरंतर आश्रय करायलो ते आर्द्रककुमार भूमि अने जले करीने आदाना कंदनी पेठे माता पिता वडे वृद्धि पाम्यो. ॥ १८ ॥

कोइ वखते द्वारपाले आज्ञा आपेला श्रेणिक राजाना मंत्रीए सभामां बेठेला आर्द्रक राजानी आगल भेट मूकीने नमस्कार कर्यो. ॥ १९ ॥

पछी प्रफुल्लीत मुखवाला आर्द्रक राजाए प्रीतिथी ते प्रधानने पूछयुं के, अमारो बंधु श्रीमान श्रेणिकराजा कुशल छे? ॥२०॥

मंत्रीए पण कह्युं छे के–कमलनी पेठे ते अमारा राजाना अकुशलनो संभव नथीं, कारणके–जेना बालमित्र एवा तमे सूर्यनी पेठे उदय पामेला छो.

आ वखते आर्द्रक कुमारे पिताने पूछयुं के, जेनी वात सांभलवामां तमे आटला बधा आतुर छो ते श्रेणिक कोण छे?

बज्राषे भूपतिर्वत्स, देशोऽस्ति मगधाभिधः ॥ केदाराश्च विहाराश्च, यत्रोरुकलशालयः ॥ २३ ॥
पुरं राजगृहं पाति, तत्र श्रीश्रेणिको नृपः ॥ न द्विषामायुधैर्लोहै-र्भिद्यते पार्थिवोऽपि यः ॥ २४ ॥
प्रीतिः कुलक्रमायाता, वर्त्तते सह तेन नः ॥ मिथो मंत्रिगतायातैः, प्राभृतप्रेषणैरपि ॥ २५ ॥
अयं च सचिवस्तेन, प्रजिघ्ये सौहृदान्मयि ॥ मयापि समये तस्मै, निजमंत्री प्रहेष्यते ॥ २६ ॥
अथ आर्द्रकुमारेण, सचिवोऽवादि सादरम्॥ त्वत्प्रभोः कोऽपि पुत्रोऽस्ति, येन मैत्री विधियते ॥२७॥
सानंदं सचिवोऽवोचत्, कुमारेंद्र किमुच्यते ॥ रत्नानीवोदधेस्तस्य, संति पुत्रा अनेकशः ॥ २८ ॥

राजा आर्द्रके कह्युं के–हे वत्स । मगध नामनो देश छे. ज्यां क्याराओ मनोहर डांगरवाला अने जिनमंदिरो कलशनी पंक्तिओवाला शोभी रह्या छे ॥ २३ ॥ त्यां राजगृह नगरने विषे श्रीश्रेणिक नामनो राजा राज्य करे छे, के जे राजा छतां पण शत्रुओना लोढाना शस्त्रोथी भेदी शकातो नथी ॥ २४ ॥ परस्पर मंत्रीओना जवा आववाथी मोकलाती भेटोएकरीने पण आपणी तेनी साथे कुलक्रमथी प्रीति चाली आवे छे. ॥ २५ ॥ तेणे आ प्रधान महारा उपर स्नेहने लीधे मोकल्यो छे, अने हुं पण अवसरे तेने माटे आपणा मंत्रीने मोकलीश ॥ २६ ॥ पछी आर्द्रकुमारे ते आवेला प्रधानने आदरथी कह्युं के-तमारा राजाने कोई पण पुत्र छे? के जेनी साथे हुं मैत्री करुं ॥ २७ ॥ प्रधाने आनंदपूर्वक कह्युं के–हे कुमारेंद्र ! वधारे शुं कहुं ? समुद्रना रत्नोनी पेठे तेमने घणा पुत्रों छे ॥ २८ ॥ वळी ते सर्वमां श्रीमान् कौस्तुभ रत्नना सरखो तेज तथा

पुनस्तेषु समस्तेषु, श्रीमान् कौस्तुभरत्नवत् ॥ तेजसा वयसा ज्येष्ठो, जयत्यभयनंदनः ॥ २९ ॥
मूर्तिस्थ इव जीवो यः, प्रजायाः परिवर्द्धनः ॥ द्विषद्विध्वंसनः षष्ट–ग्रहस्थ इव सद्ग्रहः ॥ ३० ॥
नवमस्थ इव क्रोडो, जिनधर्मस्य पोषकः ॥ अभूत्प्रभुत्वहेतुश्च, दशमस्थ इवार्यमा ॥ ३१ ॥
स एव तव मैत्र्यार्हं, इति जल्पति मंत्रिणि॥ कुमारः स्माह संगच्छे–स्त्वं गच्छन्मगधेषु माम्॥३२॥
वत्स स्वच्छकुलिनोऽसि, यन्नः पूर्वक्रमागताम् ॥ प्रीतिं दृढयसीत्येन–मन्वमोदत भूपतिः ॥ ३३ ॥
तं मंत्रिणमवस्थाप्य, दिनानि कतिचिन्मुदा ॥ समं स्वमंत्रिणा दत्त–प्राभृतं व्यसृज न्नृपः ॥ ३४॥

वये करीने महोटो अभयकुमार नामनो पुत्र जयवंतो वर्तेछे ॥ २९ ॥ जे अभयकुमार लग्नभुवन (जन्मकुंडलीना पहेला भुवन) मां रहेला बुहस्पतिनी पेठे प्रजाने वृद्धि (उन्नति) पमाडनारो छे, तथा छठा भुवनमां रहेला उत्तम ग्रहनी पेठे शत्रुने नाश करनारो छे ॥ ३० ॥ वली नवमा भुवनमां रहेला शनिनी पेठे जिनधर्मने पोषण करनार अने दशमा भुवनमां रहेला सूर्यनी पेठे प्रभुपणानो हेतु छे ॥ ३१ ॥ तेज अभयकुमार तमारे मैत्री करवा योग्य छे. एम मंत्रीए कह्युं एटले आर्द्रककुमारे कह्युं के, तमे मगध देशमां जाओ त्यारे मने मलज्यो ॥ ३२ ॥ हे वत्स ! तुं निर्मल कुलिन छे. कारणके–अमारी पूर्वक्रमथी चालती आवेली प्रीतिने दृढ करे छे ! एम राजाए ते पुत्रनी अनुमोदना करी ॥ ३३ ॥ पछी राजाए हर्षथी ते मंत्रीने केटलाक दिवस राखीने भेट आपीने पोताना मंत्रीनी साथे रजा आपी ॥ ३४ ॥ पछी जती वखते मंत्री आर्द्रककुमारने मल्यो एटले

सोऽथामिलत्कुमारस्य, सोऽपि तस्मै ददौ मुदा ॥ चिरसंचितरत्नाढ्य-मभयाय स्वढौकनम् ॥ ३५ ॥
ऊचे च सचिवेंद्र त्व-मभयाय वदेरिति ॥ चकोर इव शीतांशु-मार्द्रकिस्त्वां सखियति ॥ ३६ ॥
सोऽथ राजगृहं प्राप्तो, ददौ श्रेणिकभूभुजे ॥ आर्द्रकस्वामिनः सर्वं, प्राभृतं वाचिकैः समम् ॥ ३७ ॥
सचिवः स वयस्यस्य, वयस्य इव भूभुजा ॥ कुशलः कुशलप्रश्न-पूर्वं गौरवितो भृशम् ॥ ३८ ॥
अथार्द्रककुमारस्य, स वाचिकमुपायनम् ॥ प्राप्य स्वपुरुषाद्दध्या-विति श्रेणिकनंदनः ॥ ३९ ॥
अहो चित्रं अहो चित्रं, यदेषोऽनार्यदेशजः ॥ वयस्यीयति मामार्यं, का मैत्री वन्यपौरयोः ॥ ४० ॥

तेणे पण हर्षथी अभयकुमार माटे घणावखतथी संघरी राखेली रत्नयुक्त पोताना तरफनी भेट मंत्रीने आपी ॥ ३५ ॥ अने कह्युं के-हे सचिवेंद्र ! तमारे अभय कुमारने एम कहेवुं के-जेम चकोर पक्षी चंद्रने इच्छे छे तेम आर्द्रकुमार तमने मित्र करवाने इच्छे छे ॥ ३६ ॥ पछी राजगृहनगर प्रत्ये आवेला प्रधाने आर्द्रकदेशना राजाना संदेशा सहित सर्व भेट श्रेणिकराजाने आपी ॥३७॥ राजा श्रेणिके मित्रनी पेठे ते पोताना मित्रना कुशलप्रधानने पण कुशलप्रश्न पूछवा पूर्वक अत्यंत गौरव पमाड्यो ॥ ३८ ॥ पछी पोताना प्रधान पासेथी आर्द्रक कुमारना संदेशाने तथा भेटने पामीने श्रेणिकपुत्र अभयकुमार मनमां आ प्रमाणे विचार करवा लाग्यो के-॥ ३९ ॥ अहो आश्चर्य छे ! जे आ अनार्यदेशमां उत्पन्न थयेलो अनार्य मने आर्यने मित्र करवानी इच्छा करे छे, परंतु वनमां रहेनाराने अने नगरमां रहेनाराने मित्रता शी ? ॥ ४० ॥ अथवा तो हा जाण्युं.

यद्वा ज्ञातमनार्योऽयं, जातः कोऽपि च्युतव्रतः॥ आसन्नसिद्धिकत्वेन, मया मैत्रीं विधित्सति ॥४१॥
अभव्या दूरभव्याश्च, नेच्छंति मनसोऽपि माम् ॥ पुरीषशुकरा दिव्य-चंदनैः किमु कुर्वते ॥ ४२ ॥
मम मैत्र्याः फलं किं चे-न्नासौ धर्मं विबुध्यते ॥ कर्पूरं तत एवेष्टं, यद्दत्ते स्वीयसौरभम् ॥ ४३ ॥
स राजा न्यायदेष्टा यः, स दीपो यस्तमोपहः ॥ तद्धनं यत्त्रिवर्गार्थं, तन्मित्रं यत्प्रबोधकम् ॥ ४४ ॥
दूरस्थोऽसौ कथं बोध्यो, यद्वार्हद्बिंबदर्शनात् ॥ जातिं स्मरेत् कदाप्येष, बुध्येत च ततः सुखम्॥४५॥
ध्यात्वेत्यादीशितुर्बिंबं, हैमं हैमविभूषणम् ॥ बीजं बोधिद्रुमस्येव, सन्यधत्त समुद्गके ॥ ४६ ॥

व्रतथी भ्रष्टथयेलो आ कोइ पण जीव अनार्य थयो छे, परंतु ए नजीकमां सिद्धिपद पामवानो हशे, एटला माटे ते महारी साथे मैत्री करवानी इच्छा करे छे ॥ ४१ ॥ वली अभव्य अने दूर भव्य (जेने भव्यपणुं पामवुं बहु दूर छे.) एवा जीवो मने मनथी पण नथी इच्छता. खरुं छे—के विष्टाना भूंडो दिव्य चंदन वडे शुं करे ? ॥ ४२ ॥ हवे जो ए धर्मने न पामे तो मारी मैत्रीनुं फल श्युं ? कपूरज वधारे सारो, जे पोतानी सुगंधी सर्वने आपे ॥ ४३ ॥ जे न्यायने आपनारो ते राजा, जे अंधकारने नाश करनारो ते दीवो, जे त्रण वर्गने (धर्म अर्थ अने कामने) अर्थे थाय ते धन, अने जे प्रतिबोध पमाडे ते मित्र जाणवो ॥ ४४ ॥ परंतु दूर देशमां रहेलो ए शी रीते प्रतिबोध पामे ! ! अथवा अरिहंतना प्रतिबिंबना दर्शनथी कदापी ए जातिस्मरण ज्ञान पामे अने त्यार पछी सुखे प्रतिबोध पामे ॥ ४५ ॥ एम विचारी ते अभयकुमारे समकीतरूप वृक्षना

समुद्गकं च तं दिव्ये, वाससी भूषणानि च ॥ मंजूषायां निचिक्षेप, पूजोपकरणानि च ॥ ४७ ॥
पुनर्यदार्द्रकेशाय, प्राहिणोन्मंत्रिणं नृपः ॥ तदा प्रदाय तस्मै तां, मंजुषामभयोऽभ्यधात् ॥ ४८ ॥
सौम्येयमार्द्रकेरर्प्या, वाच्यमेतच्च वाचिकम् ॥ स्नात्वा मित्र रहः सेयं, पेटोद्घाटया त्वया स्वयम् ४९
ओमित्युक्त्वार्द्रकद्वीपं, गत्वा श्रेणिकढौकनम् ॥ दत्वा नृपाय सोऽगच्छत्, कुमारस्य गृहं रहः ॥५०॥
तस्मै पेटां प्रदायाख्य–दभयस्य स वाचिकम् ॥ तन्निशम्य सुधाशिक्त, इवार्द्रकिरमोदत ॥ ५१ ॥
स्नातश्च विजनं गत्वा, स्वयं पेटां व्यमुद्रयत्॥न्याधात् किमत्र मे मित्र–मित्युत्कलिकयाकुलः ॥५२॥

बीजनी पेठे सुवर्णाभरणवाला श्रीआदिनाथना सुवर्णप्रतिबिंबने डाबडामां मूक्युं ॥ ४६ ॥ वली ते डाबडो, दिव्य बे वस्त्र, तथा आभूषणो अने पूजानां उपकारणो पेटीमां भर्यां ॥ ४७ ॥ वली ज्यारे राजा श्रेणिके मंत्रिने आर्द्रकराजा तरफ मोकल्यो त्यारे ते मंत्रिने ते पेटी आपीने अभयकुमारे कह्युं. ॥ ४८ ॥ हे सौम्य ! आ पेटी तमारे आर्द्रककुमारने आपवी अने आ महारो संदेशो कहेवो के–हे मित्र ! नाहीने पछी एकांतमां आ पेटी तारे पोताने उघाडवी ॥ ४९ ॥ मंत्री पण " बहु सारुं " एम कही आर्द्रकद्वीप प्रत्ये जइ श्रेणिकराजाए मोकलेली भेट आर्द्रकराजाने आपी अने एकांते आर्द्रककुमारना मंदिरे आव्यो ॥ ५० ॥ मंत्रीए आर्द्रक कुमारने पेटी आपीने अभयकुमारनो संदेसो कह्यो. ते सांभलीने आर्द्रककुमार पण अमृतथी सिंचन कर्यानी पेठे आनंद पाम्यो ॥ ५१ ॥ पछी नाहीने अने एकांतमां जइने ' महारा मित्रे आ पेटीमां शुं मूक्युं हशे ? एम

चंद्रांशुभिरिव च्यूते, वीक्ष्यांतर्वाससी रसी ॥ पर्यधत्त ततो दिव्य–भूषणैः स्वं व्यभूषयत् ॥५३॥
उन्मुद्रिते समुद्रेऽथ, सोऽद्राक्षीर्बिबमार्हतम् ॥ तस्यांतरं तमो भेत्तुं, भानुबिंबमिवोदितम् ॥५४॥
तदाभरणबुद्ध्यासौ, सर्वांगेषु नियोजयत् ॥ घटनां कापि न प्राप, त्रिलोकाभरणं हि तत् ॥ ५५ ॥
वीक्षापन्नो वीक्षमाणो, बिंबं दृष्ट्याऽनिमेषया ॥ कापीदृक् दृष्टमित्यूहा–दस्मरत्पूर्वजन्म सः ॥ ५६ ॥
दध्यौ च प्रागहं भूत्वा, नाम सामायिको मुनिः॥ भावसामायिकाद् भ्रष्टः, प्राप्तोऽस्म्येवमनार्यताम् ५७
मन्ये ममैव बोधार्थ–मनार्यस्य दवीयसः ॥ अभयः प्रेसयामास, मतिमान्प्रतिमामिमाम् ॥ ५८ ॥

उत्साहथी व्याकुल मनवाला तेणे पोते पेटी उघाडी ॥ ५२ ॥ जाणे चंद्रकिरणथीज रचेला होयनी ? एवां अंदर बे वस्त्र जोइने रसीक एवा तेणे ते पहेर्यां अने पछी दिव्य आभूषणो वडे पोतानां शरीरने सुशोभित कर्युं. ॥ ५३ ॥ पछी डाबडो उघाडयो एटले तेणे ते डाबडानी अंदर अंधकारने नाश करवा माटे उदय पामेला चंद्रबिंब सरखा अरिहंतना प्रतिबिंबने दीठुं. ॥ ५४ ॥ ते वखते आभूषणनी बुद्धिथी एटले आ कांइ आभूषण छे एम धारीने ए आर्द्रककुमारे सर्वअंगने विषे धारण करीजोयुं, परंतु निश्चे त्रण लोकनुं आभूषण ते कोइ अंगने विषे पग घटना पाम्युं नही ॥ ५५ ॥ पछी खेद पामेला अने अनिमेष दृष्टिथी बिंबने जोइ रहेला ते आर्द्रककुमारने 'में कोइ ठेकाणे पग आवुं जोयुंछे.' एवो उहापोह करतां पूर्वजन्म सांभरी आव्यो ॥ ५६ ॥ अने ते विचार करवा लाग्यो के–पूर्वे हुं फक्त नाम मात्र सामायिक नामनो साधु थइने भाव सामायिकथी भ्रष्ट थवाने लीधे आवा अनार्यपणाने प्राप्त थयो छुं ॥ ५७ ॥ वली हुं मानुं छुं के–बुद्धिवंत एवा अभय-

अभयस्याद्भुतं बुद्धि-वैभवं न स्तवीति कः ॥ योऽधायेव दृशं बोधं, दूरस्थायापि मे ददौ ॥५९॥

दृष्टं जानाति रत्नं सुवर्णिगपि भटो दृष्टमाहंति लक्ष्यं। ग्लानं वैद्योऽपि दृष्टं पटयति सुगुरुर्बोधयत्येव दृष्टम् ॥ दृष्टं पान्थं पथिज्ञः पथि लगयति योऽबोधयन्मामदृष्टं। दिष्टया धीमत्सु सीमा स जयति मगधाधीशजन्मा सखा मे ॥ ६० ॥

तद्बंधोर्दर्शनात्तस्य, कृतार्थीकृत्य लोचने ॥ अनुनेष्ये पुनर्दीक्षां, रोषितामिव वल्लभाम् ॥ ६१ ॥

अथासौ पूजयामास, सोल्लासः परमेश्वरम् ॥ मा पुनर्दुर्लभोऽभूस्त्वं, देवदेवेत्युदीरयन् ॥ ६२ ॥

कुमारे दूरदेशमां रहेला अनार्य एवा मनेज प्रतिबोध करवा माटे आ प्रतिमा मोकली छे. ॥ ५८ ॥ अभयकुमारना आवा अद्भुत बुद्धिवैभवने कोण न वखाणे? के जेणे आंधलाने तेम दूर रहेला एवाय पण मने बोध पमाड्यो. ॥ ५९ ॥ उत्तम झवेरी पण जोयेलां रत्ननी परीक्षा करे छे, सुभट जोयेला निशानने पाडी शके छे, वैद्य पण जोयेला रोगीने सारो करे छे, सुगुरु जोयेला शिष्यनेज बोध करे छे अने मार्गनो जाणनारो मार्गने विषे जोयेला मार्ग प्रत्ये लगाडी शके छे, परंतु हर्ष थाय छे के-जेणे नहिं जोयेला मने बोध पमाड्यो छे ते बुद्धिवंतोने विषे सीरोमणि सरखो मगधपतिनो पुत्र महारो मित्र जयवंतो वर्ते छे. ॥ ६० ॥ माटे ते बंधुना दर्शनथी महारा बन्ने नेत्रने कृतार्थ करीने रोष पामेली स्त्रीने मनाववानी पेठे फरीथी हुं दीक्षाने लहीश. ॥ ६१ ॥ पछी हे देवाधिदेव! तमे फरी दुर्लभ न थजो! एम कहेता एवा ते हर्षित आर्द्रककुमारे परमेश्वरनुं पूजन कर्युं. ॥ ६२ ॥ पछी तेणे राजानी विनंती करी के, हे तात! मने आज्ञा आपो के जेथी करीने हुं

सोऽथ व्यजिज्ञपद्भूप—मनुमन्यस्व तात माम्॥ मिलित्वाऽजयमित्रस्य, येन स्यां दृढसौहृदः॥ ६३ ॥
वत्सास्माकं च तेषां च, प्रीतिः प्राभृतवाचिकैः ॥ नान्योन्यमिलनेनेति, निषिध्यत नृपेण सः ॥६४॥
गुर्वादेशवशस्त्यक्त्वा, शेषकृत्योऽथ दध्यिवान् ॥ योगीव परमात्मान—मभयस्यैव नाम सः ॥ ६५ ॥
अपृष्ट्वाप्येष गंतेति, चकितस्तस्य चेष्टया ॥ तद्रक्षार्थं नृपोऽमुंचत्, पंचयोधशतानि च ॥ ६६ ॥
कुमारस्तैर्निरुद्धोऽपि, श्रद्धालुरिव कर्मभिः ॥ न मित्रमिलनोत्कंठां, जहौ मोक्षस्पृहामिव ॥ ६७ ॥
सुविश्वासयितुं विश्वान्, योधान् व्याह्यालिकां व्यधात्॥ तुरगेणाग्रतो गत्वा, ऽमिलत्तेषां क्षणात्पुनः ६८

अभयकुमार मित्रने मलीने दृढ सौहृदवालो थाउं ॥ ६३ ॥ हे वत्स ! आपणी अने तेमनी प्रीति भेट तथा संदेशा मोकलवाथी छे, परंतु परस्पर मलवाथी नथी, एम कहीने राजाए तेने ना पाडी ॥ ६४ ॥ पछी वडीलनी आज्ञाने वश एवो आर्द्रककुमार सर्वकार्यने त्यजी दइ जेम योगी परमात्मानुं ध्यान करे तेम अभयकुमारनाज नामनुं ध्यान करवा लाग्यो ॥ ६५ ॥ तेनी चेष्टाथी 'पूछ्या विना पण आ चाल्यो जशे !' एम संशय पामेला अने चकित थयेला राजाए तेनुं रक्षण करवा माटे पांचसो योद्धाओ राख्या ॥ ६६ ॥ परंतु कर्म वडे घेरायला श्रद्धालु पुरुषनी पेठे सुभटोथी घेरायला एवा पण ते कुमारे मोक्षनी इच्छानी पेठे मित्रने मलवानी उत्कंठाने त्यजी दीधी नही ॥६७॥ पछी कुमार सर्वे योद्धाओने विश्वास पमाडवा माटे अश्वक्रीडा करवा जवा लाग्यो अने घोडाने दोडावी सौना आगल निकली जइने फरी क्षण मात्रमां तेमनी पासे आववा लाग्यो ॥ ६८ ॥

घटयर्थयामयामाद्यैः क्रमाद्वेलां विवर्द्धयन् ॥ नित्यं व्यायामकारीव, दूरादप्यवलिष्ट सः ॥ ६९ ॥
एहिरे याहिरे शश्वत्, कुर्वतस्ते पदातयः ॥ योद्धाः सर्वेऽपि निर्वेदं, ययुः सूर्यातपाकुलाः ॥ ७० ॥
ततस्ते जातविश्रंभा–स्तस्थु श्छायासु शाखिनाम्॥ प्रहराद्यंतरं कृत्वा, सोऽपि तेभ्योऽमिलत्पुनः ७१
विश्वान्विश्वास्य तानेवं, कालेन कियतापि सः॥ सज्जीचकार प्रच्छंन्नं, पोतं प्रत्ययितैर्नरैः ॥ ७२ ॥
तरुच्छायानिविष्टेषु, योधेष्वेवं कदाचन ॥ आरूढः पोतमादाय, प्रतिमां सह कांचनैः ॥ ७३ ॥
तीर्णोऽब्धिं हनुमान् यस्य, वायोः पोतः स्वयं सुखम् ॥ तत्सहायेन पोतोऽयं, तत्पारं प्राप नाद्भुतम् ॥७४॥

घडी, अर्द्ध पहोर अने पहोर विगेरेथी अनुक्रमे वखतने वधारतो ते कुमार कसरत करनारानी पेठे नित्य दूर थकी पण पाछो आवतो हतो ॥ ६९ ॥ निरंतर आवजाव करता ते पाला अने सर्वे योद्धाओ सूर्यना तापथी व्याकुळ थया छतां खेद पामवा लाग्या ॥ ७० ॥ पछी विश्वास पामेला ते सुभटो कोइ दिवसे झाडोनी छायामां बेठा अने कुमार पण एक पहोर विगेरेनुं अंतर करीने फरी तेमने मळ्यो ॥ ७१ ॥ एम केटलाक दिवसे ते सर्वे सुभटोने विश्वास पमाडीने कुमारे पोताना विश्वासवाला माणसोथी गुप्त रीते एक वहाणने तैयार कराव्युं ॥ ७२ ॥ कोई वखते योद्धाओ झाडनी छायामां बेठा बेठा कुमारनी वाट जोता हता एवामां ए आर्द्रक कुमार केटलुंक सुवर्ण तथा प्रतिमाने लईने वहाण उपर चडी गयो ॥ ७३ ॥ जे वायुनो पुत्र हनुमान् पोते सुखे समुद्रने तरी गयो हतो ते वायुनी सहाय वडे आ वहाण पण शिघ्र समुद्रना पारने पाम्युं, ए आश्चर्य कहेवाय

मन्यमानस्ततस्तीर्ण–मपि संसारसागरम्॥ दीक्षायामुत्सुको नैच्छ–न्मित्रस्यापि स संगमम् ॥७५॥
बिंबमाशातनाभीरुः–रजयाय स्वकैर्नरैः ॥ स प्रैषीन्न हि रत्नस्य, स्थानं रत्नाकरं विना ॥ ७६ ॥
स तत्रैव नवक्षेत्र्या–मुत्वा किंचन कांचनम्॥ शेषं समर्प्य भृत्यानां, यावद्गृह्णाति संयमम् ॥ ७७ ॥
तावदेवं दिवो दैवी, वागभूदार्द्रकांगज ॥ भोगकर्म न तेऽद्यापि, क्षीणं तन्मा ग्रही व्रतम् ॥ ७८ ॥
तपसा छेत्तुकामस्तत्–कर्म रज्जुमिवासिना॥ अनाकर्ण्येव तां वाचं, व्रतं जेजे स साहसी॥ ७९ ॥

नहीं ॥ ७४ ॥ पछी संसार समुद्रने पण तरी गयो होय एम मानता ते आर्द्रककुमारे दीक्षा लेवाने उत्साहवंत थया छता मित्रना पण मेलापनी ईच्छा राखी नहीं ॥ ७५ ॥ परंतु जिन प्रतिबिंबनी आशातनाथी भय पामता तेणे पोताना माणसोनी साथे ते प्रतिमा अभय कुमारने मोकली आपी. कारण के–रत्ननुं स्थान रत्नाकर (समुद्र) विना बीजुं होय नही ॥ ७६ ॥ आर्द्रककुमार त्यांज नव क्षेत्रमां केटलुंक सुवर्ण वापरीने अने बाकीनुं पोताना सेवकोने सोंपीने जेटलामां पोते संयमने ग्रहण करे छे ॥ ७७ ॥ तेटलामां आ प्रमाणे आकाशथी देववाणी उत्पन्न थइ के, हे आर्द्रकपुत्र ! हजी पण तहारुं भोगावली कर्म क्षय थयुं नथी माटे व्रतने न ग्रहण कर ॥ ७८ ॥ जेम कोइ खड्गवडे दोरडाने कापी नाखवानी ईच्छा करे तेम तपवडे भोगावली कर्मने छेदी नाखवानी ईच्छा करता साहसी आर्द्रककुमारे ते दैवीवाणीने न सांभली होयनी ? एम तरत व्रत ग्रहण

निधिकृतं धनमिव, प्राप्य प्राग्भविकं श्रुतम् ॥ तेनात्तदीपवन्मार्गे, मौनींद्रं पश्यतिस्म सः ॥ ८० ॥
तपसा कृशयन् देहं, भूषयन् शुभभावनाम् ॥ पक्षीव पासनिर्मुक्तो, विजह्रे स महीतले ॥ ८१ ॥
॥ इतश्च ॥ स्वरामणीयकग्रामी–कृतत्रिदशपत्तनम् ॥ वसंतपुरमित्यास्ति, नगरं गरिमास्पदम् ॥८२॥
तत्रेभ्यो देवदत्तोऽभू–न्मान्यो राज्ञोऽपि यो गुणैः ॥ तस्य संचितसौशील्य–धना धनवती प्रिया ८३
स च बंधुमतीजीवः, समतीत्यामरं भवम् ॥ उदपादि तयोः पुत्री, पुत्रेभ्योऽप्यतिवल्लभा ॥ ८४ ॥
विश्रुता श्रीमती, नाम्ना, धाम्ना कनकजीत्वरी ॥ विद्याभिर्भारती साक्षा–दिव सा ववृद्धे क्रमात् ८५

कर्यु ॥ ७९ ॥ संघरीराखेला धननी पेठे पूर्वभवसंबंधि श्रुतने पामीने ते श्रुतवडे ग्रहण करेला दीवानी पेठे आर्द्रककुमार मुनि मुनींद्रोना मार्गने जोवा लाग्या ॥८०॥ तपथी शरीरने सुकवी नाखता अने शुभ भावनाने वृद्धि पमाडता ते मुनि पासथी छुटा थयेला पक्षीनी पेठे पृथ्वी उपर विहार करवा लाग्या ॥८१॥ हवे पोताना रमणीकपणाथी नगरवासीओए अमरावतीनी तुल्य करेलुं तथा समृद्धिना स्थानरूप वसंतपुर नामनुं नगर छे ॥८२॥ ते नगरमां देवदत्त नामनो शेठ रहेतो हतो. जे शेठ गुणे करीने राजाने पण मान्य हतो. ते शेठने एकठा करेला उत्तम शीलरूप धनवाली धनवती नामनी स्त्री हती ॥ ८३ ॥ हवे ते बंधुमतीनो जीव देवभवथी चवीने तेमनी (पुत्र थकी पण अधिक प्रीय एवी) पुत्रीपणे उत्पन्न थयो ॥८४॥ श्रीमती एवा नामथी प्रसिद्ध थयेली सुवर्ण समान तेजवाली अने विद्याथी साक्षात् सरस्वती तुल्य ते कन्या अनुक्रमे वृद्धि पामी ॥८५॥ हवे भाग्य योगथी खेंचायला

नियत्या प्रेरितः प्राप्य, वसंतपुरमार्द्रकिः ॥ बहिर्देवकुले क्वापि, तस्थौ प्रतिमयाऽथ सः ॥ ८६ ॥
इतश्च श्रीमती साऽपि, सखीभिः सह खेलितुम् ॥ संकेतितेव प्राग्जन्म-जर्त्रा तत्रागमत्तदा ॥८७
कुर्वंत्यो वरवरण-क्रीडां व्रीडां विनाऽखिलाः ॥ सख्यो देवकुलस्तंभान्, वव्रुर्धिक् बालचापलम्॥८८॥
मृगीव मुग्धा भ्राम्यंती, सर्वतोऽपीभ्यनंदनी ॥ स्तंभं कमपि नापश्यत्, सा स्वस्य वरणोचितम् ८९
स्वं स्वं स्तंभममुंचंत्यः, सत्यं पतिमिवाथ ताः ॥ उचुः किं दुर्भगाऽसि त्वं, सखि नाप्नोषि यद्वरम् ९०
तदरंतुदमाकर्ण्य, वचनं सा क्षणं स्थिता ॥ भिन्नेव शक्त्या दष्टेवा-लिना लिढेव वह्निना ॥ ९१ ॥

ते आर्द्रककुमार मुनि वसंतपुर नगरे आवीने बहार कोइ पण देवमंदिरमां कायोत्सर्गे रह्या ॥ ८६ ॥ हवे ते श्रीमती पण सखीओनी साथे क्रीडा करवा माटे ते जाणे पूर्वजन्मना पतिनी साथे संकेत करी राख्यो होयनी ? तेम ते वखते त्यां आवी ॥ ८७ ॥ त्यां लाज विना वर वरवानी क्रीडा करती ते सर्वे सखीओए देवमंदिरना स्थंभने पतिपणे वर्या. अहो बालकना चपलपणाने धिक्कार थाओ ॥ ८८ ॥ भोळी मृगलीनी पेठे चारे तरफ पण भमती एवी ते शेठनी पुत्री श्रीमती पोताने वरवा योग्य कोई पण स्थंभने जोई शकी नही ॥ ८९ ॥ पछी साचा पतिनी पेठे पोत पोताना स्थंभने नहि मूकती एवी ते सखीओ कहेवा लागी के-हे सखि ! तुं शुं दुर्भाग्यवाळी छे ? जे वरने नथी पामती ॥ ९० । ते हृदयभेदक वचनने सांभळीने श्रीमती तरवारथी भेदायली होयनी ? विछिथी दंशदेवायली होयनी ? अथवा तो अग्निवडे दझायली होयनी ? एम क्षणमात्र स्थिर थइने

त्रस्तैणलोचना सापि, भ्रमंतीतस्ततस्ततः ॥ तमेव मुनिमैक्षिष्ट, प्राक्पुण्यैर्दर्शितं रहः ॥ ९२ ॥
अयं मया वृतः सख्यो, नाहं मोक्ष्ये कदाऽप्यमुम्॥ स्वं स्वं वरं जवंत्योऽपि, मात्याक्षुश्चेत्पतिव्रताः॥९३॥
इति तस्यां प्रजल्पंत्यां, वृतं सुष्ठ्विति जाषिणी ॥ रत्नौघं देवताऽवर्ष–द्गर्जिजर्जरितांबरः ॥ ९४ ॥
सखीषु गर्जित्रस्तासु, साधुपादद्वयांतरा ॥ शारदीव नदी कूल–द्वयांतः श्रीमती स्थिता ॥ ९५ ॥
अवधुयाथ तां बालां, तूलालानमिव द्विपः ॥ ततः प्रतस्थे वेगेन, दिव्यवाक्चकितो मुनिः ॥९६॥
तत्रैत्य नृपतिः पौरैः, सहादित्सत तद्धनम्॥ अनाथस्य धनस्य स्या–द्राजा स्वामीति नीतिवित्॥९७

उभी रही. ॥ ९१ ॥ पछी त्रासपामेला मृगना सरखां नेत्रवाली ते श्रीमतीए पण आमतेम भमतां पूर्वना पुण्ये देखाडेला तेज मुनिने एकांतमां उभेला दीठा. ॥ ९२ ॥ हे सखीओ ! हुं आने वरी छुं. हवे क्यारे पण एने हुं नहि मूकुं, तमे पण जो पतिव्रता हो तो पोत पोताना वरने त्यजी देशो नही ॥ ९३ ॥ एम ते कन्या कहेती हती एवामां “ तें सारुं वर्युं. ” एम कहेती एवी देवीये गर्जनाथी आकाशने जर्जरीत करतां रत्न समूहनी वृष्टि करी. ॥ ९४ ॥ सखीओ गर्जनाथी त्रास पामी एटले श्रीमती बे कांठानी वचमां रहेली शरद् ऋतुनी नदीनी पेठे मुनिना बे पगनी वचमां संताइ गइ. ॥ ९६ ॥ पछी हाथी आक-डाना थंभना बंधनने जेम तोडी नाखे तेम दिव्यवाणीथी चकित थयेला मुनि ते बालाने छोडावी नाखीने त्यांथी वेगे करी नासी गया. ॥ ९६ ॥ जेनो कोइ स्वामी नथी एवा धननो स्वामी राजा होय छे. एवी नीतिनो जाण राजा नगरवासी लोको सहित त्यां आवीने ते धनने लेवानी इच्छा करवा लाग्यो. ॥ ९७ ॥ पछी देवीए तिरस्कार पूर्वक कह्युं के–

साक्षेपमाचचक्षेऽथ, देवी किं भूप गृध्यसि ॥ धनमेतन्मयादायि, श्रीमतीवरणोत्सवे ॥ ९८ ॥
तदेवदत्त एवैत–दादत्तां कोऽपि नापरः ॥ देव्येत्युक्ते तदादत्त, श्रेष्ठयेव सकलं धनम् ॥ ९९ ॥
देवदत्तो धनैः पूर्णः, कौतुकैश्च महाजनः ॥ स्वं स्वं धामेयतुः क्वापि, कन्यापि फलदायिनी॥ १०० ॥
काले जामातृचिंतार्त्तं, श्रीमती जनकं जगौ ॥ तात यः प्रागमया वव्रे, भीता यं शरणं व्यधाम् ॥१॥
गृह्णता वरणं द्रव्यं, यस्मै दत्ता त्वयाप्यहम् ॥ मुनीश्वरः स एवास्तु, वरो मे किमु ताम्यसि ॥२॥
साक्षिणोऽत्र पुरीलोकाः, साक्षिणी सा च देवता ॥ वदामि नीतिबाह्यं चे–त्तदा मां वारयंत्वमी ॥३॥

हे भूप! तुं शी इच्छा करे छे? में आ धन श्रीमतीने वरवाना (विवाहना) उत्सवमां आप्युं छे. ॥९८॥ माटे कन्यानो पिता देवदत्त ए धनने गृहण करो. बीजो कोइ पण नहीं. देवीए एम कह्युं एटले देवदत्त शेठेज ते सघलुं धन गृहण कर्युं. ॥ ९९. ॥ पछी धनथी परिपूर्ण थयेल देवदत्त शेठ अने कौतुकथी आश्चर्य पामेल सर्व महाजन पोतपोताने घेर गया. अहो! कोइ ठेकाणे कन्या पण फल आपनारी थाय छे. ॥ १०० ॥ पछी अवसरे जमाइनी चिंता करता एवा पिताने श्रीमतीए कह्युं के–हे तात! पूर्वे में जेने वरेल छे, अने भय पामेली हुं जेने शरणे गइछुं ॥ १ ॥ वरवाना द्रव्यने गृहण करता एवा तमे पण जेने माटे मने आपी छे, तेज मुनीश्वर महारो पति थाओ. तमे शा माटे वृथा खेद करो छो? ॥२॥ एमां नगरना लोक साक्षी छे अने ते देवी पण साक्षी छे. जो हुं नीति वगरनुं बोलती होउं तो एओ मने वारो. ॥ ३ ॥ एवा ते पुत्रीना निश्चयने जाणी उत्तम एवा देवदत्त शेठे कह्युं के–हे हाही पुत्री! कहे? वायुनी

एवं तन्निश्चयं ज्ञात्वा, बभाषे श्रेष्ठिपुंगवः ॥ वद विज्ञे स विज्ञेयः, कथं वायुरिव भ्रमन् ॥४॥
सा प्रत्यवोचतामंद–मंदाक्षमृदिताक्षरम् ॥ सम्यक् जानाम्यहं तात, तमवामांघ्रिलक्ष्मणा ॥५॥
ददाना दानशालायां, तव दानमनारतम् ॥ काले तमपि लप्स्येऽहं, दानं भोगफलं यतः ॥६॥
भ्रमंति भिक्षवो दानि–गेहेष्विति विचारयन् ॥ श्रेष्ठयथातिथिवर्गाय, पुत्र्या दानमदापयत् ॥७॥
सापि तत्रेयुषां दत्वा, शुद्धान्नमनगारिणाम् ॥ नत्वा पदिकवत्पादा–न्वेव लक्ष्मार्थमैक्षत ॥८॥
साभूत्कल्पलता साधु–ष्विष्टभक्तादिदानतः ॥ इप्सितापूरणात्ते तु, तत्रासन्नवकेशिनः ॥९॥

पेठे भमता एवा ते मुनिने शी रीते ओलखवा ? ॥ ४ ॥ श्रीमतीए घणी लज्जाने लीधे मंद मंद वचने कह्युं के–हे तात ! हुं तेमने जमणा पगना चिन्हे करीने सारी रीते जाणुं छुं ॥ ५ ॥ दानशालामां निरंतर तमारा तरफथी दान आपती एवी हुं अवसरे तेने पण पामीश. कारण दान फलवालुं छे ॥ ६ ॥ भिक्षुको दानेश्वरी पुरुषोनां घरने विषे भमे छे, एम विचारीने पछी देवदत्त शेठे पण पुत्रीना हाथथी मुनिओने दान अपाववा मांडयुं. ॥ ७ ॥ ते श्रीमती पण त्यां आवता एवा साधुओने शुद्ध अन्न पाणी आपीने तथा नमीने पगीनी पेठे पगनां चिह्नने जोवा लागी ॥ ८ ॥ जोके ते श्रीमती तो साधुओने इच्छित एवां अन्नपानादिक आपवाथी कल्पलतारूप थइ. परंतु साधुओ तो श्रीमतीनी इच्छाने अपूर्ण करवाने लीधे त्यां निष्फल थवा लाग्या. ॥ ९ ॥ ए प्रमाणे अरण्यमां रहेली मालतीनी पेठे

एवं निष्फलतारुण्या–रण्यानी मालतीव सा ॥ आशयैवातिचक्राम, क्रमाद् द्वादशवत्सरीम् ॥१०॥
विहरन् वसुधापीठे, विस्मृत्या विधुरीकृतः ॥ तदेव देवयोगेना–जगाम पुरमार्द्रकिः ॥११॥
स भोगकर्मविभ्रांत–मानसो दानसद्म तत् ॥ अनाहूतोऽप्यगाद्भृंग, इव सत्कुसुमं द्रुमम् ॥ १२ ॥
मुदा प्रदाय शुद्धान्न–पानमानम्य सा मुनिम् ॥ लक्षणं दक्षिणांघ्रिस्थं, वीक्ष्य सम्यगलक्षयत् ॥१३॥
तत्कालोद्भुतरोमांच–त्रुटत्कंचुकबंधना ॥ शमयंतीव हर्षाश्रु–सलिलैर्विरहानलम् ॥ १४ ॥
मेघागमे मयुरीव, नृत्यंती निजगाद सा ॥ जाने दानेन नश्यंति, दुरितानीति सूनृतम् ॥ १५ ॥

निष्फल जती युवावस्थावाली श्रीमतिये आशावडेज अनुक्रमे बार वर्ष नित्त कर्या. ॥ १० ॥ एवामां पृथ्वी उपर विहार करता अने विस्मृतिथी विकल थयेला आर्द्रक कुमार मुनि देवयोगे तेज वसंतपुर नगरे आव्या. ॥ ११ ॥ भमरो उत्तम पुष्पवाला वृक्ष तरफ जेम जाय तेम भोगावलि कर्मथी भ्रमित थयेला मनवाला आर्द्रक मुनि ते दानशाला प्रत्ये न बोलाव्या छतां पण गया. ॥ १२ ॥ श्रीमतिए पण मुनिने हर्षथी शुद्ध अन्नपान वहोरावी अने नमन करी तेमना जमणा पगमां रहेलां चिन्हने जोइने सारी रीते ओलखी काढया. ॥ १४ ॥ तत्काल प्रगट थयेला रोमांचथी तुटी गया छे कंचुकीना बंधन जेना, तथा हर्षना आंसुथी विरहाग्निने शांत करती होयनी ? एवी ते श्रीमती मेघना आववाथी मोरलीनी पेठे नाचती छतां कहेवा लागी. हुं जाणुं छुं के–दानथी पापो नाश पामी जाय छे ए वचन सत्य छे. ॥ १५ ॥ हे स्वामि ! भले पधार्या ! भले पधार्या ! ! तमे आटला घणा वखत सुधी क्यां रह्या हता ?

स्वागतंस्वागतं स्वामिन्, कस्थितस्त्वमियच्चिरम्॥ कोऽयंस्निग्धजने द्वेषः,कृपापितवनास्तिकिम्॥१६॥
जीविताहमीयत्कालं—माशया फलिताद्य सा ॥ तदंगीकुरु मां यासि, कथं संप्रति लक्षितः ॥ १७॥
भ्रातरस्त्वरितायाता-स्तावत्तस्या बभाषिरे ॥ भक्तेच्छो भक्तदात्री ते, मिलिता विमुखोऽसि किम् ॥१८॥
मुने त्वमेव विज्ञो यत्, मुक्त्वा बालामिमां तदा॥ संप्रत्युद्योवनां ज्ञात्वा, पारापत इवापतः ॥ १९॥
व्रतं पालयितुं तुर्य—मेतां मुंचसि चेत्तदा ॥ आद्यं लुंपसि ही पादौ रक्षतो लिप्यते शिरः ॥ २० ॥
रे रे भंक्ष्व व्रतं किं मे, नाहं सोऽस्मीती वादिनम् ॥ कन्योचे मुनिमग्रेऽपि, भग्ना पंचव्रती तव ॥२१॥

प्रेमी माणस उपर आ द्वेष श्यो ? तमारी कृपा पण शुं नथी ? ॥ १६ ॥ हुं आटला वखत सुधी जे [illegible]शाथी जीवती रही ते आजे सफल थइ छे, माटे मने अंगीकार करो. हवणां ओलखायला तमे शी रीते नासी जशो ? ॥ १७ ॥ तेटलामां तरत आवेला श्रीमतीना भाइओ मुनिने कहेवा लाग्या के—हे मुनि ! तमे भोजननी इच्छावाला छो ? अने भोजननी आपनारी तमने मली छे, तो पछी केम विमुख थाओछो ? ॥१८॥ हे मुनि ! तमेज खरेखरा चतुर छो, जे ते वखते आ बाल्य अवस्थावालीने त्यजीने गया हता अने हवणां प्रकट यौवनवाली जाणीने पारेवानी पेठे आव्या छो. ॥ १९ ॥ जो तमे चोथुं व्रत पालवा माटे एने त्यजो छो तो अमने खेद थाय छे के—एम करवाथी तमे पहेला व्रतने भंग करो छो, अने तेम करवाथी तो बे पगनुं रक्षण करवा जतां मस्तक लेपायछे. ॥२०॥ "अरे अरे! तमे शुं महारा व्रतने भांगो छो? हुं ते नथी" एम कहेता एवा मुनिने कन्याए कह्युं के—आगलथी तमारा पांच व्रत भांगेलां छे. ॥ २१ ॥ [illegible] जीव एवा महारे विषे कृपा त्यजी देनारा तमने पहेलुं

स्थूले जीवे मयि त्यक्त–कृपस्याद्यं क ते व्रतम्॥ नाहं स इति वाचैव, द्वितीयमपि हारितम् ॥२२॥
मम चोरयतश्चेतो, रत्नं क च तृतीयकम्॥ रामाया मे हृदि स्थान–कृतस्तुर्यमपि क्षितम् ॥२३॥
तृतीयतुर्ययो र्भंगे, भग्नमेवास्ति पंचमम् ॥ प्रपन्नायां मयि पुन–र्जीवति व्रतमादिमम् ॥२४॥
यद्वा नाहं स इत्युक्त्या, त्वमेव ज्ञापयन्नसि ॥ हंसोऽस्मि पुनरेषोऽपि, हंसीसंबंधमर्हति ॥२५॥
अथ पित्रापि कन्याया, भूपेनाप्येत्य कौतुकात् ॥ भृशमभ्यर्थितोऽस्मार्षी–न्महर्षिर्दैवतं वचः ॥२६॥
नंष्टुमप्यक्षमः सर्वैः, प्राकारीभूयवेष्टितः ॥ वसत्यपि पुरे वेषं, मोचितः शालकैर्मुनेः ॥२७॥

व्रत क्यांथी होय ? अने ते हुं नथी, एवुं वचन तमे बोल्या तेथीज बीजुं व्रत पण हारी गया छो. ॥ २२ ॥ तथा म्हारा चित रत्नने चोरता एवा तमने त्रीजुं व्रत क्यांथी होय ? वली स्त्री एवी म्हारा हृदयमां स्थान करनारा तमारूं चोथुं व्रत पण नाश पाम्युं छे. ॥ २३ ॥अने त्रीजा तथा चोथा व्रतनो भंग थवाथी पांचमुं व्रत भंगायेलुंज छे. वली मने अंगीकार करो तो पहेलुं व्रत जीवे. ॥ २४ ॥ अथवा (नाहं स के०) ते हुं नथी, अने बीजा अर्थमां मनुष्यरूप हंस एवां तमारां वचनथी तमेज जणाव्युंछे, जे हुं हंस छुं, तो वली ए हंस पण हंसीना संबंधने योग्य छे. ॥ २५ ॥ पछी कन्याना पिताए तथा कौतुकथी राजाए त्यां आवीने अतिशय विनंति करायला एवा ते महामुनि देवतानां वचनने संभारवा लाग्या. ॥ २६ ॥ सर्वे लोकोए गढनी पेठे घेरी लीधेला होवाथी नासी जवाने असमर्थ ते मुनि नगरमां रह्या, अने सालाओए मुनिना वेषने मूकाव्यो

सोऽपवादपदेनेव, श्रीमतीं परिणीतवान् ॥ पाथोधिपूरवत्कर्म–विपाकः केन रुध्यते ॥२८॥
कन्याया वरणे देव्या, यत्प्राप क्ष्मापसाक्षिकम् ॥ अदत्त देवदत्तस्त–द्वित्तमस्मै तदा मुदा ॥२९॥
भुंजानस्य तया साकं, भोगान् प्राग्भवभार्यया ॥ तस्या भूत्तनयः काले, फलं गार्हस्थ्यभूरुहः ॥३०॥
संजाते व्यक्तसंज्ञेऽस्मिन्, बाले सौभाग्यशालिनि ॥ मुक्तमंतर्गृहं साधुवेषमेष स्वमैक्षत ॥३१॥
स्वं समुद्धर्तुकामोऽथ, श्रीमतीमभ्यधत्त सः ॥ प्रिये पुत्रसहा यासि, मुंच मामाद्रिये व्रतम् ॥३२॥
अदत्त्वैवोत्तरं सापि, शोकाद्बाष्पायितेक्षणा ॥ कुतोऽपि तर्कुमानीय, समारभत कर्त्तनम् ॥ ३३ ॥

॥ २७ ॥ पछी ते आर्द्रक कुमार अपवादना पदथी होयनी ? एम श्रीमतिने परण्या. अहो ! समुद्रना पूर सरखो कर्मविपाक कोना वडे रोकी शकाय ? ॥ २८ ॥ कन्याने वरवामां देवी पासेथी राजानी साक्षीपूर्वक जे धन प्राप्त थयुं हतुं, ते धन देवदत्त शेठे ते वखते हर्षथी आर्द्रककुमारने आपी दीधुं ॥ २९ ॥ पूर्वभवनी भार्या एवी ते श्रीमती साथे भोग भोगवता तेमने अवसरे गृहस्थाश्रमरूप वृक्षना फलरूप पुत्र थयो. ॥ ३० ॥ सौभाग्यथी शोभतो ए बालक ज्यारे कांइक महोटो थयो एवामां आर्द्रककुमारे घरनी अंदर मूकीराखेला पोताना साधुवेषने दीठो. ॥ ३१ ॥ पछी पोतानो उद्धार करवानी इच्छावाला आर्द्रक कुमारे श्रीमतिने कह्युं के–हे प्रिये ! तुं पुत्रवाली थइ छे, माटे मने मूके तो हुं व्रतने आदरुं. ॥ ३२ ॥ श्रीमति पण उत्तर आप्या विनाज शोकथी आंसुयुक्त नेत्रवाली थइ छती क्यांइथी रेंटीयाने लावीने सूतर कांतवा लागी. ॥ ३३ ॥ एटले ते आर्द्रककुमारनो प्रथमथी शीखवी राखेलो ललीत वाणीवालो पुत्र

पुत्रः प्राक्शिक्षितस्तस्य, श्रीमतीं लल्लगीर्जगौ ॥ मातस्त्वमपि कर्मेदं, निर्वीरेव करोषि किम् ॥३४॥
जीवत्सु जनकभ्रातृ–पतिपुत्रेष्वपि त्वया ॥ एतच्च किं समारेभे, रोदने शोकलक्षणम् ॥ ३५ ॥
सा प्रोचे वत्स मां मुक्त्वा, त्वत्पिता क्वापि यास्यति ॥ चाद्यापि त्वं शिशुस्तन्मे, वृत्तिरेषैव शाश्वती ॥३६
अद्यापि तारं तारुण्य–मकारुण्यश्च मन्मथः ॥ दुर्लंघ्या कुलमर्यादा, न जाने किं भविष्यति ॥ ३७ ॥
वारयिष्याम्यहं यातं, मातस्तातमिति ब्रुवन् ॥ बालोऽकर्कशधीस्तर्कु–माच्छिनज्जननीकरात्॥ ३८ ॥
लोलचक्षुश्चलत्काक–पक्षः किंचित्स्मिताननः ॥ तर्कूकृतेन सूत्रेण, स वप्तारमवेष्टत ॥ ३९ ॥

श्रीमती माताने पूछवा लाग्यां के–हे मात ! पति पुत्र विनानि स्त्रीनी पेठे तुं आ शुं काम करे छे ? ॥ ६४ ॥ वली पिता भाई पति अने पुत्र जीवतां छतां तें आ शोक लक्षणवालुं रुदन केम आरंभ्युं छे ? ॥ ३५ ॥ श्रीमती कहेवा लागी के–हे वत्स ! तारो पिता मने त्यजीने क्यांइ पण जाय छे. वली हजी पण तुं बालक छे, तो मारो आ रेंटीओ छे तेज कायमनी आ जीवीका छे. ॥ ३६ ॥ हजी सुधी महारुं उत्तम एवुं योवनपणुं छे, अने दया वगरनो कामदेव छे, वली न उल्लंघी शकाय एवी कुलमर्यादा छे, तेथी हुं नथी जाणी शकती के हवे शुं थशे? ॥ ३७ ॥ हे मात ! हुं जता एवा महारा पिताने वारिश, एम कहेता एवा कोमल बुद्धिवाला बालके माताना हाथथी रेंटीयाने छोडावी नाख्यो ॥ ३८ ॥ चंचल नेत्रवाला, चपल शिखावाला अने कांइक हसता मुखवाला ते पुत्रे रेंटीयाथी उकेली लीधेला सूत्रवडे पिताने वींटी लीधा. ॥ ३९ ॥ अने कहेवा लाग्यो के-

उचे च मातर्मारोदी–र्मारोदीरितवेदना ॥ मया नियंत्रितो बाढं, न तातः क्वापि यास्यति ॥ ४० ॥
वद तात समर्थोऽपि, कथं यास्यस्यतःपरम् ॥ नवे वयसि मुक्त्वा मे, मातरं विरहातुराम् ॥ ४१ ॥
सोऽवक् सत्यमिदं पुत्र, बद्धोऽहं वचसैव ते ॥ वेष्टव्यथां वृथा कुर्वे–त्येते किं तव तंतवः ॥ ४२ ॥
यावंतस्तंतवः संति, समाः स्थास्यामि तावतीः॥ ते चासन् द्वादशैवेति, सोऽस्थात् द्वादशवत्सरीम्॥४३॥
ततो द्वादश वर्षेषु, गतेषु लवलीलया ॥ स दध्यौ ही प्रमादेन, छलितोऽयं जनः कथम् ॥ ४४ ॥
यत्पुराऽभयमित्रेण, बोधिरत्नमढौक्यत ॥ तज्जाग्रतोऽपि मेऽहारि, हहा विषयतस्करैः ॥ ४५ ॥

हे मात ! कंदर्पे प्रगट करेली पीडावाली तुं न रो. कारण के–में अत्यंत बांधी लीधेला मारा पिता क्यांइ पण नहिं जाय. ॥४०॥ हे तात ! कहो ! तमे समर्थ छतां पण हवे पछी नवीन अवस्थामां विरहथी व्याकुळ एवी म्हारी माताने मूकीने शी रीते जशो ? ॥ ४१ ॥ आर्द्रक कुमारे कह्युं हे पुत्र ! ए सत्य छे. हुं तारां वचनथीज बंधायलो छुं. आ सूतरना तांतणा तारी विटाल-वानी पीडाने शुं वृथा करे छे ? अर्थात् नथी करता. ॥४२॥ जेटला तंतुओ छे तेटला वर्ष रहीश. वली ते तुंतुओ बारज हता, ए कारणथी ते आर्द्रक कुमारबीजा बार वर्ष गृहवासमां रह्या. ॥ ४३ ॥ पछी सहेजवारमां बार वर्ष चाल्या गया एटले आर्द्रक कुमार विचार करवा लाग्या के–धिकार थाओ ! जे प्रमाद वडे आ हुं केम छेतरायो ? ॥४४॥ जे पूर्वे अभयकुमार मित्रे मने बोधिरत्न मोकल्युं हतुं, ते मारा जागता छतां पण अरे ! विषय चोरोए चोरी लीधुं. ॥ ४५ ॥ हुं अनार्य देशमां उत्पन्न

अनार्येष्वहमुत्पेदे, मनसा प्राक्च्युतव्रतः॥ सर्वथा च्युतचारित्रो-ऽधुना यास्यामि कां गतिम् ॥४६॥
लब्धपोतोऽप्यहंमग्नो,लब्धान्नःक्षुधितोऽस्म्यहम्॥भ्रष्टोऽहंलब्धसार्थोऽपि,ग्लानो लब्धौषधो ऽप्यहम् ॥४७॥
लब्धश्रीरपि दुःस्थोऽहं, लब्धविद्योऽप्यहं जडः॥ यल्लब्धजिनधर्मोऽपि, विषयैर्व्यथितोऽस्म्यहम् ॥४८॥
यद्वा किं चिंतया शुद्ध्यै, संप्रत्यपि तपः कृतम् ॥ भावोऽस्ति चेत्तदा पश्चा-दपि दूरे न निर्वृतिः ॥४९॥
निश्चित्येति प्रियां पृष्ट्वा, प्रातः परिजनं च सः ॥ नीडादिवांडजो गेहा-न्निर्ययौ व्रतवेषभाक् ॥५०॥
सोऽथ वीरं जिनं नंतुं, पुरं राजगृहं प्रति ॥ प्रचलन्नंतराद्राक्षीत्, भटपंचशतीं वने ॥ ५१ ॥

थयो ते मनथी व्रतभंगनुं कारण छे ! अने हवणां सर्वरीते चारित्रभ्रष्ट थयो छुं, तो हवे हुं कइ गतिमां जइश ? ॥ ४६ ॥ वहाण प्राप्त थया छतां हुं बूडयो, अन्न मल्या छतां हुं भूख्यो रह्यो. संघात मल्या छतां हुं भूलो पडयो, अने औषध प्राप्त थया छतां पण हुं रोगी रह्यो छुं. ॥ ४७ ॥ वली लक्ष्मी प्राप्त थया छतां हुं दरिद्री रह्यो अने विद्या भण्या छतां पण हुं जड रह्यो. जे जिनधर्म प्राप्त कर्या छतां पण विषयोथी हुं पीडा पामेलो छुं. ॥ ४८ ॥ अथवा हवे चिंता करवाथी शुं ! हवणां पण शुद्धिने माटे करेलुं तप तथा जो भाव छे तो पाछलथी पण मोक्ष दूर नथी. ॥ ४९ ॥ आम निश्चय करीने सवारे स्त्री तथा परिवारना माणसोनी रजा लइने ते आर्द्रक कुमार मालामांथी पक्षीनी पेठे साधुनो वेश धारण करीने घरथी चाली नीकल्या. ॥ ५१ ॥ पछी वीरप्रभुने नमन करवा माटे राजगृह नगर तरफ जता एवा ते आर्द्रक मुनिए मार्गमां वनने विषे पोताना पांचसो सुभटोने दीठा ॥ ५१ ॥ ते सर्वे सभटोए ओलखीने मुनिने वंदना करी. अने मुनिए पण तेओने ओलखीने कह्युं

प्रत्यभिज्ञाय तैः सर्वैः, ववंदे मुनिपुंगवः ॥ सोऽपि तानुपलक्ष्योचे, कुतो यूयं वनेऽत्र भोः ॥५२॥
तेऽप्युचुस्त्वं पलायिष्टा, विश्वास्यास्मान् यदा तदा॥ च्युतन्यासा इव भिया, न भूपमुपजग्मिम॥५३॥
भवद्दिदृक्षया भ्रांत्वा, भुवं संभूय भूयसीम् ॥ अत्रायाता अतिष्ठाम, जीवंतश्चौर्यचर्यया ॥५४॥
साधुः कृपोदधिस्तेषां, बोधायेदमुपादिशत् ॥ भवद्भिः कुलजैः केयं, प्रारंभे पापजीविका ॥५५॥
एतद्धनं शिवस्याध्वा, स्याद्योग्याय निसेवितम् ॥ तदेव सेवितं चौर्य–कृते नरकवर्त्तिनी ॥५६॥
चौरो हारयति स्वार्थं, परार्थहरणोद्यतः॥ साधुस्तु साधयन् स्वार्थं, परार्थायापि कल्पते ॥ ५७॥

के–हे सुभटो ! आ वनमां तमे कयांथी ! ॥ ५२ ॥ ते सुभटोए कह्युं के–ज्यारे तमे अमने विश्वास पमाडी नासी गया त्यारे अमे पण थापण ओलवनारानी पेठे भयथी राजानी पासे गया नहीं. ॥ ५३ ॥ परंतु तमने मलवानी इच्छाए करी भमता तथा घणी पृथ्वी उल्लंघन करीने अहिं आव्या, अने चोरीनां काम करता जीवता छतां अहिं रह्या छीए. ॥ ५४ ॥ पछी कृपाना समुद्र एवा आर्द्रक कुमार मुनिए तेमने बोध करवा माटे आ प्रमाणे कह्युं. अरे ! कुलवंत एवा तमोए शुं आ पाप जीविका आरंभी छे ? ॥ ५५ ॥ आ शरीररूप धन योग्य धर्मकार्य माटे रक्षण कर्युं छतुं मोक्ष आपनारुं थाय छे. अने तेज धन चोरी माटे सेव्युं छतुं नरक आपनारुं थाय छे. ॥ ५६ ॥ पारका धनने हरण करवा माटे तैयार थयेलो चोर पोताना स्वार्थने हारी जाय छे अने साधु तो निरंतर पोताना स्वार्थने साधतो छतो परोपकार माटे कल्पाय छे. ॥ ५७ ॥ माटे हे

तद्भो: स्तैन्यं समुत्सृज्य, भजध्वं संयमश्रियम् ॥ माभून्मानुष्यकं पापा, दुःप्रापं भवतां पुनः ॥५८॥
यातबोधा गतक्रोधा, योधास्ते तस्य शिक्षया ॥ आत्तदीक्षा न्यषेवंत, तं चिरस्वामिनं पुनः ॥५९॥
अन्वितस्तैर्मुनींद्रोऽथ, कलभैरिव कुंजरः ॥ व्रजन् राजगृहं हस्ति–तापसाश्रममीयिवान् ॥६०॥
निवाराद्यै मृगाद्यैश्च, बहु जंतुक्षयो ह्यतः ॥ तापसा घ्नंति यत्रैकं, वारणं प्रतिपारणम् ॥६१॥
तापसैर्निविडं, बद्धो, भारशृंखलया तदा ॥ आलोकत तमायांतं, गजो गजगतिं यतिम् ॥ ६२ ॥
वंदेऽहमप्यमुं मुक्त–बंधः स्यां चेदिति द्विपे ॥ ध्यायत्येवात्रुटत्तस्य, शृंखला जीर्णरज्जुवत् ॥६३॥

पापीओ ! तमे चोरीने त्यजी दइ संयम लक्ष्मीने सेवो के-जेथी तमने फरी मनुष्य भव दुर्लभ न थाय. ।५८। मुनिना आवा उपदेशथी प्रतिबोध पामेला अने क्रोध रहित थयेला ते पांचसो योद्धाओ दीक्षा लईने फरी ते पोताना पूर्वना स्वामीनी सेवा करवा लाग्या.५९ पछी बच्चाथी विंटलायेला हाथीनी पेठे ते पांच सो शिष्योथी विंटलायला आर्द्रक कुमार मुनिराज राजगृह नगर तरफ जता छता हस्तितापसनामना आश्रममां आव्या॥६०॥निश्चे वनना धान्य विगेरेथी अने मृग विगेरेने मारवाथी घणा जीवोनो घात थायछे, एम माननाथी जे आश्रममां तापसो दरेक पारणे एक हाथीने मारे छे. ॥ ६१ ॥ ते वखते तापसोए भार सांकल वडे मजबूत बांधेला हाथीए ते आवता एवा हाथीना सरखी चालवाला मुनिने दीठा ॥ ६२ ॥ जो हुं बंधनथी मुक्त थाउं तो हुं पण आ मुनिने वंदन करुं, एम हाथीए विचार कर्यो एवामांज तेनी सांकल जूनी दोरडीनी पेठे त्रुटी गइ. ॥ ६३ ॥ मुनि तरफ बंधन विनानो

सिंधुरे धावमानेऽस्मि–न्मुनिं प्रति विबंधने॥ इतस्ततो जनोऽत्रस्य–द्धीरधीर्न पुनर्मुनिः ॥ ६४ ॥
अवंदि स पदौ स्पृष्ट्वा, स्वकरेण करेणुना ॥ निर्जितेनेव शौंडीर्यो–न्नत्यगत्यादिभिर्गुणैः ॥ ६५ ॥
मनसा मुनिसारेऽत्र भूरिभक्ति र्द्विपस्ततः॥ स्वधाम्नीव वनेऽवीक्ष–ल्लोकानां कृतकौतुकः ॥ ६६ ॥
तं तस्यातिशयं हरित–तापसा असहिष्णवः ॥ सर्वेऽप्याजग्मुरूचुश्च, जटिलाः कुटिलाशयाः ॥६७॥
भिक्षो व्यर्था क्रिया भूरि–जीवपिंडाशिनस्तव॥ वयं तु धार्मिकाः कुर्मो, हस्तिनैकेन पारणम्॥६८॥
पशुना पशुदेश्यस्त्वं, गजेन यदि वंदितः ॥ तत्किं नाश्चित्रमित्युक्ते, तैरुवाच मुनीश्वरः ॥ ६९ ॥

ए हाथी दोडवा लाग्यो एटले माणसो त्रास पामी आम तेम नासवा लाग्या, परंतु धीर बुद्धिवाला मुनि त्रास पाम्या नही.॥६४॥ पछी शूरवीरपणाथी, महोटापणाथी अने गति विगेरे गुणोथी जाणे पोते जीताएलो होयनी? एवा ते हाथीए पोतानी सुंढ वडे मुनिना पगने स्पर्शकरीने वंदना करी.॥६५॥ पछी मनवडे ए उत्तम मुनिने विषे घणी भक्तिवालो हाथी लोकोने आश्चर्य पमाडवा पूर्वक पोतानां घरनी पेठे वनमां पेसी गयो. ॥ ६६ ॥ आर्द्रककुमार मुनिना ते अतिशयने नहि सहनकरी शकनारा जटाधारी कपटचितवाला सर्वे हस्तितापसो त्यां आव्या अने कहेवा लाग्या. ॥ ६७ ॥ हे भिक्षु ! घणां जीवपींडोने भक्षण करनारा तमारी क्रिया व्यर्थ छे. वली धर्मवंत तो अमे जे एकज हाथीवडे पारणुं करीये छीये. ॥ ६८ ॥ पशु एवा हाथीवडे वंदायलो तुं पशु सरखो छे. ते शुं अमने आश्चर्य छे ? एम ते तापसोए कह्युं एटले मुनीश्वर कहेवा लाग्या के–॥ ६९ ॥ जेवी एक एवी

एकापि पापाय यथोरुजंतु, हत्या तथा न प्रचुरापि चान्या ॥
अंगस्य भंगाय शिलैककापि, यथा तथा स्यात्किमु कर्करौघः ॥ ७० ॥
स्वार्थसाधितभक्तेषु, मध्याह्ने लोकसद्मसु ॥ अल्पाल्पमाददानस्य, नास्ति हिंसकता मम ॥ ७१ ॥
मांसव्रता न तावद्वः, करुणा करिघातिनाम्॥ निःकृपाणां कुतः पुण्यं, निःपुण्यानां क्रियैव का ॥७२॥
एवं वो लाभमिच्छूनां, मूलक्षितिरुपस्थिता ॥ तद्भजध्वं कृपामेका—मेकांतसुकृतार्थिनः ॥ ७३ ॥
द्विपः कृपास्पदं सौम्यं, यदि मां शरणं गतः ॥ भवद्भ्यो घातकेभ्योऽयं बिभ्यत्तत्किं प्रकुप्यथ ॥७४॥

पण महोटा जीवनी हत्या पापने माटे याय छे, तेवी घणी पण सूक्ष्मजीवोनी हत्या पापने माटे थती नथी. जेवी रीते एक एवी महोटी शिला अंगने भांगवा माटे थाय, तेवी रीते शुं कांकरानो समूह थाय खरो ? ॥ ७० ॥ पोताने माटे रांधी राखेला लोकना घरोने विषे मध्यान्ह वखते थोडुं थोडुं ग्रहण करता एवा मने हिंसकपणुं लागतुं नथी. ॥ ७१ ॥ हे मांसभक्षको ! प्रथम हाथीनो घात करनारा एवा तमने दया नथी, अने निर्दयने पुण्य क्यांथी होय ? तेमज निःपुण्यने क्रियाज शी होय ? ॥ ७२ ॥ ए प्रमाणे लाभने इच्छनारा तमने मूलखामी प्राप्त थइ. तो हे एकांतपुन्यार्थिओ ! तमे एक दयाने सेवो. ॥ ७३ ॥ घातक एवा तमाराथी भय पामतो आ हाथी जो कृपाना स्थान अने सौम्य एवा महारे शरणे आव्यो तो तेथी तमे शा माटे क्रोध करो छो ? ॥ ७४ ॥ योगसिद्ध मुनिनो प्रभाव कोइ जूदा प्रकारनो होय छे. जेणे करीने उत्तम बुद्धिवाला तो

यतः स्याद्योगसिद्धस्य, महिमा हि स कश्चन ॥ आसतां सुधियो येनो–पासते पशवोऽपि हि ॥७५॥
साधोः सुधामचा वाचा, शांतक्रोधकृशानवः ॥ क्षणेन तापसा सर्वे, जैनीं दीक्षां प्रपेदिरे ॥७६॥
तैरन्वितो मुनिर्याव–द्ययौ राजगृहांतिम् ॥ गोशालः संमुखस्ताव–दासीदशकुनो यथा ॥ ७७ ॥
जडोऽसौ मर्दितुमनाः, पाणिना गोक्षुरोत्करम् ॥ उन्मादबहुलो वादं, ययाचे मुनिमार्द्रकिम् ॥७८॥
अभाव्यं न भवत्येव, नाशोऽस्ति न च भाविनः ॥ नियतेरिति प्राबल्ये, वृथा ते संयमश्रमः ॥७९॥
जंतूनां पौरुषं व्यर्थं, बलिनी भवितव्यता ॥ पश्य मुद्रा न पच्यंते, वन्हियोगेऽपि केचन ॥ ८० ॥

दूर रह्या. परंतु निश्चे पशुओ पण तेने सेवे छे. ॥ ७५ ॥ पछी साधुनी अमृत झरती वाणीथी क्षण मात्रमां शांत थयो छे क्रोध-रूप अग्नि जेमनो एवा सर्वे तापसोए जैन दीक्षा लीधी. ॥ ७५ ॥ पछी ते तापसो सहित आर्द्रककुमार मुनि जेटलामां राज-गृह नगरनी समीपे गया एवामां अपशकुननी पेठे गोशालो तेमने सामो मल्यो. ॥ ७७ ॥ त्यां हाथ वडे गोखरुना कांटाने मसली नाखवानी इच्छा करनारा अने घणा उन्मादवाला ते जड गोशालाए आर्द्रककुमार मुनि पासे वाद माग्यो. ॥ ७८ ॥ गोशाले कह्युं के–न थवानी वस्तु नथीज थती, अने थवानी वस्तु थया विना रहेती नथी. आ प्रमाणे विधिनुं सबलपणुं होवाने लीधे तमारो आ संयमनो श्रम वृथा छे. ॥७९॥ प्राणीओनुं पुरुषार्थ व्यर्थ छे. फक्त भाग्य बलवंत छे. जूओ, अग्निनो योग छतां पण केटलाक मग नथी रंधाता. ॥ ८० ॥ एम ए गोशाले कह्युं एटले विद्याधर तथा मनुष्यवडे जोवाता आर्द्रककुमार मुनिए

इत्यस्मिन् जल्पति प्रेक्ष्य–माणः खेचरभूचरैः ॥ ऋषिर्बभाषे पाखंडिन्, केयं तेऽलीककल्पना ॥ ८१ ॥
नियतिश्चेत्प्रमाणं ते, तदेवं रारटीषि किम् ॥ त्वद्बोधायेति चेन्नासौ, नियतेरौपजानुकः ॥ ८२ ॥
न हि धूमध्वजेध्मादि–सामग्रीरहिताः क्वचित् ॥ पच्यमाना नियत्यैव, मुद्गा अपि निरीक्षिताः ॥८३॥
अन्यच्चाहं क्रियानिष्ठो, नियत्या वान्यथापि वा॥ अन्यथा चेत्तदा भग्न–प्रसरा सा वराकिका ॥८४॥
नियत्या चेत्तदा किं त न्निमित्तं कलहायसे॥ किं च व्याधिः स्वयं शाम्य–त्येकोऽन्यस्त्वौषधैः पुनः ॥८५॥
स्वयं जायेत कोऽपि द्रु–रपरो रोपितः खलु ॥ ततो द्वितीयं नियतेः, पौरुषं मन्यसे न किम् ॥ ८६ ॥

कह्युं के–अरे पाखंडि! तने आ खोटी कल्पना केम थई? ॥ ८१ ॥ जो तने नसीब प्रमाण होय तो आ प्रमाणे शा माटे बूम पाडे छे? कदापि तारा बोधने माटे छे? एम जो होय तो आ संयम नसीबने ढांकनार नथी. ॥ ८२ ॥ कोइ ठेकाणे अग्नि अने लाकडा विगेरेनी सामग्री विना फक्त नसीबथीज रंधाता मग निश्चे नथी दीठा!! ॥ ८३ ॥ वली बीजुं एके हुं नसीबथी क्रियावंत छुं? अथवा बीजी कोइ पण रीतथी छुं! जो बीजी कोइ रीते होउं तो भांगी गयेली सहायवाली ते नियति 'नसीब' एक छे. ॥ ८४ ॥ जो नसीब वडे क्रियावंत छे तो ते क्रियाने निमित्ते शा माटे क्लेश करे छे? वली पण एक व्याधी पोतानी मेले शांत थइ जाय छे, अने बीजो व्याधि ओषधे करीने शांत थाय छे. ॥ ८५ ॥ कोइक वृक्ष पोतानी मेले उत्पन्न थाय अने बीजुं कोई निश्चे वाववाथी उगे छे, माटे नसीबने बीजुं पुरुषार्थ तुं शुं नथी मानतो? ॥ ८६ ॥ एवी रीते

एवं निगृह्य गोशालं, स्तुयमानः सुरैर्नरैः ॥ प्राप्तः समवसरणं, सोऽनमच्चरमं जिनम् ॥ ८७ ॥

श्रुत्वा तमागतं साधु–माहूत इव तद्गुणैः ॥ सत्राभयकुमारेण, तत्रागाच्छ्रेणिको नृपः ॥ ८८ ॥

प्रदक्षिणय्य तं भक्त्या, नत्वा च रचितांजलिः ॥ तच्चरित्राद्भुतं शंस–न्नभ्यधान्मगधाधिपः ॥८९॥

घनो गुणैस्त्वमार्द्रांभू–र्भस्मतापसवर्ष्मसु ॥ गोशालकदवार्चिश्च, युक्तमेव निवारयः ॥ ९० ॥

तच्चित्रं यत्त्वयाऽत्रोटि, तादृक्करटिशृंखला ॥ ततो मुनिर्मनाक्हास्य–रम्यास्यः क्ष्मापतिं जगौ ॥९१॥

गोशालाने प्रतिबोध करीने देवता तथा मनुष्योए स्तुति करेला ते आर्द्रककुमार मुनिए समवसरणमां आवीने ते छेल्ला तीर्थंकरने नमन कर्युं. ॥ ८७ ॥ ते आर्द्रककुमार मुनिने आवेला सांभली जाणे तेमना गुणोए बोलावेलो होयनी ? एवो श्रेणिक राजा अभयकुमार सहित त्यां आव्यो. ॥ ८८ ॥ मुनिने भक्तिथी प्रदक्षिणा करी अने हाथ जोडवा पूर्वक नमस्कार करी मगधपति श्रेणिक राजाए तेमना अद्भुत चरित्रनी प्रशंसा करतां कह्युं के–॥ ८९ ॥ हे आर्द्रककुमार ! गुणे करीने मेघ सरखा तमे भस्मरूप मुनिना शरीरने विषे गोशालारूप दावानलने शमाव्यो ते योग्यज कर्युं छे. ॥ ९० ॥ वली ते आश्चर्यछे के-जे तमे तेवी हाथीनी मजबुत सांकल त्रोडी नाखी. पछी थोडा हास्यने लीधे मनोहर मुखवाला आर्द्रककुमार मुनिए राजा श्रेणिकने कह्युं के-॥९१॥ हे नृप ! बीजा बंधथी मुकावुं तेमने दुष्कर नथी लागतुं, कारण के-मदोन्मत हाथीने वनमां

न दुष्करो मे नृप बंधमोक्षो, गजस्य मत्तस्य वने बभूव ॥
पुनः स तर्कूद्धृततंतुबंधात्, सुदुष्करो मे प्रतिभाति मोक्षः ॥ ९२ ॥
इति वृत्तं पठित्वास्य, वृत्तं स्वं वदतोऽभवत् ॥ विशिष्यवीरतां स्तोतुं, मागधो मगधेश्वरः ॥९३॥
अथाभयं मुनिः प्रोचे, मित्रैष महिमा तव ॥ अनार्यदेशजन्मापि, वंद्येऽहं यन्नरेश्वरैः ॥ ९४ ॥
चकोर इव चंद्रे चे-न्नाधास्यं सौहृदं त्वयि ॥ चारित्रचंद्रिकापानं, तदवाप्स्यमदः कथम् ॥९५॥
अहं तवोपकारस्य, नानृणः स्यां कदाचन ॥ एतद्ब्रवीमीत्थमेव त्वं, सम्यक्त्वं द्योतयेः सदा ॥९६॥

पण बंधन थाय छे, परंतु रेंटीयाथी उकेलेला सूतरना तांतणाना बंधनथी मुकावुं ते मने घणु दुष्कर लागे छे. ॥ ९२ ॥ एवीं रीते आर्द्रककुमारना वृत्तांतने कही पोतानुं वृत्तांत कहेतो एवो मगधपति उत्तमपुरुषना वीरपणाने वखाणवा माटे मागध (बंदीजन) समान थयो. ॥ ९३ ॥ पछी आर्द्रककुमार मुनिए अभय कुमारने कह्युं के–हे मित्र ! ए तमारो प्रभाव छे, जे हुं अनार्यदेशमां जन्म पाम्यो छतां पण राजाओथी वंदन कराउं छुं. ॥ ९४ ॥ जो चंद्रने विषे चकोर पक्षीनी पेठे में तमारे विषे सुहृदपणुं न धारण कर्युं होत तो आ चारित्ररूप चंद्रिकानुं पान शी रीते पामत ? ॥ ९५ ॥ हुं तमारा उपकारनो बदलो वालनार क्यारे पण नहिं थाउं ! तेथी एटलुं कहुं छुं के–तुं आवी रीतेज निरंतर सम्यक्त्वने दीपावजे. ॥ ९६ ॥

मुनिं सम्यक् तमानम्य, ययो राजा यथागतम् ॥ सहाभयेन तद्दीक्षा–भावनापावनाशयः ॥ ९७ ॥
केवलैराश्रितः साधु–गुणैरुत्पन्नकेवलः॥ मुनीश्वरोऽपि स प्राप, समये शाश्वतं पदम् ॥ ९८ ॥

अनार्यदेशप्रभवोऽपि मंक्षु, मोक्षं ययावार्द्रकुमारसाधुः ॥
सौहार्दतः श्रेणिकनंदनस्य, कार्या ततः साधुभिरेव मैत्री ॥ ९९ ॥

पछी ते मुनिनी दीक्षानी भावनाथी पवित्र मनवालो राजा श्रेणिक ते आर्द्रकमुनिने सारी रीते वंदना करीने अभयकुमार सहित जेम आव्यो हतो तेम चाल्यो गयो. ॥ ९७ ॥ केवल साधुना गुणोथीज आश्रय करायला होवाथी उत्पन्न थएला केवल ज्ञानवाला ते आर्द्रककुमार मुनीश्वर पण अवसरे मोक्षपदने पाम्या. ॥ ९८ ॥ अनार्यदेशमां उत्पन्न थया छतां पण अभयकुमारनी मित्रताने लीधे आर्द्रककुमार मुनि शीघ्र मुक्तिने पाम्या, माटे हेभव्यजीवो ! तमारे उत्तम पुरुषोनी साथे मैत्री करवी. ॥ ९९ ॥

॥ इति आर्द्रकुमार कथा ॥

ननु आर्येभ्योऽन्ये हूणचिणादयो धर्मबाह्या इत्यवसितं, परमंतरद्वीपादिमनुष्याणां का वार्तेत्याह ॥

अहिं शंका करे छे के–ज्यारे आर्यथकी बीजा हूणचिण विगेरे मनुष्यो धर्मरहीत छे एम निश्चय थयो तो पछी अंतरद्वीप विगेरेना मनुष्योनी शी वात ? ते कहे छे.

छप्पन्नंतरदीवेसु, तहय तीसाइभोगभूमीसु ॥ जे जुअलधम्मिमणुआ, न तेवि धम्मस्स
किर जुग्गा ॥ १८ ॥

छप्पन्न अंतरद्वीपमां तेमज त्रीश भोगभूमिमां एटले अकर्मभूमिमां जे युगलीया मनुष्यो छे, तेउ पण निश्चे धर्मने योग्य नथी. ॥ १८ ॥

व्याख्या ॥ इह कुंडलितकोदंडाकारभरतक्षेत्रप्रत्यंचाभूतस्य पूर्वापरकोटिभ्यां जगतीं भित्वा लवणसमुद्रं स्पृष्टवतः पीतप्रभापहसितहेम्नो हिमवतः पर्वतस्य पूर्वांतात् पश्चिमांताच्च द्वे द्वे दाढे समुद्रांतर्निर्गते चतसृष्वपि तासु प्रत्येकं सप्त सप्त संतीति हिमवन्निश्रयाऽष्टाविंशतिरंतरद्वीपाः । एवमैरावतक्षेत्रसीमावस्थिते शिखरिण्यपि पर्वते एतावंतः संतीति सर्वे संख्ययाऽमी षट्पंचाशत्, एतेषां विशेषस्वरूपं जीवाभिगमादवसेयं ॥

अहिं वांका वालेला 'धनुष्यना आकार' सरखा भरत क्षेत्रनी पणचरुप, तथा पूर्व तरफना अने पश्चिम तरफना खूणाथी जगतीने भेदीने लवण समुद्रने स्पर्श करी रहेला, वली पोतानी पीली प्रभाथी सुवर्णने पण हसी काढनारा एवा हिमवंत पर्वतना पूर्व छेडाथी अने पश्चिम छेडाथी बबे दाढाओ समुद्रनी अंदर नीकलेली छे. ते चार दाढाओने विषे पण दरेक दरेक उपर सात सात द्वीपो छे. एम एक हिमवंत पर्वतनी निश्राथी अठावीश अंतरद्वीप छे. एवी रीते ऐरवत क्षेत्रने सीमाडे रहेला शिखरी पर्वतने विषे पण एटलाज अठावीश अंतरद्वीप छे. एम सर्व संख्या मलीने ए अंतरद्वीप छप्पन छे. ए अंतरद्वीपो संबंधी विशेष स्वरूप जीवाभिगम सूत्रथी जाणी लेवुं. ॥ १ ॥

तथा। भोगः प्राक्कृतसुकृतफलानुभवः। तदर्हा भूमयो भोगभूमयस्ताश्च हैमवतं हरिवर्षं देवकुरव उत्तरकुरवो रम्यकं ऐरण्यवतं चेति षट् जंबूद्वीपे। धातकीखंडे द्वादश, द्वादश पुष्करार्द्धे चेति सर्व संख्यया त्रिंशत्। एताश्चाकर्मभूमयोऽप्युच्यंते।

तेमज भोग एटले पूर्वे करेलां उत्तम पुण्यनां फलनो अनुभव करवो. तेने योग्य जे भूमीओ ते भोगभूमी कहेवाय छे. अने ते भोग भूमि हैमवंत हरिवर्ष देवकुरु उत्तरकुरु रम्यक अने ऐरण्यवत ए छ जंबूद्वीपमां, बार धातकीखंडमां अने बार पुष्करार्द्धमां एम सर्व संख्याए त्रीश थाय छे अने ए सर्व अकर्म भूमिओ पण कहेवाय छे.

अत्रोत्पन्नानां कृषिवाणिज्यादिकर्मरहितत्वात्। एतेषु षडशीतौ स्थानेषु ये युगलमेव धर्मः स्वभावो येषां ते युगलधर्मिणो मनुजा जायंते। किलेति निश्चये। तेऽपि न धर्मस्य योग्याः, धर्म-

सामग्रीचिंतायां तेऽप्यनधिकृता एवेत्यर्थः । भोगप्रधानत्वात्तेषां । एतेन आर्यक्षेत्रोद्भवा एव मनुजा धर्मयोग्या भवंतीति समर्थितम् ।

ए अकर्मभूमिमां उत्पन्न थयेला मनुष्यो खेती वेपार विगेरे कर्म रहीत होय छे, छप्पन्न अंतरद्वीप अने त्रीश अकर्मभूमि एम ए छयासी स्थानमां जे युगल एज धर्म केतां स्वभाव जेमनो छे ते युगलधर्मी मनुष्यो उत्पन्न थाय छे. ते युगलिया मनुष्यो पण धर्मने योग्य नथी. अर्थात् धर्म सामग्रीनो विचार करवामां तेओ पण अधिकार रहितज छे. कारणके तेमने भोगनुं प्रधानपणुं छे माटे, आ कहेवाथी आर्यक्षेत्रमां उत्पन्न थयेलाज मनुष्यो धर्मयोग्य थाय छे, एम निश्चय थयो.

॥ अथ कुलसामग्रीमाह ॥

हवे कुलनी सामग्री कहे छे.

तत्थवि सुसावयकुलं, दुलहं मुत्तागरुव्व बहुसुत्ति॥ जत्थो दया उ दीसइ, कमेण मुत्ताण परिणामो ॥१९॥

ते श्रावक कुलमां पण मुक्ताफलनी खाणनी पेठे घणां सुवचनवालुं उत्तम श्रावककुल दुर्लभ छे. जे कुलमां अवतार पामवाथी अनुक्रमे मोक्ष पामवानो परिणाम देखाय छे. ॥ १९ ॥

॥ व्याख्या ॥ तत्रार्यक्षेत्रेऽपि मुक्ताकर इव शृण्वंति सद्गुरूपदेशमिति श्रावकाः शोभनाश्च

ते श्रावकाश्च सुश्रावकाः तेषां कुलं दुर्लभं । कथंभूतं । बहवः सूक्तयः सुवचनानि यत्र तद्बहुसूक्ति। धर्मज्ञतया तेषां भाषासमितत्वात् ॥

ते आर्यक्षेत्रमां पण मोतिनी खाणनी पेठे सद्गुरुनो उपदेश सांभले ए श्रावक कहेवाय, अने सारा जे श्रावक ते सुश्रावक कहेवाय. एवा सुश्रावकनुं कुल दुर्लभ छे. ए सुश्रावक कुल केवुं छे ? तो के घणां छे सुक्ति एटले सद्वचनो जेमां ते बहुसूक्ति कहेवाय. अर्थात् घणां सद्वचनो तेमां बोलाय छे. धर्मना जाण होवाने लीधे तेवा श्रावकोने भाषा समितिपणुं होय छे माटे,

॥ अथ श्रावककुलस्य विशेषमाह ॥

हवे श्रावक कुलनुं विशेषपणुं कहे छे.

यत्र श्रावककुले उदयादवतारात्प्राणिनामिति गम्यते । क्रमेण सम्यक्तदेशविरतिसर्वविरत्यादिरूपेण मुक्तानां सिद्धानां परिणामो दृश्यते । मुक्ताकरपक्षे । बहवः शुक्तयो यत्र तद्बहुशुक्ति ॥ यत्र मुक्ताकरे उदकात् स्वांतिजलात् क्रमेण मुक्तानां मौक्तिकानां परिणामो दृश्यते ॥

जे श्रावक कुलमां उदय केतां अवतार प्राप्त थवाथी प्राणीओए एम जाणी लेवुं के-तेमां अनुक्रमे सम्यक्त, देशविरति, सर्वविरति विगेरेना प्रभावथी मुक्त जे सिद्धपुरुषो तेमना परिणामने जोवाय छे अर्थात् सिद्धिपद पमाय छे. पक्षे मुक्ताकरनुं विशेषण करीए त्यारे घणी छे छीपो जेमां ते बहुशुक्ति कहेवाय. अर्थात् जे मुक्ताकर (समुद्र) ने विषे उदक जे स्वांति नक्षत्रनुं पाणि तेथकी अनुक्रमे मुक्ता जे मोति तेनो परिणाम देखाय छे.

अयमर्थः। आर्यक्षेत्रं हि समुद्रप्रायं, समुद्रेऽपि मुक्ताकरेष्वेव मेघमुक्तमंभो मौक्तिकत्वेन परिणमति न सर्वत्र, तत्र पतितमात्रस्य तस्य क्षारजलसंपर्केण निर्नामनाशात्। एवमार्यक्षेत्रेऽपि सत्कुल एव जातो जंतुर्मुक्तत्वं लजते न शेषेसु। तत्रोत्पन्नस्य जव्यस्यापि स्वजावभ्रंशादित्येतदेवाह॥

अहिं आ अर्थ छे. निश्चे आर्यक्षेत्र समुद्रतुल्य छे. समुद्रमां पण ज्यां मोति पाकतां होय त्यांज मेघथी पडेलुं पाणी मुक्ताफलपणे परिणमे छे. पण सर्व ठेकाणे नहिं. कारण ते बीजे ठेकाणे पडतां मात्रज ते मीठा पाणीने खारा पाणी साथे संबंध थवाथी निर एवा नामनो नाश छे. एवी रीते आर्यक्षेत्र पण सत्कुलमांज उत्पन्न थयेलो प्राणी मुक्ति पामे छे. पण बीजा असत्कुलमां जन्मेलो मुक्ति पामतो नथी, कारणके—असत्कुलमां उत्पन्न थयेला भव्यप्राणीनो पण स्वभाव नाश पामी जाय छे माटे. तेज वात कहे छे.

मिच्छेसु कूरकम्मसु, कुलेसु भव्वोवि असरिसेसु गर्ड ॥ अप्पाणं नासेइ, खारजले साउसलिलंव ॥२०॥

म्लेछ अने क्रूरकर्मवाला अयोग्य कुलमां जन्म पामेलो भव्य जीव पण खारा पाणीमां मीठा पाणीनी पेठे पोतना आत्मानो नाश करे छे. ॥ २० ॥

व्याख्या ॥ म्लेच्छेषु जनंगमादिषु क्रूरकर्मसु चाक्रिकादिषु एवंविधेष्वसदृशेषु अयोग्येषु कुलेषु गत उत्पन्नो भव्योऽप्यात्मानं नाशयति । नैर्मल्यप्रतनुकर्मत्वादिस्वस्वरूपाद् भ्रश्यतीत्यर्थः । क्षारजले स्वादु सलिलमिवेति प्रागेव भावितं ।

चांडालादि म्लेच्छ तथा कुंभार अने घांची विगेरे क्रूरकर्मवाला, एवा प्रकारना असदृश केतां अयोग्यकुलमां गत एटले उत्पन्न थयेलो भव्यजीव पण आत्मानो नाश करे छे. अर्थात् निर्मल अने शिथल बंधवालां कर्मपणादि पोताना स्वरूपथी भ्रष्ट थाय छे. खारा पाणीमां मीठा पाणीनी पेठे एतो प्रथमज कहेलुं छे.

अथ न केवलं म्लेच्छादय एव दुःकुलत्वेन रूढाः, किं तु मिथ्यादृशोऽपीत्याह ॥

हवे केवल म्लेछ विगेरेज दुःकुलपणाये करीने प्रसिद्ध नथी, परंतु मिथ्यादृष्टिओ पण दुःकुलपणाये प्रसिद्ध छे. तेज कहे छे.

देवगुरुधम्मतत्ते, जत्थ परिक्खापरम्मुहा बुद्धी ॥ तेसुवि कुलेसु जाओ, कुलगव्वं वहइ ही मूढो ॥२१॥

जे कुलमां उत्पन्न थयेलानी बुद्धि देवतत्व गुरुतत्व अने धर्मतत्वनी परीक्षा करवामां शून्य छे. खेद थाय छे के–तेवा पण कुलमां उत्पन्न थयेलो मूर्ख फक्त कुलगर्वने धारण करे छे. ॥ २१ ॥

व्याख्या। यत्र येषु कुलेषु जातानां बुद्धिर्देवगुरुधर्मतत्वविषये परीक्षापराङ्मुखी विचारवंध्या वर्त्तते। हीति खेदे। खेदश्चासमंजसदर्शनात्। किमसमंजसमितिचेदुच्यते। यत्तेष्वपि कुलेषु जातो मूढो मूर्खः कुलिनोऽहमिति गर्वं वहति ॥

जे कुलमां उत्पन्न थयेला माणसोनी बुद्धि देव, गुरु अने धर्म तत्वना विषयमां परीक्षा करवाने अवला मुखवाली अर्थात् विचार करवामां शून्य होय छे. अने खेद तो अयोग्य केतां खराब वस्तुने देखवाथी थाय छे. अहिं अयोग्य शुं छे?

एम जो तमने शंका थती होय तो कहुं छुं के—जे तेवा पण कुलने विषे उत्पन थयेलो मूढ 'हुं कुलिन छुं.' एवा कुल गर्वने धारण करे छे.

इदमत्र हृदयं। इह तत्कुलं वस्तुतः स्तुतिपदे भवति। यत्रोत्पन्नाः प्रज्ञाद्भुतया सारासारता-विवेकं विधाय वस्तता द्रियंते परिहरंति वा। एतच्च श्रावकाणामेव दृश्यते, देवादिसम्यक्तत्वानु-रागात् कुदेवादिमिथ्यात्वपरित्यागात् ॥

अहिं तात्पर्य ए छे के—आ लोकमां ते कुल वस्तुताए स्तुति करवा योग्य थाय छे. जे कुलमां उत्पन्न थयेला पुरुषो बुद्धिवंतपणाने लीधे सार तथा असारपणाना विवेके करीने वस्तुने ग्रहण करे छे अथवा त्यजी दे छे. अने ए विवेक श्रावकोनेज देखाय छे. जे देवादि सम्यक्तत्वने विषे प्रीति करवाथी अने कुदेवादि मिथ्यात्वने त्यजी देवाथी प्रत्यक्ष देखाय छे.

यत्र पुनरमी देवगुरुधर्मा अस्मत्पूर्वजः प्रमाणीकृतास्तदेत एव प्रवरा इति वृथा गर्वगरल तरलितचेतनाः सारासारविवेकविकलाः कलाधिष्टातारः सदपि परमतं दूषयंति, असदपि स्वमतं भूषयंति। हंत तेष्वपि कुलेषु जातो यदि कुलमदं धत्ते ततः को नाम न खिद्यते। इति गाथार्थः॥

वली जे कुलमां आ देव गुरु धर्म अमारा पूर्वजोए प्रमाण करेलां छे, माटे तेज श्रेष्ट छे. एवा फोगट गर्वरूप विषथी चपल चित्तवाला अने सार असारना विवेक रहित तथा कलाओना अधिष्टायक एवा पुरुषो साचा एवाय पण परमतने दूषण लगाडे

छे अने खोटा एवाय पण पोताना मतने सुशोभित करे छे. खेद थाय छे के–तेवाय पण कुलने विषे उत्पन्न थयेलो प्राणी जो कुलमदने करे छे तो पछी कोण खेद न पामे ? अर्थात् सर्वेने खेद थाय छे.

पुनः श्रावककुलस्य शेषकुलेभ्यो भंग्यंतरेण वैशिष्ट्यमाह ॥

वली श्रावककुलनुं बीजा सर्वे कुलोथी बीजे प्रकारे करीने श्रेष्ठपणुं कहे छे.

जलगलणणंत काइय-निसिभत्तसुराइ विरमणाइयं । जं अन्नेसिं दुग्गं, सो मग्गो सावयकुलेसु ॥२२॥

पाणी गलवुं, अनंतकाय न खावा, रात्रीभोजन न करवुं, मदीरा न पीवी. इत्यादि जे कार्य श्रावक विना बीजाओना कुलने विषे दुर्गप्राय एटले न थइ शके एवां छे. ते कार्य श्रावकना कुलमां प्रसिद्ध राजमार्गनी पेठे सेवाय छे. २२

व्याख्या ॥ जलगलनं प्रतीतं । अनंतकायिका मूलकार्द्रकादयः । निशाभक्तं रात्रिभोजनं । सूरा मदिरा । आदिशब्दात् आमिषादिपरिग्रहः । तत एषां द्वंद्वः । एतेभ्यो विरमणं निवर्त्तनं । जलगलनं चानंतकायिकादिविरमणं च । जलगलनानंतकायिकनिशाभक्तसुरादिविरमणं तदादिर्येषां । कंकतगृहणसर्पादिमारणातपशय्याप्रस्फोटनादिनियमानां यत्र तज्जलगलनानंतकायिकनिशाभक्तसुरादिविरमणादिकमनुष्ठानं यत् अन्येषां श्रावकव्यतिरिक्तानां कुले दुश्चरत्वा दुर्गं दुर्गप्रायं वर्त्तते, स श्रावककुलेषु बालैरपि सुखासेव्यत्वात् मार्गो राजमार्ग इव भवति ।

पाणी गलवुं ते प्रसिद्ध छे, अनंतकाय एटले मूला आदू विगेरे, निशाभक्त एटले रात्रीभोजन, सूरा एटले मदिरा, आदि शब्दथी मांस विगेरेनो परिग्रह, ए अनंतकायादि सर्व वस्तुओथी विराम पामवुं, अर्थात् निवृत्त थवुं. पाणीने गलवुं अने अनंत कायादिकथी विराम पामवुं. एटले के–पाणी गलवुं तथा नंतकायभक्षण रात्रीभोजन अने सुरापान इत्यादिकथी विराम पामवुं. अहिं ते छे आदि जेमने एवो समास करतां आदि शब्दने गृहण कर्यो छे माटे काशीमां करवत मुकाववुं, सर्प विगेरेने मारवा, तडके खाटला खंखेरवा इत्यादि नियमोनो जेमां समावेश थाये छे, ते पाणी गलवुं तथा अनंतकाय, रात्री भोजन अने मदिरापान इत्यादिकथी विराम पामवानुं कार्य जे अन्य केतां श्रावक शीवाय बीजा कुलने विषे दुःखे आचरण करवा योग्य होवाथी न थइ शकवा समान छे अने ते सर्वे श्रावककुलमां बालकोवडे पण सुखे सेवन कराता होवाथी मार्ग जे राजमार्ग तेनी पेठे सुखे सेवन करवा योग्य थाय छे.

अत एव श्रावककुलाय देवा अपि स्पृहंतीत्याह ॥

ए कारणमाटे श्रावककुलने माटे देवताओ पण स्पृहा करे छे. ते कहे छे.

सुरलोयंमि सुरिंदा, सुक्खं तं तारिसं अणुहवंता। बोहिसुलहत्तहेउं, सावयकुलजम्ममिच्छंति ॥२३॥

देवलोकमां देवेंद्रो तेवां सुखने भोगवता छतां समकीत सुलभ थवा माटे श्रावकनां कुलमां जम्नने इच्छे छे.

व्यक्तार्था ॥

आ गाथानो अर्थ स्पष्ट छे. माटे लख्यो नथी."

अथ श्रावककुलेषु प्रेष्यजावोऽपि बोधिबीजनिबंधनत्वाद्बाढं कमनीय इत्याह

हवे श्रावक कुलमां चाकरपणुं पण बोधिबीज जे समकीत तेनुं कारण होवाथी अत्यंत वखाणवा योग्य छे. ते कहे छे.

आयणिऊण जम्मंत-रंमि सुहयस्स तारिसं उदयं॥ सावयकुलेसु पेस--त्तणंपि बाढं सुहावेइ ॥२४॥

बीजा जन्ममां सुभगना तेवा उदयने सांभलीने श्रावककुलमां चाकरपणुं पण मने घणुं सुखने अर्थे थाय छे. २४

व्याख्या। सुजगस्य कर्मकृतः श्रावककुलसांनिध्यादधिगतपंचपरमेष्ठिमंत्रस्य जन्मांतरे तादृशं त्रिदशानामपि श्लाघ्यमवतारमाकर्ण्य श्रावककुलेषु प्रेष्यत्वं दासत्वमपि मम बाढं सुखायते। बोधिहेतुत्वेनायतौ स्वर्गापवर्गसुखकारणत्वात्। न पुनः सार्वभौमत्वमपि मिथ्यात्वोपहतं प्रेत्य नरकादिक्लेशमूलत्वात् ॥

श्रावककुलमां रहेवाथी पंच परमेष्ठिमंत्रने पामेला सुभगनामना चाकरनां बीजा भवने विषे तेवा देवताओने पण वखाणवा योग्य अवतारने सांभलीने श्रावककुलमां प्रेष्यपणुं एटले चाकरपणुं पण मने घणुं सुख माटे थाय छे. कारण के--समकीतना हेतुथी ते आवता भवमां स्वर्ग अथवा मोक्ष सुखनुं कारण थाय छे, परंतु मिथ्यात्वथी हणायेलुं चक्रवर्तिपणुं पण सुख माटे थतुं नथी, पण मृत्यु पाम्या पछी नरकादि क्लेशनुं मूल थाय छे.

यदाह। जिनधर्मविनिर्मुक्तो, मा भूवं चक्रवर्त्यपि ॥ स्यां चेटोऽपि दरिद्रोऽपि, जिनधर्माधिवासितः ॥ १ ॥

जेने माटे कह्युं छे के-जिनधर्म रहित हुं चक्रवर्ति पण न थाउं. अने जिनधर्मयुक्त चाकर अने दरिद्री पण थाउं. ।२१।

सुभगस्य कथा चैवम् ॥

अने सुभगनी कथा आ प्रमाणे छे.

॥ सुभगनी कथा ॥

अस्त्यंगदेशशृंगार-श्चंपा संपद्वरा पुरी ॥ यस्यां दृष्टो ध्वजेष्वेव, कंपः किल महाव्रसात् ॥ १ ॥
दधिवाहनभूपाल-स्तत्र लोकमपालयत् ॥ जैत्रो यस्य प्रतापोऽभूत्, खड्गस्तु करभूषणम् ॥ २ ॥
स्मरवीरवधूगर्व-सर्वस्वापहृतिक्षमा ॥ सुभटी वा भयेत्याख्यां, दधानास्य प्रियाभवत् ॥ ३ ॥

अंग देशना आभूषणरूप तथा संपत्तिये करीने उत्तम एवी चंपा नामनी नगरीछे. जे नगरीमां निश्चे वायुने लीधे धजाओने विषे कंप देखातो हतो. अर्थात् ए नगरीमां माणसो निर्भयपणे रहेता हता.॥१॥ ते नगरीमां दधिवाहन नामनो राजा लोकने पालन करतो हतो. जे राजानो प्रतापज विजयशील हतो अने खड्गतो फक्त हाथनुं आभूषण हतुं. ॥२॥ ए राजाने कामनी स्त्री रतिना गर्वरूप सर्व धनने हरण करवा समर्थ सुभटीना सरखी अभया एवा नामने धारण करनारी स्त्री हती. ॥ ३ ॥ ते नगरीमां जन-समूहने आनंद आपनारो अने जैन शासननी सेवा करवामां उत्साहयुक्त मनवालो रुषभदास नामनो महोटो धनवंत शेठ रहेतो

जनौघरंजनो जैन–शासनोपासनोन्मनाः ॥ अर्हद्दासाख्य–स्तत्र श्रेष्ठी महाधनः ॥ ४ ॥
अर्हद्दासीति तस्यासी–त्प्रेयसी श्रेयसी गुणैः॥ न हि धर्मेऽपि कामेऽपि या भर्त्रा व्यभिचारिणी ॥५॥
महिषीश्चारयामास, तस्य कर्मकरो वने ॥ जज्ञे न केवलं नाम्ना, सुभगः कर्मणापि यः ॥ ६ ॥
अन्यदा मासि माघेऽसौ, महिषीश्चारयन् बहिः ॥ कायोत्सर्गस्थमद्राक्षीत्, कंचिद्ध्यानधरं मुनिम् ॥
ऋषिरेष कथं रात्रि–मत्र स्थातेति चिंतयन् ॥ कथंचिदतिचक्राम, यामिनी स गृहं गतः ॥ ८ ॥
महिषीः प्रातरादाय, स जगाम वनं पुनः ॥ ववंदे तं च सानंदः, कंदर्पदमनं मुनिम् ॥ ९ ॥

हतो, ॥ ४ ॥ ते शेठने गुणे करीने उत्तम एवी अर्हदासी एवा नामवाली स्त्री हती. जे स्त्री निश्चे धर्ममां पण अने काममां पण पतिथी भिन्न विचारवाली न हती. ॥ ५ ॥ ते शेठनी भेंसोने एक चाकर वनमां चारतो हतो. जे चाकर फक्त नामवडेज सुभग 'सारा भाग्यवालो' एम न थयो हतो. परंतु कर्मे करीने पण सुभग थयो हतो. ॥ ६ ॥ कोइ वखते माघ मासमां नगरीनी बहार भेंसो चारता एवा ए सुभगे कायोत्सर्गे रहेला कोइ ध्यानवंत मुनिने दीठा. ॥ ७ ॥ पछी ' आ मुनि अहिं रात्री केम रहेशे ? ' एम विचार करता घर प्रत्ये गयेला सुभगे रात्रीने महाकष्टे निवृत्त करी. ॥ ८ ॥ पछी सवारे भेंसोने लइने ते सुभग फरीने वनमां गयो अने त्यां आनंद सहित तेणे ते कंदर्पने दमन करनारा मुनिने वंदना करी. ॥ ९ ॥ आ वखते ते मुनिनी ताढनी पीडाने नाश करवा माटेज होयनी ? एम सूर्य उदय थयो एटले मुनि " नमो अरिहंताणं " ए पदने बोलता आकाश

तस्य शीतव्यथां हर्तु-मिव सूर्ये समुद्गते ॥ नमस्कारादिमपदं, वदन् व्योम ययौ मुनिः ॥ १० ॥
उत्पपात यया साधुः, सेयं विद्या खगामिनी ॥ इत्यादृतमतिर्मंक्षु, तत्पदं सुभगोऽग्रहीत् ॥ ११ ॥
आसने शयने स्थाने, गमने भोजनेऽपि सः ॥ नामुंचत्तत्पदं भाग्या-ल्लब्धं तद्धनवद्धनम् ॥ १२ ॥
श्रेष्ठी पप्रच्छ तं वत्स, त्वमेतज्जंजपीषि किम्॥ सोऽभ्यधत्त मुनेर्लब्धां, विद्यां गगनगामिनीम् ॥१३॥
इभ्योऽवदन्न विद्यासौ, केवलं व्योमगामिनी ॥ सर्वकामकरी किंतु, स्वच्छचित्त विचार्यताम् ॥ १४॥
जगद्वश्यकरी वैरि-स्तंभनी बंधमोक्षणी ॥ विद्येयं श्रीकरी मोक्षा-कर्षिणी बुद्धिवर्द्धिनी ॥ १५॥

मार्गे चाल्या गया. ॥ १० ॥ 'जेना वडे मुनि आकाशमां उडी गया ते आ आकाशगामिनी विद्या छे.' एम आदरयुक्त बुद्धिवाला सुभगे तरत ते पदने धारी राख्युं. ॥ ११ ॥ भाग्यथी प्राप्त थयेला धनवंतना धननी पेठे सुभगे बेसतां, सूतां, उभा रहेतां, चालतां अने भोजन करतां पण ते पदने मूकी दीधुं नहिं. ॥ १२ ॥ कोइ वखते शेठे तेने पूछ्युं के-हे वत्स ! तुं आ शुं जपे छे? सुभगे उत्तर आप्यो के-हुं मुनिथी प्राप्त थयेली आकाशगामिनी विद्याने जपुं छुं. ॥ १३ ॥ शेठे कह्युं. हे निर्मल मनवाला ! आ विद्या फक्त आकाशगामिनी नथी, परंतु सर्वकार्यने करनारी जाण. ॥ १४ ॥ वली आ विद्या जगतने वश्य करनारी, वैरीने स्तंभावनारी, बंधने छोडावनारी, लक्ष्मी आपनारी, मोक्षने नजीक लावनारी अने बुद्धिने वधारनारी छे. ॥ १५ ॥ वली पवित्र थइने सर्व एवी ए विद्याने निरंतर जप करजे. एम कहीने रुषभदास शेठे तेने संपूर्ण नमस्कार मंत्र

इमां पुनरनुच्छिष्टः, समस्तां सततं जपेः ॥ श्रेष्ठीत्युक्त्वा नमस्कारं, तं संपूर्णमपीपठत् ॥ १६ ॥
अथाखंडनमस्कार–परावृत्तिप्रमोदतः ॥ स्वं दासमपि शक्रीयन्, सोऽतिचक्राम वासरान् ॥१७॥
प्राप्ते घनागमे जाते, शाद्वले भुतलेऽखिले ॥ सोऽगात्पुराद्बहिः सर्वा, गृहित्वा सैरिभीरभिः ॥ १८ ॥
श्यामाः पयोभृता धीर–निस्वना उन्मदिष्णवः ॥ मह्यां महिष्यो गगने, कादंबिन्यश्च रेजिरे ॥ १९ ॥
परक्षेत्रेषु महिषीः, प्रसृता असतीरिव ॥ विनिवर्तयितुं झंपां सोऽदादंतर्नदीजले ॥ २० ॥
स तत्र तन्नकीलेन, विद्धो ध्यायन्नमस्कृतिम् ॥ विपद्यर्षजदासेभ्यः, पत्न्याः कुक्षाववातरत् ॥ २१ ॥

भणाव्यो. ॥ १६ ॥ पछी अखंड नवकार मंत्रना जपना हर्षथी पोताना दासपणाने पण इंद्रना सरखुं मानतो ते सुभग दिवसोने निर्गमन करवा लाग्यो. ॥१७॥ हवे वर्षा ऋतु प्राप्त थइ अने सर्व पृथ्वी लीलां घासवाली थइ एटले निर्भय एवो ते सुभग सर्व भेंसो लइने नगरीना बहार चारवा माटे गयो. ॥ १८ ॥ ते वखते श्यामवर्ण वाली, [भेंशुना पक्षमां] दुधने अने [वादलीना पक्षमां] पाणीने धारण करनारी, गंभीर शब्दवाली अने उन्मद करनारी पृथ्वी उपर भेंसो तथा आकाशमां वादलीओ शोभती हती. ॥ १९ ॥ पछी असती स्त्रीनी पेठे नदीना सामा तीरे पारका खेतरमां चरवा माटे पेठेली भेंसोने पाछी वालवा माटे ते सुभगे नदीना पाणीमां झंपापात दीधो. ॥ २० ॥ त्यां नदीना पाणीमां बूडी रहेला खीला वडे विंधायेलो ते सुभग नमस्कार मंत्रनुं ध्यान करतो मृत्यु पामीने ऋषभदास शेठनी स्त्रीना उदरने विषे अवतर्यो. ॥ २१ ॥ सुभगनो जीव गर्भमां आव्या

तस्मिन् गर्भगते श्रेष्ठि–न्युत्पन्नान् पुण्यदोहदान् ॥ भर्तुः प्रसादतः सर्वान्, यथाकालममानयत् ॥
सा काले सुषुवे पुत्रं, दर्शनानंदमिंदुवत् ॥ सुदर्शनाख्यया ख्यात–स्ततः स ववृधे क्रमात् ॥ २३ ॥
कलासु कुशलः काले, साधूनां सन्निधौ सुधीः ॥ अधीयानः श्रुतं धर्मं, गृहिधर्ममधत्त सः ॥ २४ ॥
अध्यारूढः स तारुण्यं, पुण्यमूर्तिरुपायत ॥ महेभ्यनंदनीं नाम्ना, गुणैरपि मनोरमाम् ॥ २५ ॥
बभूव कपिलस्तस्य, मित्रं राज्ञः पुरोहितः ॥ स्मरस्येव विधुर्वायु–र्दक्षिणात्यो मधोरिव ॥ २६ ॥
एकतानः सदा सद्म, श्रेष्ठिनः स न्यषेवत ॥ स्वगृहं व्यवहारेण, भजमानोऽन्तरांतरा॥ २७ ॥

पछी रुषभदास शेठनी स्त्री अर्हद्दासीए पोताने उत्पन्न थयेला सर्व पवित्र दोहदोने भर्तारना प्रसादथी योग्य अवसरे पूरा कर्या. ॥ २२ ॥ अर्हद्दासीए जोनारने चंद्रनी पेठे आनंद आपनारा पुत्रने योग्य अवसरे जन्म आप्यो. पछी 'सुदर्शन' एवा नामथी प्रसिद्ध थयेलो ते पुत्र अनुक्रमे वृद्धि पामवा लाग्यो. ॥ २३ ॥ अवसरे कलाओमां कुशल थयेलो ते उत्तम बुद्धिवालो सुदर्शन कुमार साधुओनी पासे विद्याभ्यास करतो छतो गृहस्थधर्मने धारण करवा लाग्यो. ॥२४॥ युवावस्थाने पामेलो ते पुण्यमूर्ति सुदर्शनकुमार महेभ्य शेठनी पुत्री जे नामवडे तथा गुणवडे करीने पण मनोरमा हती तेने परण्यो. ॥ २५ ॥ चंद्र जेम कामदेवनो मित्र थयो अने दक्षिणनो वायु जेम वसंतनो मित्र थयो तेम राजा दधिवाहननो पुरोहित कपिल ते सुदर्शननो मित्र थयो. ॥ २६ ॥ कपिल सुदर्शननी साथे एक चित्तवालो होवाने लीधे निरंतर रुषभदास शेठने घेर रहेतो हतो अने पोतानां घरे कांइ कार्य प्रसंग होय त्यारेज वचे वचे आवतो हतो. । २७ ॥ कोइ वखते पोताना पतिने विषे जरा परस्त्रीओना व्यसननी

स्वभर्तरि परक्षैण–व्यसनाशंकिनी मनाक् ॥ एकांते कपिला कांता, पप्रच्छ कपिलं प्रियम् ॥ २८ ॥
नायासि प्रायसो गेह–मायातोऽपि न तिष्ठसि ॥ कांत किं तव वैयग्र्यमद्यस्वः सत्यमुच्यताम् ॥२९॥
कपिलः प्रोचिवा नस्ति, सुहृन्मम सुदर्शनः ॥ व्रजामि भामिनि प्रायः, तस्यैव सदनं सदा ॥३०॥
कः सुदर्शन इत्युक्ते, पत्न्या प्रोचे पुरोहितः ॥ सुदर्शनं न चेद्वेत्सि, वेत्सि तत्किं विशारदे ॥ ३१ ॥
सुदर्शनोऽयमृषभ–श्रेष्ठीसूनुरनूनधीः आराजरंकं स्वगुणै–रभीष्टो जात्यरत्नवत् ॥ ३२ ॥
औदार्येण घनाघनस्य घटितो बुद्ध्या च वाचस्पतेः, गांभीर्येण सरस्वतो रतिपतेर्देवस्य रूपश्रिया ॥

शंका पामेली कपिला स्त्रीए एकांतमां पोताना प्रिय कपिलने पूछ्युं के–॥ २८ ॥ हे कांत ! तमे घणुं करीने घरे आवता नथी अने कदापि आवो छो तो पण रहेता नथी. शुं तमने आजकाल चित्तनुं व्याकुलपणुं छे ? साचुं कहो ? ॥ २९ ॥ कपिले कह्युं हे भामिनि ! सुदर्शन नामजो म्हारे मित्र छे. घणुंकरीने हुं तेनाज घरने विषे निरंतर रहुं छुं. ॥ ३० ॥ सुदर्शन कोण छे ? एम स्त्रीए पूछ्युं एटले पुरोहिते कह्युं के–हे डाही ! जो तुं सुदर्शनने नथी जाणती तो पछी तुं बीजुं शुं जाणे छे ? ॥ ३१ ॥ महा बुद्धिवालो ए रुषभदास शेठनो पुत्र सुदर्शन जातिवंत रत्ननी पेठे पोताना गुणोए करीने राजाथी मांडीने रांक सुधीना माणसोने व्हालो थइ पड्यो छे. ॥ ३२ ॥ जे मेघना उदारपणाये करीने, बृहस्पतिनी बुद्धिवडे करीने, समुद्रना गंभीरपणाए करीने, तथा कामदेवनी रूपसंपत्तिए करीने, वली पर्वतनी धैर्ये करीने अने चंद्रनी कलाओवडे करीने घडायलो छे, ते आ त्रण विश्वना आभूषणरूप सुदर्शन शेठ विजयवंत वर्ते छे. ॥ ३३ ॥ ते सुदर्शनना सर्वे गुणो इष्ट छे, परंतु तेने शीलने विषे

धीरिम्णा धरणीधरस्य रजनीभर्तुः कलाचिश्च यः सोऽयं श्रेष्ठिसुदर्शनो विजयते विश्वत्रयी भूषणम् ॥
तस्य सर्वे गुणा इष्टा, यत्नः शीले पुनर्महान् ॥ चंद्रस्य जगदुल्लास्यं, कुमुदं तु विशेषतः ॥ ३४ ॥
इत्याकर्ण्य सकर्णा सा, कपिला चपलाशया ॥ सुदर्शनं रमयितुं, चक्रे चिंता स्मरातुरा ॥ ३५ ॥
अन्यदा नृभृदादेशात्, पत्यौ ग्रामांतरे गते ॥ कपिला फलितं मेने, स्वमनोरथशाखिनम् ॥३६॥
उपेत्य साभ्यधादिज्य-मद्याजीर्णात्पुरोहितः ॥ आमयावी मया विज्ञ, त्वामाह्वयति संप्रति ॥ ३७ ॥
परित्यक्तान्यकृत्योऽथ, तया सह सुदर्शनः ॥ मध्ये मित्रगृहं प्राप्तो-ऽपश्यत्तामेव कामिनीम् ॥ ३८ ॥

महोटो यत्न छे. चंद्रने जगत उल्लास पमाडवा योग्य छे. परंतु कुमुदं विशेषे उल्लास पमाडवा योग्य छे. ॥ ३४ ॥ पतिनां एवां वचन सांभलीने ते चपल चित्तवाली कपिला कामथी व्याकुल थइ छती सुदर्शननी साथे क्रीडा करवानो विचार करवा लागी. ॥ ३५ ॥ कोइ वखत राजानी आज्ञाथी पति बीजे गाम गयो एटले कपिला पोताना मनोरथरूप वृक्षने फलेलो मानवा लागी. ॥ ३६ ॥ पछी ते कपिला सुदर्शन पासे आवीने कहेवा लागी के-हे चतुर ! आजे पुरोहित अजीर्णने लीधे मांदा थयेल छे. माटे हवणां महारी साथेज तमने बोलावे छे. ॥ ३७ ॥ पछी बीजा सघलां काम त्यजी दइ सुदर्शन ते मित्रनी स्त्री कपिलानी साथे मित्रनां घरना मध्यभागमां गयो तो त्यां तेणे तेज एकली कपिलाने दीठी. ॥३८॥ मधुर वचनथी कामनी इच्छा करती

चाटूक्तिभिर्वृषस्यंतीं, पश्यंतीं स्निग्धया दृशा ॥ स्वशीलरत्नरक्षार्थ–माचख्यौ तां सुदर्शनः ॥ ३९ ॥
यद्भाषसे मृगाक्षि त्व–मेतत्कस्मै न रोचते ॥ परं हंत विधेर्वाम्यात्, क्लीबोऽस्मि करवाणि किम् ॥४०॥
भग्नाशा साथ तत्कालं, गृहद्वारमपावृणोत् ॥ व्रज व्रजेति जल्पंती, लज्जमाना स्वकर्मणा ॥ ४१ ॥
जालादिव तिमिः पाशा–दिव पक्षी गृहात्ततः ॥ निर्गत्य त्वरया गच्छं–श्चिंतयामासिवानसौ ॥४२॥
या विलासविषावेशा–द्विवशीकुर्वते जगत् ॥ भुजंगीष्विव नारीषु, विश्वासस्तासु को नृणाम् ॥४३॥
शस्त्रीव स्त्री बुधैश्चित्या, प्राणहर्त्री प्रमादिनाम् ॥ भर्त्रा करगृहीतापि, या परंप्रति धावति ॥ ४४ ॥

અને સ્નિગ્ધ દૃષ્ટિથી જોતી તે કપિલાને સુદર્શન પોતાનાં શીલરત્નનું રક્ષણ કરવાને અર્થે કહેવા લાગ્યો કે– ॥ ૩૯ ॥ હે મૃગનયનિ ! તું જે કહે છે એ કોને ન રુચે ? પરંતુ મને ખેદ થાય છે કે–નસીબના વાંકાપણાને લીધે હું નપુંસક છું, હવે હું શું કરું? ॥ ૪૦ ॥ પછી ભાંગી ગયેલી આશાવાલી કપિલાએ ‘ ચાલ્યોજા ચાલ્યોજા ’ એમ કહીને પોતાનાં કુકર્મથી લજ્જા પામી તુરત ઘરનું બારણું ઉઘાડી નાખ્યું. ॥ ૪૧ ॥ પછી માછલું જેમ જાલથી છૂટી જાય અને પક્ષી પાસથી છુટે તેમ ઘરથી નિકલીને વેગથી જતો એવો એ સુદર્શન વિચાર કરવા લાગ્યો કે– ॥ ૪૨ ॥ ‘ જે સ્ત્રી વિલાસરૂપ વિષના આવેશથી જગતને પરવશ કરે છે, સાપણની પેઠે તે સ્ત્રીને વિષે પુરુષોને વિશ્વાસ શો કરવો ? ૪૩ ॥ વિદ્વાન્ પુરુષોએ તરવારની પેઠે સ્ત્રીને પ્રમાદીઓના પ્રાણને હરણ કરનારી કહી છે. કારણ ભર્તાએ હાથમાં ગ્રહણ કર્યા છતાં પણ જે સ્ત્રી અથવા તરવાર બીજા તરફ દોડે છે. ॥૪૪॥

वरं वज्रनिपातेन, शतधा चूर्णितं शिरः ॥ न तु निर्द्धर्मनारीवाक्–विश्वासोपहतं मनः ॥ ४५ ॥
ततः स स्वं मनः साक्षी–कृत्याभिग्रहमग्रहीत् ॥ नातःपरं परगृहं, गम्यमेकाकिना मया ॥ ४६ ॥
तदादि चिंतयन् योषाः, सदोषा निखिला अपि ॥ सदा स्वदारतुष्टोऽधात्, धर्मे धैर्यं विशिष्य सः ॥
प्राप्ते शक्रोत्सवेऽन्येद्यु–र्वनं प्राप्तोऽवनीपतिः ॥ समं मंत्रिपुरोधाभ्यां, क्रीडा बहुविधा व्यधात् ॥४८॥
यांत्याः क्रीडार्थमुद्यान–मभयायास्तदाऽमिलत् ॥ नद्या इवांतरनदी, पथि पत्नी पुरोधसः ॥ ४९ ॥
सुदर्शनवधूं वीक्ष्य, वनं यांतीं षडंगजाम् ॥ केयं रामाऽभिरामांगी–त्यप्रच्छत्कपिलाऽभयाम् ॥ ५० ॥

वज्रना घाथी चूर्ण थयेलुं मस्तक सारुं, परंतु धर्मरहित स्त्रीनां वचनमां विश्वास पामवाथी हणायेलुं मन सारुं नहिं. ॥ ४५ ॥ पछी सुदर्शने पोतानां मनने साक्षी करीने अभिग्रह लीधो के–हवे पछी एकला म्हारे पारका घरे न जवुं. ॥ ४६ ॥ ते दिवसथी आरंभीने सर्वे एवी पण स्त्रीओने दोषयुक्त मानता अने निरंतर पोतानी स्त्रीने विषे संतोष पामेला सुदर्शने विशेषे धर्ममां धैर्यने धारण कर्युं. ॥ ४७ ॥ कोइ वखते इंद्रमहोत्सव आव्यो एटले मंत्री तथा पुरोहितने साथे लईने उद्यानमां गयेला राजाए त्यां घणा प्रकारनी क्रीडा करी. ॥ ४८ ॥ ते वखते क्रीडा करवा माटे उद्यान तरफ जती एवी अभया राणीने जेम एक नदीने बीजी नदी मले तेम मार्गमां पुरोहितनी स्त्री कपिला मली.॥४९॥पछी मार्गमां उद्यान तरफ जती एवी छ पुत्रवाली सुदर्शन शेठनी स्त्रीने जोइने “ मनोहर अंगवाली आ स्त्री कोण छे ! ” एम कपिलाए अभया राणीने पछ्युं. ॥ ५० ॥ हे भोली ! छ गुण-

त्वद्भर्तृसुहृदो भार्या, राज्यश्रीरिव षड्गुणा ॥ मुग्धे मनोरमा सेयं, षट्पुत्रेत्यजयाभ्यधात् ॥ ५१ ॥
सा वज्ञं कपिलाऽलापी–द्देवि किं भाषसे वृथा ॥ सुदर्शनप्रिया नेयं, यद्यस्यास्तनया अमी ॥ ५२ ॥
स हि क्लीवोऽस्ति निःशेष–मनुभूतमिदं मया॥ इत्युक्त्वा प्रकटीचक्रे, कपिला निजचापलम् ॥५३॥
हसंत्यथ जगौ राज्ञी, निःपुण्ये विदुषि ब्रुवे ॥ अमुना छद्मना मुग्धां, शठः स त्वामवंचयत् ॥५४॥
स हि षंडः परस्त्रीषु, प्रचंडस्तु स्वयोषिति ॥ अमी षट् तनयास्तस्य, जानातीति जनोऽखिलः ॥
तन्निशम्य विलक्षा सा, च्युतलक्षास्त्रयोधवत् ॥ आलापीत्कपिला कोऽयं, देवि दर्पो वृथा तव ॥५६॥
वाली राज्यलक्ष्मीना सरखी छ पुत्रवाली ते आ तारा पतिना मित्र सुदर्शननी स्त्री मनोरमा छे. एम अभया राणीए कपिलाने कह्युं. ॥ ५१ ॥ कपिलाए अवज्ञा पूर्वक कह्युं के–अरे देवि ! खोटुं शुं बोलो छो? जो एना आ पुत्रो होय तो ए सुदर्शननी स्त्री नथी. ॥ ५० ॥ कारण के निश्चे ते तो नपुंसक छे. अने ए में सर्व अनुभव कर्यो छे. एम कहीने कपिलाए सुदर्शनने विषे करेलु पोतानुं चपलपणुं प्रगट करी बताव्युं. ॥ ५३ ॥ पछी हसती एवी राणी अभयाए कह्युं के–हे निःपुण्ये ! हे डाही ! हे वाचाल ! खल एवा ते सुदर्शने आ कपटे करीने भोली एवी तने छेतरी छे. ॥ ५४ ॥ निश्चे ते परस्त्रीने विषे नपुंसक छे. अने पोतानी स्त्रीने विषे प्रचंड छे, तेना आ छ पुत्रो छे. एम सर्व लोक जाणे छे. ॥ ५५ ॥ अभयाना तेवां वचन सांभली निशानथी चूकेला शस्त्रधारी योधानी पेठे विलखी थयेली ते कपिला कहेवा लागी के–हे देवि ! तमने आ फोगट गर्व केम छे ? ॥ ५६ ॥ भोली एवी पण में पोताने घरे बोलावेला ते सुदर्शनने वाणीथी रमाडयो छे, परंतु हे भोगवाली ! चतुर एवी

वाचा तं स्वगृहानीतं, मुग्धाप्यहमरीरमम् ॥ त्वं योगिनि प्रगल्भापि, प्राभूस्तद्भाषणेऽपि न ॥५७॥
पाषाणोऽपि द्राविका धत्ता–मेका चंद्रकला मदम् ॥ ईदृशाः स्वस्वप्रियप्रीति कृतो माद्यंति किं स्त्रियः ॥
तद्वाणीभिः कृपाणीभि–रिव भिन्नाऽभया भृशम् ॥ प्रतिज्ञामित्यनात्मज्ञा, चक्रे वक्रेण चेतसा ॥५९॥
शीलशैलाग्रशृंगाच्चे–त्पातयामि सुदर्शनम् ॥ तदा मामभयां ब्रूयाः, सभयामन्यथा सखि ॥ ६० ॥
कोऽयं मम पुरोऽसत्त्व–वणिग्मात्रं सुदर्शनः ॥ सुदर्शनधरोऽपि स्या–दृष्टायां मयि निर्मदः ॥ ६१ ॥
मृणाललीलया हेतीः, सहंते ये रणांगणे ॥ न स्पंदंते भटास्तेऽपि, दृग्मात्रान्निहता मया ॥ ६२॥

पण तुं तेनी साथे बोलवामां पण समर्थ थई नथी. ॥ ५७ ॥ पत्थरथी पण पाणीने प्रगट करनारी एक चंद्रकला मदने धारण करो, पण बाकीनी पोतपोताना पतिने प्रीति करनारी स्त्रीओ शुं मद करे खरी ? ॥ ५८ ॥ तरवारनी पेठे ते कपिलानी वाणीथी अत्यंत घायल थयेली अभयाए पोतानी शक्तिने न जाणता छतां वक्रचित्तथी प्रतिज्ञा करी के–॥ ५९ ॥ हे सखि ! जो हुं सुदर्शनने शीलरूप पर्वतना शिखर उपरथी पाडुं तो मने अभया कहेजे–नहितर सभया कहेजे. ॥ ६० ॥ म्हारी आगल ए धैर्यरहित वणिक मात्र सुदर्शन कोण छे ? मने जोवाथी सुदर्शनने धारण करनार कृष्ण पण मद रहित थाय. ॥ ६१ ॥ जेओ रणसंग्राममां शस्त्रना प्रहारने कमलतंतु समान मानीने सहन करे छे, ते सुभटो पण म्हारी दृष्टिमात्रथी हणाया छता चाली शकता नथी. ॥ ६२ ॥ ए प्रमाणे परस्पर वात करती ते अभया अने कपिला बंने जणीओ नगरनी बहार उपवनमां जई

एवं मिथः प्रजल्पंत्यौ, ते गत्वोपवनं बहिः ॥ तत्र रत्वा चिरं सायं, पुनः स्वस्थानमियतुः ॥ ६३ ॥
राज्ञ्यथो पंडितां धात्रीं, स्वप्रतिज्ञामजिज्ञपत् ॥ सा स्माह अहिले कोऽयं, लग्नस्तव कदाग्रहः ॥६४॥
स्वात्मभूमिं परिज्ञाय, प्रतिजानाति नीतिमान् ॥ किमजा प्रतिजानिते, तरणं शरिदीशतुः ॥६५॥
अन्ये ते वालुकासद्म-समानमनसो नराः ॥ नारीनदीभिरक्षोभ्यो, वज्रस्तंभस्त्वयं पुनः ॥ ६६ ॥
परेऽपि श्रावकाः प्रायः, परस्त्रीषु पराङ्मुखाः ॥ असौ किं पुनराजन्म-शीलशाली सुदर्शनः ॥ ६७॥
गुरुवक्त्राब्जजातार्थ-मरविंदास्वादषट्पदः ॥ रमते रमणीदेह-वर्चोगेहेष्वसौ कथम् ॥ ६८ ॥

त्यां घणा वखत सुधी क्रीडा करीने पोतपोताने घरे गइ. ॥६३॥ पछी राणी अभयाए डाही एवी धावमाताने पोतानी प्रतिज्ञा कही एटले धावमाताए कह्युं के-हे गांडी! तने आ कदाग्रह क्यो लाग्यो ? ॥ ६४ ॥ नीतिना जाण पोतानी शक्तिने विचारीने प्रतिज्ञा करे छे. बकरी समुद्रने तरवुं शुं जाणे खरी ? ॥ ६५ ॥ जे वेलुनां घर समान मनवाला पुरुषो छे तेतो बीजा, अने आ सुदर्शन तो स्त्रीओरूपी नदीओथी क्षोभ न पमाडी शकाय एवा वज्रना मजबुत स्तंभ समान छे. ॥ ६६ ॥ बीजाय पण श्रावको घणु करीने परस्त्रीने विषे अवला मुखवाला होय छे, तो वळी आ जन्मथी आरंभीने शीलवडे शोभता एवा सुदर्शननुं तो शुं कहेवुं ? ॥ ६७ ॥ गुरुनां मुख कमलथी उत्पन्न थयेला अर्थरूप पराग [कमलतंतु] नो स्वाद लेवामां भमरा सरखो ए सुदर्शन स्त्रीओना शरीररूप विष्टानां घरने विषे केम रमे ? ॥ ६८ ॥ सर्पना मस्तक उपर रहेलो मणि, समुद्रनुं तळीयुं अने केशरीसिंहना केशर एटले गलाना वाल ते सुखे मेलवी शकाय, परंतु परस्त्रीओए सुदर्शननी छाती मेलववी ए दुःखथी पण

सुप्रापाः फणिरत्नाब्धि–तलकेशरिकेशराः ॥ दुरापं परनारीभि–र्वेक्षः सौदर्शनं पुनः ॥ ६९ ॥
शीललीलायितं तस्य, ख्यातं क्षितितलेऽखिले ॥ आकाशवल्गनप्रायां, कदाशां तदिमां त्यज ॥७०॥
अभ्यधादभया साधु–शिक्षा ते पंडिते पुनः ॥ प्रतिज्ञाभंजने जाने, जीवितं मरणाधिकम् ॥ ७१ ॥
ज्ञात्वा तवैव साचिव्यं, प्रतिज्ञातमिदं मया ॥ विना वायुबलं धूलि–र्नहि व्योमारुरुक्षति ॥ ७२ ॥
तदेकदा तमानीय, निजं नाम कृतार्थय ॥ तस्मिन्नत्रागतेऽशेषं, शेषमीषत्करं मया ॥ ७३ ॥
एवमभ्यर्थिता राज्ञ्या, तदाज्ञामभिगृह्य सा ॥ इन्यस्यानयनोपायं, वीक्षांचक्रे विचक्षणा ॥ ७४ ॥

मेलवी शकाय तेवी नथी. ॥ ६९ ॥ ते सुदर्शननुं शील आचरण सर्व पृथ्वीमंडलमां प्रसिद्ध छे, माटे आकाशने बाथ भीडवा सरखी आ खोटी आशाने त्यजी दे. ॥ ७० ॥ अभयाए कह्युं. हे पंडिते! तारी शिखामण सारी छे, परंतु प्रतिज्ञा भांगवाथी जीवितने मरणथी वधारे दुःख आपनार जाणुं छुं. ॥ ७१ ॥ वली तारुंज प्रधानपणुं जाणीने अर्थात् तारी सहाय धारीने में आ प्रतिज्ञा करी छे. कारण के–वायुना बल विना धूल आकाशमां न चडी शके. ॥ ७२ ॥ माटे तेने एक वखत अहिं लावीने पोतानां नामने कृतार्थ कर, अने ते अहिं आव्या पछी बाकीनुं सघलुं महाराथी सहेजमां करी शकाय तेवुं छे. ॥ ७३ ॥ एवी रीते राणीए विनंती करेली ते चतुर धावमाता तेनी आज्ञा लइने सुदर्शनने अंतःपुरमां लाववाना उपायनो विचार करवा लागी ॥ ७४ ॥ आ सुदर्शन कामदेव समान छे,

एष कामसमः काम–छद्मनानीयते सुखम् ॥ इति सा पंडिता काम–मूर्त्तिं नव्यामचीकरत् ॥७५॥
तां चोत्सवैः सदा साथ–मंतःपुरमवीविषत् ॥ एवं च कंचुकिव्रातं, विदुषी सा व्यशिश्वसत् ॥ ७६ ॥
इतश्च भवनिर्वेदा–दार्षभिः सर्वपर्वसु ॥ प्रतिमास्थोऽतिचकाम, यामिनीः शून्यसद्मसु ॥ ७७ ॥
अन्यदा कौमुदीपर्व–ण्यागते नागरैः सह ॥ विधातुं विविधाः केली–रवनीशो वनं ययौ ॥ ७८ ॥
महीपतिमनुज्ञाप्य, शिरोर्तिच्छद्मना गृहे ॥ मदनार्ताभया तस्थौ, सा हि कूटोक्तिजन्मभूः ॥ ७९ ॥
विधित्सुर्धर्मकर्माणि, चतुर्मासकपर्वणि ॥ प्राभृतार्पणतः क्ष्माप–मापप्रच्छ सुदर्शनः ॥ ८० ॥

माटे कामना मिषथी सुखे लावी शकाय एम छे. एम विचारीने ते पंडिताए लाकडानी नविन एवी कामनी मूर्ति करावी. ॥७५॥ अने ते मूर्तिने हमेशां सांजे उत्सवपूर्वक अंतःपुरमां लाववा तथा लइजवा लागी, अने एम करवाथी चतुर एवी ते धावमाताए चोकीदारोने विश्वास पमाडया.॥७६॥ हवे सुदर्शन शेठ संसारना खेदथी सर्व पर्वने दिवसे कोइ एकांतनां सूना घरमां कायोत्सर्गे रहीने रात्रीने निर्गमन करतो हतो. ॥ ७७ ॥ कोइ वखते कौमुदी पर्व आव्युं एटले नगरवासीओनी साथे राजा विविध प्रकारनी क्रीडा करवा माटे उद्यानमां गयो. ॥ ७८ ॥ आ वखते मदनथी पीडा पामती अभया राणी कपटथी माथुं दुखवाना मीषथी राजानी रजा लइने घरे रही. कारण के–ते कपटवचननी खरेखरी जन्मभूमी हती. ॥ ७९ ॥ ते दिवसे चोमासा संबंधी पर्व होवाने लीधे धर्मकार्य करवानी पौषधादि इच्छा करनारा सुदर्शन शेठे भेट अर्पण करवा पूर्वक राजानी रजा मागी. ॥ ८० ॥ पछी राजाए रजा आपेला ते सुदर्शन शेठे सर्व एत्राय पण दिवसे उपवास पूर्वक आनंदथी चैत्यपरि-

अनुज्ञातो नरेंद्रेण, स सर्वमपि वासरम् ॥ सरंगो विदधे चैत्य–परिपाटीमुपोषितः ॥ ८१ ॥
सायं निर्माय निर्मायः, पौषधं दुरितौषधम् ॥ सगृहस्थोऽपि योगीव, तस्थौ शून्यगृहे क्वचित् ॥८२॥
सद्ध्यानस्तिमितं प्राणा–यामजातांगलाघवम् ॥ ज्ञात्वा तत्रस्थमुद्धृत्य, तं मूर्ध्न्याधत्त पंडिता ॥८३॥
श्रुतामृतभृतः साधु–वृत्तो मंगल्यदर्शनः ॥ स स्मेराब्जमुखो रेजे, तन्मौलौ पूर्णकुंभवत् ॥ ८४ ॥
मुक्तकामोऽप्यसौ काम–दंभान्निःशंकया तया ॥ मध्यशुद्धांतमानीय, पुरो राज्ञ्या अमुच्यत ॥ ८५ ॥
स्विद्यंती घर्मतप्तेव, वेपमाना भयार्तवत् ॥ हृष्यंत्याप्तनिधानेव, तं बभाषेऽभया रयात् ॥ ८६ ॥

पाटी करी. ॥ ८१ ॥ अने कपट रहित एवो ते सांजने विषे पापने नाश करवामां औषध समान पौषध व्रतने धारण करीने गृहस्थ छतां पण योगीनी पेठे कोइ सूना घरमां कायोत्सर्गे रह्यो. ॥ ८२ ॥ पंडिताए सूना घरमां रहेला उत्तम ध्यानने विषे निश्चल थयेला अने प्राणायामथी शरीरना हलवापणाने पामेला जाणीने सुदर्शनने उपाडीने पोताना मस्तक उपर धारण कर्यो. ॥८३॥ ते वखते श्रुतरूप अमृतथी भरेलो, साधुना वृत्तवालो, मांगलिक दर्शनवालो अने प्रफुल्लीत मुखकमलवालो सुदर्शन पंडिताना मस्तक उपर पूर्णकुंभनी पेठे शोभवा लाग्यो. ॥ ८४ ॥ पछी शंका रहित पंडिताए काम विकार रहित एवाय पण ए सुदर्शनने हमेशां लावती तेवा कामदेवना मीषथी अंतःपुरमां लावीने राणी आगल मूक्यो. ॥८५॥ आ वखते तापथी तपेलानी पेठे परसेवा युक्त थयेली, भयथी पीडा पामेलानी पेठे कंपती अने निधान प्राप्त थवानी पेठे हर्ष पामती अभया राणी वेगथी सुदर्शनने कहेवा लागी के–॥८६॥ हे जीवितधन ! घणां वखत थया चिंतार्थी प्रगट करायला तमे आजे पूर्वे करेला पुण्यथी म्हारां नेत्रनी आगल

चिराज्जीवितसर्वस्व, चिंतया गोचरीकृतः ॥ सुकृतैः प्राक्कृतैरद्य, त्वं दृशोर्गोचरेऽभवः ॥ ८७ ॥
प्राग् मां गुणैरबध्नास्त्वं, बंधितोऽसि ततो मया ॥ कृते प्रतिकृतं कुर्वन्, जनोऽयं नापराध्यति ॥ ८८ ॥
त्वया रूपश्रिया जिग्ये, कामस्तन्मां त्वदाश्रिताम् ॥ स बाधतेऽधुना त्वं तु, शक्तोऽपि किमुपेक्षसे ॥
सुमते सर्वसत्वेषु, समता संमता तव ॥ शरीरेणावयोर्भेद-मधुना न धुनासि किम् ॥ ९० ॥
जानाम्याजन्म ते जंतु-जाते जातोदयादया ॥ मयि पंचेषुदूनायां, सा किममाहि तस्करैः ॥ ९१ ॥
ध्यानं च मुंच मुंचेदं, न ध्यानावसरोऽधुना ॥ परार्त्तिभंजनार्त्तिं मे, हत्वा ध्यानं ततो भजेः ॥ ९२ ॥

प्रत्यक्ष थया छो. ॥ ८७ ॥ प्रथम तमे मने गुणो वडे बांधी छे अने तेथी में तमने बांधेला छे. कारण करेला गुणनो उपकार करनार माणस अपराधवालो थतो नथी. ॥ ८८ ॥ रूप संपत्तिवाला तमे कामने जीत्यो छे, तेथी ते तमारो आश्रय करी रहेली मने हवणां दुःख आपे छे. परंतु समर्थ एवाय पण तमे केम म्हारी उपेक्षा करो छो ! अर्थात् म्हारा दुःखने मनमां केम धरता नथी ? ॥ ८९ ॥ हे उत्तम बुद्धिवाला ! तमने सर्वे प्राणीओने विषे समता मान्य छे, तो हवणां आपणा बन्नेना शरीरवडे पडेला भेदने केम नथी टालता ? ॥ ९० ॥ हुं जाणुं छुं के-तमने जन्मथी आरंभीने सर्वे प्राणीओना समूह उपर दया प्रगट थइ छे, तो पछी कामदेवथी पीडा पामती एवी म्हारे विषे ते तमारी दया चोरोथी शुं चोराइ गइ छे ? ॥ ९१ ॥ वली आ ध्यानने मूकी द्यो मूकी द्यो. हवणां ध्यान करवानो अवसर नथी. हे पारकी पीडाने भांगनारा ! म्हारी पीडाने नाश करीने पछी ध्यानने भजो. ॥ ९२ ॥ ए प्रकारना विघ्नने बोली नाखनारा शृंगार समुद्रना तरंगरूप ते अभयानां वचनवडे पण सुद-

शृंगारवार्द्धिकल्लोलै–र्विश्वविप्लावकैरिति ॥ तद्वचोभिर्न चुक्षोभ, सुरशैल इवार्मिभिः ॥ ९३ ॥
साथास्पृशत्तं पाणिभ्यां, कटाक्षैर्निशितैरहन् ॥ न्यौंच्छद्य केशैस्तस्यांघ्री–मंशदेशे त्वलंवत ॥ ९४ ॥
अगृह्णन्मध्यमूरुभ्यां, स्तनाभ्यां ह्यताडयत् ॥ बध्वा वस्त्रांचलेनाशु, तं सर्वांगमधुनयत् ॥ ९५ ॥
एभिर्विलासितैस्तस्याः, न चकंपे सुदर्शनः ॥ कृकलासीविलासैः किं, कंपते दृढपादपः ॥ ९६ ॥
हंसकध्वनिपादाब्जां, वलित्रयतरंगिणीम् ॥ किं सुधादीर्घिकां भूप–प्रियां प्राप्य न खेलसि ॥ ९७ ॥
निशा याति क्रमात्कार्श्यं, प्रायेणोच्छृंखलाः खलाः॥ त्वं च मानाद्रिमारूढो, धिक् मां दुर्दैववंचिताम् ॥

शेठ मेरुपर्वतनी पेठे चल्यो नहीं. ॥ ९३ ॥ पछी अभया राणी बे हाथ वडे तेनो स्पर्श करवा लागी, तीक्ष्ण कटाक्ष मारवा लागी. अने केश वडे तेना बे पगने लुछवा लागी. वली खभा उपर टेको दइने बेठी. ॥ ९४ ॥ वली सुदर्शनना मध्य शरीरने पोतानी जांघ वडे ग्रहण करवा लागी, छेवट वस्त्र वडे तुरत तेने बांधीने सर्व अंग धुणाववा लागी. ॥ ९५ ॥ अभयाना आवां आचरणथी सुदर्शन शेठ चल्यो नहीं. शुं काकिडीनी क्रीडाथी मजबुत एवुं वृक्ष कंपे खरुं ? अर्थात् न कंपे. ॥ ९६ ॥ झांझरना शब्द युक्त चरणकमलवाली अने त्रण वलियारूप तरंगवाली अमृतनी वाव्य समान राजप्रियाने पामीने तुं केम नथी क्रीडा करतो? ॥ ९७ ॥ अनुक्रमे रात्री ओछी थती जाय छे. घणुं करीने खल माणसो प्रतिबंध रहित होय छे. वली तुं मानरूप पर्वत उपर चडेलो छे. माटे दुर्दैवथी ठगायली मने धीक्कार थाओ. ॥ ९८ ॥ ए प्रमाणे वारंवार बोलती ते अभया जेम जेम उपसर्ग करवा

जल्पंतीति मुहुश्चक्रे, सोपसर्गान् यथा यथा॥ आरुरोह परां कोटिं, ध्यानस्य स तथा तथा॥ ९९॥
स्थूलस्तनस्थले ह्येका--दश श्रोत्रमहाबिले ॥ अरोमहरिति स्याम--शिरोजाजोगजोगिनो ॥ १०० ॥
तृष्णा विवर्द्धते तस्याः, शरीरमरुमंडले ॥ तादृक्मुनिमुखांभोज--राजहंसो विलेश न ॥ १११ ॥
यस्य माता गृहे नास्ति, तस्य माता हरीतकी॥ तस्यामित्यभयाख्यायां, स दधौ जननोधियम् ॥
अथ सामवचोजिस्त--मक्षुभ्यंतं सुदर्शनम् ॥ अत्यधाद्भ्रकुटीभीम--भाग्नदत्तभयाजया ॥ ३ ॥
रे रे यथा यथा चाटु--शतैरभ्यर्थ्यसे मया ॥ तथा तथा स्वसौभाग्य--गर्वेणैव प्रपूर्यसे ॥ ४ ॥

लागी तेम तेम सुदर्शन ध्यानना उत्कृष्ट अग्रभाग उपर चडवा लाग्यो. ॥ ९९ ॥ निश्चे महोटा स्तनरूप थलवाला, अगीयार छीद्ररूप महोटा बीलवाला, रोमरूप लीला तृण विनाना, श्याम मस्तकना वालरूप सर्पवाला, तृष्णाने वधारनारा ते अभयाना शरीररूप मरुदेशमां तेवी मुनिना मुखकमलमां रहेनारी राजहंसीरूप वाणी क्रीडा करे नहीं. ॥ १००-१०१ ॥ जेने घरमां मातां नथी तेने माता हरीतकी एटले हरडे छे. अहिं हरडे अने अभया ए बन्ने शब्द एकार्थवाची होवाथी ते अभया नामवाली राणीने विषे सुदर्शने मातृबुद्धि धारण करी. ॥ २ ॥ पछी भेम वचनथी चलायमान नहिं थयेला ते सुदर्शनने भ्रकुटीथी भयंकर कपालवडे भय आपती अभया कहेवा लागी. ॥ ३ ॥ अरे अरे! जेम जेम हुं सेंकडो प्रीति वचनथी तहारी विनंती करुं छुं, तेम तेम तुं तहारा पोताना सौभाग्यना गर्वथीज भरातो जाय छे! ॥ ४ ॥ अरे रांकडा! हजी सुधी पण तुं शी

अथापि स्त्रीचरित्रस्या--नभिज्ञोऽसि वराक रे ॥ अभयास्मि स्वशक्त्याहं, वीरानपि विरेचये ॥ ५ ॥
कस्त्वं वणिगणुः स्त्रीभि--र्भ्रश्यंतेभूधनाअपि ॥ पातयंति तरून्नद्य--स्तृणस्तंबस्य का कथा ॥ ६ ॥
प्रसन्ना जीवितं दत्ते, मेघवृष्टिरिवांगना ॥ अप्रसन्ना पुनः प्राणान्, गृह्णाति जगतोऽपि सा ॥ ७ ॥
सरसे नीरसो दीने, शूरः स्निग्धे च कोपनः ॥ कोऽपि नालोकितः क्वापि, नरस्त्वदपरो मया ॥ ८ ॥
जिजीविषास्ति चेन्मानं. मुक्त्वा मानय मां तदा ॥ नो चेत्प्रयासि मत्क्रोध--कृशानौ तृणपुलताम्॥९॥
एवं चिकीरती वाक्य--गरलं तरलानृजुः ॥ ध्यानमंत्रवृतस्तस्य, प्राभवन्नोगिनी न सा ॥ १० ॥

चरित्रनो अजाण छे. हुं अभया छुं. हुं पोतानी शक्तिथी वीर पुरुषोने पण रेच आपुं छुं. ॥ ५ ॥ तुच्छ एवो तुं वणिक मात्र कोण ? स्त्रीओवडे महोटा राजाओ पण पडी जाय छे. नदीओ महोटा झाडोने पाडी नाखे छे तो पछी घासना गुच्छने उखाडी नाखे तेनी तो शी वात ? ॥ ६ ॥ प्रसन्न थयेली स्त्री मेघवृष्टिनी पेठे जीवित आपे छे. वली अप्रसन्न एवी ते स्त्री जगतना पण प्राणोने हरण करे छे. ॥ ७ ॥ सरस वस्तुने निरस माननारो, दीनने विषे शूरवीरपणुं देखाडनारो अने स्नेहवाला उपर क्रोध करनारो तहारा विना बीजो कोइ पण माणस में क्यांइ पण दीठो नथी. ॥ ८ ॥ जो तने जीववानी इच्छा होय तो मानने मूकी दइ मने मान, अर्थात् मने अंगीकार कर. जो नहि माने तो म्हारा क्रोधरूप अग्निने विषे घासना पुला सरखो थइश. ॥ ९ ॥ एवी रीते वचनरूप विषने वरसावती चपल अने असरल ते अभया सर्पिणी ध्यानमंत्रथी पूर्ण थयेला ते सुदर्शनने पराभव करी शकी नहीं. ॥ १० ॥ सुदर्शन विचार करवा लाग्यो के-निर्भाग्यवंतोने मध्ये शिरोमणि एवा मने धिक्कार थाओ.

दध्यौ सुदर्शनो धिग् मा–मभाग्यानां शिरोमणिम् ॥ यदेवं कुर्वतः पुण्य–मुपसर्गो ममोत्थितः ॥११॥
यद्यस्य व्यसनांभोधेः, पारं पश्याम्यमुं तदा ॥ मुंचे पोतमिवोत्सर्ग–मन्यथाऽनशनं श्रये ॥ १२ ॥
आभवाभ्यस्तसंभोग–भंगीभल्लोभिराहतः ॥ राज्ञ्या सर्वां निशां नाप, तद्धैर्यजरदो भिदाम् ॥१३॥
अथालोक्य तमक्षोभं, खिन्ना तीक्ष्णशिखैर्नखैः॥ सा रंभास्तंभसौमालं, विलिलेख निजं वपुः ॥१४॥
पूच्चक्रे च तथा सर्वे–ऽप्याययुर्यामिका यथा ॥ नासान्यस्तदृशं तत्र, ददृशुस्ते सुदर्शनम् ॥ १५ ॥
अस्मिन्नेतदसंभाव्य–मिति तैर्ज्ञापितो नृपः ॥ तत्राययौ क्रुधा काल–इव पप्रच्छ चाभयाम् ॥१६॥

जे आ प्रमाणे पुण्य कार्य करता एवा मने उपसर्ग प्राप्त थयो; ॥ ११ ॥ जो हुं आ दुःखसमुद्रना पारने पामीश तो वहाणनी पेठे आ कायोत्सर्गने त्यजीश. नहितर अनशन लइश. ॥ १२ ॥ राणी अभयाए जन्मथी आरंभीने अभ्यास करेली संभोगनी वचनरचनारूप भालावडे सघली रात्री मार्या छतां पण ते सुदर्शननुं धैर्यरूप कवच भेदाणुं नहि. ॥ १३ ॥ पछी तेने चपळ न थयेलो जाणीने खेद पामेली राणीए तीक्ष्ण धारवाला पोताना नखोवडे करीने केलना स्तंभसरखा सुकोमल पोतानां शरीरने वलुर्युं. ॥ १४ ॥ वली तेणीये तेवी बूमो पाडी के–जेथी सर्वे एवाय पण चोकीदारो आवी पहोंच्या. अने त्यां तेओए नासीका उपर दृष्टिने धारण करी रहेला सुदर्शनने दीठो. ॥ १५ ॥ सुदर्शनने विषे आ असंभवित छे ? एम ते चोकीदारोए निवेदन कर्युं एटले राजा दधिवाहन त्यां आव्यो अने क्रोधथी कालनी पेठे अभयाने पूछवा लाग्यो. ॥ १६ ॥ एटले कपटनी

साऽभ्यधाद्दंभभूर्भाग्य-हीनाहं नाथ किं ब्रुवे ॥ तदा त्वयि वनं याति, यज्जाता मे शिरोव्यथा ॥१७॥
तयाकुलीकृताऽकस्मात्, त्वदादेशादिह स्थिता ॥ यावत्तावदयं भूत, इवायासीत्कथंचन ॥ १८ ॥
चिरं चकार चाटूनि, रिरंसुरसकौ मया ॥ परं स्वशीलरक्षार्थं, मौनमेवं व्यधामहम् ॥ १९ ॥
निस्त्रपोऽयं बलात्कार-मपि चक्रे यदा मयि ॥ तदोच्चैः पूत्त्कराराह-मेतदेव बलं स्त्रियाम् ॥ २० ॥
घटतेऽत्र न कर्मेदं, तमस्तिग्मद्युताविव ॥ ध्यायन्निति नृपोऽप्राक्षी-द्भूयो भूयः सुदर्शनम् ॥ २१ ॥
कृपालु र्भूपभामिन्या, अन्यायं वक्तुमक्षमः ॥ स मौनमादधे संतो, ह्यन्यदोषेष्वनादृताः ॥ २२ ॥

भूमि अभयाए कह्युं के-हे नाथ ! भाग्यहिन एवी हुं शुं कहुं ? ते वखते तमे उद्यानमां गया अने मने जे माथानी पीडा थइ. ॥ १७ ॥ ते पीडाथी व्याकुल करायली हुं तमारी आज्ञाथी जेटलामां अहि रही तेटलामां भूतनी पेठे अकस्मात् आ क्यांइथी आव्यो. ॥ १८ ॥ म्हारी साथे रमवानी इच्छावाला एणे घणा वखत सुधी खुशामद करी, पण में तो पोतानां शीलनुं रक्षण करवा माटे मौनज धारण कर्युं. ॥ १९ ॥ पछी निर्लज्ज एवा एणे ज्यारे म्हारे विषे बलात्कार कर्यो त्यारे में मोटेथी बूमो पाडी. कारण स्त्रीओने बूमो पाडवी एज बल होय छे, ॥ २० ॥ "सूर्यने विषे अंधकारनी पेठे आ सुदर्शनमां आ कार्य नथी घटतुं" एम विचार करता राजाए वारंवार सुदर्शनने पूच्छयुं. ॥ २१ ॥ परंतु दयालु एवो सुदर्शन राजानी स्त्रीनो अन्याय कहेवाने असमर्थ छतो मौन धारण करी रह्यो. कारण के-संत पुरुषो बीजानो दोष कहेवामां आदर रहित होय छे. ॥ २२ ॥

तूष्णीकत्वान्महीनाथ–स्तं निश्चित्यापराधिनम् ॥ भ्रमयित्वाखिलपुरे, धीवंध्यो वध्यमादिशत्॥२३॥
मद्वत्तमस्विनीं राज–दयितामेष नास्पृशत् ॥ इत्याख्यातुमिव ज्योती–रूपसूर्यस्तदोद्ययौ ॥ २४ ॥
आरक्षैः कारितः सोऽन्य–गुह्याच्छादी गुणाश्रयः ॥ शुभायतिं खरारोहं, पटो निर्णेजकैरिव ॥२५॥
तं वधोचितनेपथ्यं, प्रतिरथ्यां पुरांतरा ॥ भ्रमयित्वा तलारक्षा–श्चक्रुरुद्घोषणामिति ॥ २६ ॥
सुदर्शनोऽयं शुद्धांते, स्खलितो वध्यते ध्रुवम् ॥ नयनिष्ठो नृपो नात्र, मनागप्यपराध्यति ॥ २७ ॥
अस्मिन्नेतदसंभाव्यं, वेत्ति कः कर्मणां गतिः॥ एषोऽपि कर्मजेयः किं, कोऽयं तैर्हि जगज्जितम्॥२८॥

बुद्धिरहित राजाए तेने मौन रहेवाने लीधे ए अपराधवालो छे, एम निश्चय करीने सर्व नगरमां फेरवीने वध करवानी आज्ञा करी. ॥ २३ ॥ ए सुदर्शन महारी पेठे अंधारी रात्रीरूप राजस्त्रीने नथी अडक्यो, एम कहेवा माटे होयनी ? एम ते वखते तेजरूप सूर्य उदय पाम्यो. ॥ २४ ॥ धोबीवडे उत्तरकाल खरारोह पटनी पेठे कोटवालोए तेने अन्य गुह्य ढांकवारूप गुणवालो कर्यो. ॥ २५ ॥ वध योग्य वेशवाला तेने नगरमां दरेक शेरीओमां भमावीने कोटवालो एवी उद्घोषणा करवा लाग्या के– ॥ २६ ॥ राजाना अंतःपुरमां स्खलना पामेला आ सुदर्शननो निश्चे वध कराय छे, एमां न्यायवंत राजा जरापण अपराध करतो नथी. ॥ २७ ॥ आ सुदर्शनने विषे ए असंभवित छे, छतां कर्मनीगति कोण जाणे ? ए पण शुं कर्मवडे जीतवा योग्य छे ? आ कोण छे ? निश्चे तेओ वडे जगत जीतायलुं छे. ॥ २८ ॥ जो आ सुदर्शन पण आवो थाय तो पछी बीजानो शो

यद्येषोऽपि जवेदीदृग्, तद्विश्वासोऽपरस्य कः ॥ इति पंक्तिस्थपौराणा–मालापानशृणोदसौ ॥२९॥
दध्यौ च जीव क्लीवत्वं, माधा बाधाजरेऽपि रे ॥ दोषः कस्यैष सर्वोऽपि, स्वकर्मफलजाग् जनः॥३०॥
यांति चेद्यांतु मंक्ष्वेव, प्राणाः सत्वरगत्वराः ॥ मा जून्मत्तः पुनर्जातु, लांछनं जिनशासने ॥ ३१ ॥
दुःखमक्षतशीलस्य, नाकालमरणान्मम ॥ इदमेव महद्दुःखं, यद्व्रताशा वृथाऽजवत् ॥ ३२ ॥
इति ध्यानसुधाधौत–मुखकालुष्यमागतम् ॥ गृहागतं पतिं वीक्ष्य, हृदि दध्यौ मनोरमा ॥ ३३ ॥
अहो पुण्यवतोऽमुष्य, मुखं दुःखेऽप्यकश्मलम् ॥ इंदुः किमपरागेऽपि, प्रसत्तिं स्वां समुज्झति ॥३४॥

विश्वास. एम हारबंध उभेला नगरवासीओनी वातोने ए सुदर्शन सांभलतो हतो. २९ ॥ वली सुदर्शन विचार करवा लाग्यो के–अरे जीव ! तुं दुःखसमूह प्राप्त थया छतां पण दीनपणुं न धरीश. ए कोनो दोष छे ? सर्व पण लोक पोतपोतानां कर्म फलने भोगवनारो छे. ॥ ३० ॥ जो तुरत जवाना स्वभाववाला प्राणो जता होय तो शीघ्रज जवा द्यो, परंतु महाराथी क्यारे पण जिनशासनने विषे कलंक न थाओ. ॥ ३१ ॥ नथी खंडित थयुं शील जेनुं एवा मने अकाल मरणथी दुःख थतुं नथी, परंतु एज महोटुं दुःख थाय छे जे महारी चारित्र लेवानी आशा वृथा थइ. ॥ ३२ ॥ ए प्रकारना ध्यानरूप अमृतथी धोइ नाख्युं छे मुखनुं मलिनपणुं जेणे एवा पतिने पोतानां घरना आगल आवेला जोईने मनोरमा मनमां विचार करवा लागी. ॥ ३३ ॥ अहो ! दुःखमां पण पुण्यवंत एवा एमनुं मुख मलिनता रहीत छे. चंद्र ग्रहण थये छते पण पोतानी उज्वलता शुं तजे खरो ? ॥ ३४ ॥ उत्तम व्रत धारीओनी मध्ये मुख्य एवा एमनी साक्षात् आ दशा जोइने अरे ! हजी सुधी पाषाणना

वीक्ष्य सद्वृत्तमुत्थस्या–मुष्य साक्षादिमां दशाम्॥ जीवत्यद्यापि पाषाण–हृदया हि मनोरमा ॥३५॥
आरप्स्यते यदा भर्त्रा, मम किंचन चापलम् ॥ तदा यास्यत्यधो भूमि–र्भ्रंशिष्यत्युडुमंडलम् ॥३६॥
सुता गता मृता वा किं, सर्वाः शासनदेवताः ॥ यदेकापि न सानिध्यं, मद्भर्तुः कुरुतेऽधुना ॥३७॥
ततः स्वगृहचैत्ये सा, पूजयित्वा जिनेश्वरान् ॥ चक्रे तदाग्रतः कायो–त्सर्गमेव कृताश्रवा ॥३८॥
पारयामि तदोत्सर्गं, यदा संगच्छते पतिः ॥ नो चेदनशनं मेऽस्तु, सर्वाः शृण्वंतु देवताः ॥३९॥
माशोचीः पुत्रि भर्तुस्ते, सदा संनिहिता वयम् ॥ इत्यकस्मान्नभोभाषाऽश्रावि श्राविकया तया॥४०॥

